# MAHĀYĀNA-SŪTRĀLAṂKĀRA

MACON, PROTAT FRÈRES, IMPRIMEURS.

# BIBLIOTHÈQUE
# DE L'ÉCOLE
# DES HAUTES ÉTUDES

PUBLIÉE SOUS LES AUSPICES
DU MINISTÈRE DE L'INSTRUCTION PUBLIQUE

## SCIENCES HISTORIQUES ET PHILOLOGIQUES

**CENT CINQUANTE-NEUVIÈME FASCICULE**

MAHĀYĀNA-SŪTRALAṂKĀRA
ÉDITÉ ET TRADUIT PAR SYLVAIN LÉVI

PARIS
LIBRAIRIE HONORÉ CHAMPION, ÉDITEUR
5, QUAI MALAQUAIS

1907
Tous droits réservés

ASAṄGA.

# MAHĀYĀNA-SŪTRĀLAṂKĀRA

## EXPOSÉ DE LA DOCTRINE DU GRAND VÉHICULE

SELON LE SYSTÈME YOGĀCĀRA

*ÉDITÉ ET TRADUIT*

*D'après un manuscrit rapporté du Népal*

PAR

SYLVAIN LÉVI

PROFESSEUR AU COLLÈGE DE FRANCE
DIRECTEUR D'ÉTUDES A L'ÉCOLE DES HAUTES ÉTUDES

TOME I. — TEXTE

PARIS
LIBRAIRIE HONORÉ CHAMPION, ÉDITEUR
5, QUAI MALAQUAIS

1907

Tous droits réservés

Cet ouvrage forme le fascicule 159ᵉ de la Bibliothèque de l'École des Hautes Études.

# AVANT-PROPOS.

C'est par l'effet d'une confusion de titre que j'ai mis la main sur ce texte. Un peu avant de partir pour l'Inde, j'avais eu l'occasion d'étudier et de signaler à l'attention des indianistes un recueil important de contes bouddhiques, le Sūtrālaṃkāra, d'Açvaghoṣa, conservé dans une traduction chinoise. Dès mon arrivée au Népal, en janvier 1898, je me mis en quête de l'original sanscrit. Hodgson, dans sa Liste des Ouvrages Bouddhiques en sanscrit connus de fait ou de nom au Népal (*Sketch of Buddhism,* publié en 1828; réimprimé dans les *Essays on the Languages, Literature, and Religion of Nepal and Tibet,* London, 1874; p. 37), mentionne (n° 29) le Mahāyāna Sūtrālaṃkāra; l'espoir de le retrouver n'était donc pas complètement interdit. Bientôt, en effet, le Pandit Kulamāna, de Patan, qui s'était intéressé à mes recherches, m'annonçait qu'un de ses amis possédait un manuscrit de l'ouvrage; il refusait toutefois de s'en dessaisir. Je finis par en obtenir la communication; il ne s'agissait pas du Sūtrālaṃkāra d'Açvaghoṣa, mais bien du Mahāyāna Sūtrālaṃkāra d'Asaṅga. Au lieu d'un recueil de contes édifiants, c'était un exposé scolastique des doctrines mahāyānistes sur le Bodhisattva, au point de vue de l'école des Yogācāras. Il n'entre pas dans mon propos de marquer ici l'intérêt de ce texte, ni de signaler les problèmes qu'il pose ou qu'il résout. Je compte traiter en détail ces questions dans l'Introduction à la traduction que je publierai prochainement; c'est dans le même fascicule que je donnerai aussi l'index des termes techniques dont l'ouvrage foisonne, et les éclaircissements que je pourrai en fournir. Ici, je ne me suis préoccupé que d'établir le texte.

La besogne, à dire vrai, n'était pas si facile. Je ne disposais que de la copie exécutée, sous ma surveillance, par le Pandit Kulamāna, reproduction fidèle d'un original assez bon dans l'ensemble, mais parsemé de menues fautes dues principalement à la



IMPRIMERIE NATIONALE.

confusion de lettres analogues dans la devanāgarī du Népal. Cette copie, sur papier népalais (gris au recto, jaune au verso), occupe 123 feuillets, à neuf lignes par page. L'ouvrage est complet; la seule lacune étendue se place à la suite du vers 2 de la IIe section: deux feuillets avaient à cet endroit disparu de l'archétype; pour dissimuler la lacune, le copiste ancien a recouru à un procédé assez usuel; il a copié ailleurs deux autres feuilles qu'il a insérées à la place des feuillets manquants. Je n'ai pas pu arriver à déterminer la provenance exacte de cette interpolation; mais elle vient sans aucun doute de quelque çāstra étroitement apparenté au Mahāyāna Sūtrālaṃkāra par le sujet et par le lexique. J'ai donné en Appendice à la suite du texte le contenu de ces deux feuilles; un chercheur plus heureux réussira probablement à les identifier. Les autres lacunes sont de peu d'étendue : XI, 5, une ligne; XI, 51, deux lignes; XI, 70, deux ou trois lignes; XII, 7, un hémistiche.

La traduction chinoise, due à l'Hindou Prabhākara mitra (entre 630 et 633 J.-C.), comble heureusement toutes ces lacunes; sans elle, j'aurais dû renoncer même à éditer ce texte. C'est par une collation constante de la version chinoise que j'ai réussi — si j'y ai réussi — à dégager de mon unique manuscrit un texte acceptable et intelligible. Je n'ai pas cru devoir, sous couleur d'une «acribie» intransigeante, étaler au bas des pages toutes les lectures vicieuses du manuscrit; je ne les ai rapportées que dans les rares cas où ma correction affectait l'ensemble d'un mot. Je laisse à ceux qui voudront bien se référer à la copie de Kulamāna le soin de juger ce qu'a pu coûter d'efforts la constitution d'un texte présentable.

C'est de propos délibéré que je me suis refusé à faire disparaître les irrégularités d'orthographe et de sandhi de mon manuscrit. La tradition des scribes népalais a ses usages constants, par exemple la réduction du groupe *°ttva* à *°tva* (*bodhisatva, tatva,* etc.), l'interchange des sifflantes palatale et dentale (*kuçīda, kusīda,* etc.); pour les textes qu'ils sont seuls à nous avoir conservés, il me paraît préférable de se conformer à leurs usages plutôt que de leur



imposer les rigueurs d'un purisme théorique. Le sanscrit a bien assez d'uniformité pour qu'on n'aille pas effacer de parti pris les rares particularités de temps ou de lieu qui ont pu y marquer leur empreinte. Quant au sandhi, l'application mécanique des règles risque le plus souvent d'anéantir des nuances de ponctuation et de pensée exprimées justement par des infractions à ces règles.

Si j'ai préféré donner le texte en caractères devanāgarī, malgré les avantages pratiques de la transcription au point de vue occidental, c'est que nos éditions d'ouvrages bouddhiques ont chance d'atteindre une catégorie de lecteurs que nous ne prévoyons pas assez peut-être et qui mérite pourtant d'être prise en considération. Au Népal même, et par delà le Népal, dans le monde si peu accessible encore des Lamas, nous pouvons apporter ainsi à de bonnes âmes un aliment de piété qui se convertira peut-être en amorce de science; l'exemple donné par les éditeurs européens peut provoquer là-bas une imitation féconde, sauver de la destruction ou rappeler au jour des textes menacés, et activer ainsi le progrès des connaissances. L'indianisme n'est point un vain exercice de dilettantisme : derrière nos problèmes de linguistique, de philologie, d'histoire politique, religieuse ou sociale, il faut entrevoir les centaines de millions d'êtres vivants que ces problèmes conditionnent à leur insu, et dont le sort est lié aux solutions qui doivent triompher.

Je manquerais à un réel devoir de gratitude si je n'exprimais pas ici mes remerciements à tous ceux qui ont collaboré à l'impression de ce livre, aux typographes de l'Imprimerie nationale, au Directeur des travaux, M. Héon, et surtout à M. Guérinot, de qui les corrections minutieuses m'ont valu des épreuves presque parfaites. Mon ami et collègue M. Finot a pris la peine de relire aussi toutes les épreuves. S'il reste encore des fautes, et je sais pertinemment qu'il en reste (un erratum sera donné à la fin de la traduction), la responsabilité n'en saurait incomber qu'à moi, et à la faiblesse de la nature humaine.

# महायानसूत्रालंकारः

॥ ओं ॥

नमः सर्वबुद्धबोधिसत्वेभ्यः

अर्थज्ञो ऽर्थविभावनां प्रकुरुते वाचा पदैश्चामलै-
र्दुःखस्योत्तरणाय दुःखितजने कारुण्यतस्तन्मयः ।
धर्मस्योत्तमयानदेशितविधेः सत्वेषु तद्गामिषु
श्लिष्टामर्थगतिं निरुत्तरगतां पञ्चात्मिकां दर्शयन् ॥ १ ॥ [1]

अर्थज्ञो ऽर्थविभावनां प्रकुरुते --[2] कोपदेशमारभ्य को ऽलंकरोति । अर्थज्ञः । कमलंकारमलंकरोति । अर्थविभावनां कुरुते । केन वाचा पदैश्चामलैः । अमलया वाचेति प---[3] अमलैः पदैरिति युक्तैः सहितैरिति विस्तरः । न हि विना वाचा पदव्यञ्जनैरर्थो विभावयितुं शक्यत इति । कस्मै दुःखस्योत्तरणाय दुःखितजने कारुण्यतस्तन्मयः । दुःखितजने यत्कारुण्यं तस्मात्कारुण्यतः । तन्मय इति कारुण्यमयः । कस्यालंकारं करोति । धर्मस्योत्तमयानदेशितविधेः । उत्तमयानस्य देशितो विधिर्यस्मिन्धर्मे तस्य धर्मस्य । कस्मिन्नलंकरोति । सत्वेषु तद्गामिषु । निमित्तसप्तम्येषा--[4] गामिसत्वनिमित्तमित्यर्थः । कतिविधमलंकारं करोति । पञ्चविधं । श्लिष्टामर्थगतिं निरुत्तरगतां पञ्चात्मिकां दर्शयन् ।

[1] Mètre çārdūlavikrīḍita.

[2] Lacune de deux syllabes indiquée dans le manuscrit. (Le chinois ne donne pas ce membre de phrase.) Le réviseur semble avoir tracé इति qu'il a ensuite effacé.

[3] Lacune de trois syllabes. Le réviseur a rétabli वोहृषया qui doit se rapprocher de la lecture authentique, car le chinois traduit : «Capable d'atteindre à la cité (*pura*) du Nirvāṇa» [*neng tcheu mie-p'an tch'eng*].

[4] Lacune de deux syllabes. Le réviseur a rétabli °मना°. Le chinois traduit : «Pour produire la pensée du Grand Véhicule», qui semble justifier la lecture ou la conjecture du réviseur.



IMPRIMERIE NATIONALE.

श्लिष्टामिति युक्तां निरुत्तरगतामित्यनुत्तरज्ञानगतां। तामिदानीं पञ्चात्मिकामर्थगतिं द्वितीयेन श्लोकेन दर्शयति।

घटितमिव सुवर्णं वारिजं वा विबुद्धं
सुकृतमिव सुभोज्यं भुज्यमानं क्षुधार्तैः।
विदित इव सुलेखो रत्नपेटेव मुक्ता
विवृत इह स धर्मः प्रीतिमग्र्यां दधाति ॥ २ ॥[1]

अनेन श्लोकेन पञ्चभिर्दृष्टान्तैः स हि धर्मः पञ्चविधमर्थमधिकृत्य देशितः साध्यं व्युत्पाद्यं चिन्त्यमचिन्त्यं परिनिष्पन्नं चाधिगमार्थं प्रत्यात्मवेदनीयं बोधिपक्षस्वभावं। सो ऽनेन सूत्रालंकारेण विवृतः प्रीतिमग्र्यां दधाति। यथाक्रमं घटितसुवर्णादिवत्। यदा स धर्मः प्रकृत्यैव गुणयुक्तः कथं सो ऽलंक्रियत इत्यस्य चोद्यस्य परिहारार्थं तृतीयः श्लोकः।

यथा बिम्बं भूषाप्रकृतिगुणवद्दर्पणगतं
विशिष्टं प्रामोद्यं जनयति नृणां दर्शनवशात्।
तथा धर्मः सूक्तप्रकृतिगुणयुक्तो ऽपि सततं
विभक्तार्थस्तुष्टिं जनयति विशिष्टामिह सतां ॥ ३ ॥[2]

अनेन किं दर्शयति। यथा बिम्बं भूषया प्रकृत्यैव गुणवत् आदर्शगतं दर्शनवशाद्विशिष्टं प्रामोद्यं जनयत्येवं स धर्मः सुभाषितैः प्रकृत्यैव गुणयुक्तो ऽपि सततं विभक्तार्थस्तुष्टिं विशिष्टां जनयति। बुद्धिमतामतस्तुष्टिविशेषोत्पादनादलंकृत इव भवतीति। अतः परं त्रिभिः श्लोकैस्तस्मिन्धर्मे त्रिविधमनुशंसं[3] दर्शयत्यादरोत्पादनार्थं।

आघ्रायमाणकटुकं स्वादुरसं यथौषधं तद्वत्।
धर्मद्वयव्यवस्था व्यञ्जनतो ऽर्थो न च ज्ञेयः ॥ ४ ॥[4]
राजेव दुराराधो धर्मो ऽयं विपुलगाढगम्भीरः।
आराधितश्च तद्वद्वरगुणधनदायको भवति ॥ ५ ॥
रत्नं जात्यमनर्घं यथा ऽपरीक्षकजनं न तोषयति।
धर्मस्तथायमबुधं विपर्ययात्तोषयति तद्वत् ॥ ६ ॥

त्रिविधो ऽनुशंसः। आवरणप्रहाणहेतुत्वमौषधोपमत्वेन। द्वयव्यवस्थ इति

(1) Mètre mālinī.

(2) Mètre çikhariṇī.

(3) Le substantif *anuçaṃsa* ne se trouve pas dans P. W². Le chinois le traduit par *kong-tö*, «mérite». — Cf. Çikṣā-samuccaya, Index II, s. v. *anuçaṃsa* et *ānuçaṃsa*.

(4) Mètre āryā jusqu'au vers 7.



व्यञ्जनार्थव्यवस्थः । विभुत्वहेतुत्वमभिज्ञादिवैशेषिकगुणैश्वर्यदानाद्राजोपमत्वेन। आर्यधनोपभोगहेतुत्वं च अनर्घजात्यरत्नोपमत्वेन। परीक्षकजन आर्यजनो वेदितव्यः। नैवेदं महायानं बुद्धवचनं कुतस्तस्यायमनुशंसो भविष्यतीत्यत्र[1] विप्रतिपन्नास्तस्य बुद्धवचनत्वप्रसाधनार्थं कारणविभाज्यमारभ्य श्लोकः।

आदावव्याकरणात्समप्रवृत्तेरगोचरात्सिद्धेः।
भावाभावे ऽभावात्प्रतिपक्षत्वाद्रुतान्यत्वात् ॥ ७ ॥

आदावव्याकरणात् यद्येतत्सद्धर्मान्तरायि[2] पश्चात्केनाप्युत्पादितं। कस्मादादौ भगवता न व्याकृतमनागतभयवत्। समप्रवृत्तेः समकालं च श्रावकयानेन महायानस्य प्रवृत्तिरुपलभ्यते न पश्चादिति कथमस्याबुद्धवचनत्वं विज्ञायते। अगोचरान्नायमेवमुदारो गम्भीरश्च धर्मस्तार्किकाणां गोचरः। तीर्थिकशास्त्रेषु तत्प्रकारानुपलम्भादिति। नायमन्यैर्भाषितो युज्यते। उच्यमाने ऽपि तदनधिमुक्तेः। सिद्धेरथान्येनाभिसंबुध्य भाषितः। सिद्धमस्य बुद्धवचनत्वं। स एव बुद्धो यो ऽभिसंबुध्य एवं भाषते। भावाभावे ऽभावाद्यदि महायानं किंचिदस्ति तस्य भाव सिद्धमिदं बुद्धवचनमतो ऽन्यस्य महायानस्याभावात्। अथ नास्ति तस्याभावे श्रावकयानस्याप्यभावात्। श्रावकयानं बुद्धवचनं न महायानमिति न युज्यते विना बुद्धयानेन बुद्धानामनुत्पादात्। प्रतिपक्षत्वात्। भाव्यमानं च महायानं सर्वनिर्विकल्पज्ञानाश्रयत्वेन क्लेशानां प्रतिपक्षो भवति तस्माद् बुद्धवचनं। रुतान्यत्वात्। न चास्य यथारुतमर्थस्तस्मान्न[3] यथारुतार्थानुसारेणेदमबुद्धवचनं वेदितव्यं। यदुक्तमादावव्याकरणादित्यनाभोगादेतदनागतं[4] भगवता न व्याकृतमिति कस्यचित् स्यादत उपेक्षाया अयोगे श्लोकः।

प्रत्यक्षचक्षुषो बुद्धाः शासनस्य च रक्षकाः।
अध्वन्यनावृतज्ञाना उपेक्षातो न युज्यते ॥ ८ ॥[5]

(1) Le ms. porte °त्यवित° avec la syllabe °त° annulée. Le chinois dit : «Il y a des gens qui objecteront».

(2) *Antarāyin*, si le texte est correct, est un mot nouveau. Mais le traducteur chinois a dû lire *antarāye*, car il traduit : «Quand la loi primitive était arrivée à sa fin, postérieurement au Buddha, il s'est produit». Cette lecture semble préférable.

(3) *Yathārutam* manque à P.W². Le chinois traduit : *souei-wen*, «selon la lettre».

(4) *Anābhoga* est traduit en chinois par *wou kong yong*, «manque d'intérêt pratique».

(5) Mètre anuṣṭubh jusqu'au vers 13.

अनेन किं दर्शयति । त्रिभिः कारणैरनागतस्य महतः शासनोपद्रवस्योपेक्षा न युज्यते । बुद्धानामयत्नतो ज्ञानप्रवृत्तेः प्रत्यक्षचक्षुष्कतया शासनरक्षायाश्च यत्नवत्वात् । अनागतज्ञानसामर्थ्याच्च सर्वकालाव्याहतज्ञानतयेति । यदुक्तं भावाभावे ऽभावादिति । एतदेव श्रावकयानं महायानमेतेनैव महाबोधिप्राप्तिरिति कस्यचित्स्यादतः श्रावकयानस्य महायानत्वायोगे श्लोकः ।

वैकल्यतो विरोधादनुपायत्वात्तथाप्यनुपदेशात् ।
न श्रावकयानमिदं भवति महायानधर्माख्यं ॥ ९ ॥

वैकल्यात्परार्थोपदेशस्य न हि श्रावकयाने कश्चित्परार्थ उपदिष्टः श्रावकाणामात्मनो निर्विद्विरागविमुक्तिमात्रोपायोपदेशात् । न च स्वार्थ एव परेषूपदिश्यमानः परार्थो भवितुमर्हति । विरोधात् । स्वार्थे हि परो नियुज्यमानः स्वार्थ एव प्रयुज्यते स आत्मन एव परिनिर्वाणार्थप्रयुक्तो ऽनुत्तरां सम्यक्संबोधिमभिसंभोत्स्यत इति विरुद्धमेतत् । न च श्रावकयानेनैव चिरकालं बोधौ घटमानो बुद्धो भवितुमर्हति । अनुपायत्वात् । अनुपायो हि श्रावकयानं बुद्धत्वस्य न चानुपायेन चिरमपि प्रयुज्यमानः प्रार्थितमर्थं प्राप्नोति । शृङ्गादिव दुग्धं न भस्त्रया । अथान्यथाप्यत्रोपदिष्टं यथा बोधिसत्वेन प्रयोक्तव्यं । तथाप्यनुपदेशान्न श्रावकयानमव महायानं भवितुमर्हति । न हि स तादृश उपदेश एतस्मिन्नुपलभ्यते । विरुद्धमेव चान्योन्यं श्रावकयानं महायानं चेत्यन्योन्यविरोधे श्लोकः ।

आशयस्योपदेशस्य प्रयोगस्य विरोधतः ।
उपस्तम्भस्य कालस्य यत्[1] हीनं हीनमेव तत् ॥ १० ॥

कथं विरुद्धं । पञ्चभिर्विरोधैः । आशयोपदेशप्रयोगउपस्तम्भकालविरोधैः । श्रावकयाने ह्यात्मपरिनिर्वाणायैवाशयस्तदर्थमेवोपदेशस्तदर्थमेव प्रयोगः परीत्तश्च पुण्यज्ञानसंभारसंगृहीत उपस्तम्भः कालेन चाल्पेन तदर्थप्राप्तिर्यावत्त्रिभिरपि जन्मभिः । महायाने तु सर्वं विपर्ययेण । तस्मादन्योन्यविरोधाद्यद्यानं हीनं हीनमेव तत् । न तन्महायानं भवितुमर्हति । बुद्धवचनस्येदं लक्षणं यत्सूत्रे ऽवतरति विनये संदृश्यते धर्मतां च न विलोमयति[2] । न चैवं महायानं

(1) *Sic* ms.

(2) *Vilomayati*, si le texte est correct, est un mot nouveau, dénominatif tiré régulièrement de l'adj. *viloma*. Le chinois traduit : *wei*, «s'éloigner de...».



सर्वधर्मनिःस्वभावत्वोपदेशात् । तस्मान्न बुद्धवचनमिति कस्यचित्स्यादतो लक्षणाविरोधे श्लोकः ।

स्वके ऽवतारात्स्वस्यैव विनये दर्शनादपि ।
औदार्यादपि गाम्भीर्यादविरुद्धैव धर्मता ॥ ११ ॥

अनेन श्लोकेन किं दर्शयति । अवतरत्येवेदं स्वस्मिन् महायानसूत्रे स्वस्य च क्लेशस्य विनयः संदृश्यते । यो महायाने बोधिसत्वानां क्लेश उक्तः । विकल्पक्लेशा हि बोधिसत्वाः । औदार्यगाम्भीर्यलक्षणत्वाच्च । न धर्मतां विलोमयत्येव[1] हि धर्मता महाबोधिप्राप्तये तस्मान्नास्ति लक्षणविरोधः । अगोचरादित्युक्तमतस्तर्कगोचरत्वायोगे श्लोकः ।

निश्रितो ऽनियतो ऽव्यापी सांवृतः खेदवानपि ।
बालाश्रयो मतस्तर्कस्तस्यातो विषयो न तत् ॥ १२ ॥

अदृष्टसत्याश्रयो हि तर्कः कश्चिदागमनिश्रितो भवति । अनियतश्च भवति कालान्तरेणान्यथाप्रत्यवगमात्[2] । अव्यापी च न सर्वज्ञेयविषयः । संवतिसत्यविषयश्च न परमार्थविषयः । खेदवांश्च प्रतिभानपर्यादानात्[3] । महायान तु न निश्रितं यावदखेदवत् । शतसाहस्रिकाद्यनेकसूत्रोपदेशात् । अतो न तर्कस्य तद्विषयः । अनुपायत्वात् श्रावकयाने न बुद्धत्वं प्राप्तमित्युक्तमथ महायानं कथमुपायो युक्त इत्युपायत्वयोगे श्लोकः ।

औदार्यादपि गाम्भीर्यात्परिपाको ऽविकल्पना ।
देशनातो द्वयस्यास्मिन् स चोपायो निरुत्तरे ॥ १३ ॥

अनेन श्लोकेन किं दर्शयति । प्रभावौदार्यदेशनया सत्वानां परिपाकः प्रभावाधिमुक्तितो घटनात् । गाम्भीर्यदेशनया अविकल्पना अत एतस्य द्वयस्यास्मिन् महायाने देशना स चोपायो निरुत्तरे ज्ञाने ताभ्यां यथाक्रमं

(1) Ex conj. Ms. : विरोधत्य°. Le chinois donne ici encore le caractère *wei*, «s'éloigner», comme ci-dessus.

(2) *Pratyavagama*, mot nouveau : «entente respective». Le chinois traduit : «En tel ou tel temps on comprend autrement».

(3) *Paryādāna*. Cf. Çikṣā-samuccaya, Index II, s. v. Le chinois traduit : *me-jen*, «devenir silencieux».

सत्वानां परिपाचनादात्मनश्च बुद्धधर्मपरिपाकादिति। ये पुनरस्मात् त्रसन्ति तदर्थमस्थानत्रासादीनवे कारणत्वेन श्लोकः।

तदस्थानत्रासो भवति जगतां दाहकरणो
महापुण्यस्कन्धप्रसवकरणाद्दीर्घसमयं।
अगोत्रो ऽसन्मित्रो ऽकृतमतिरपूर्वाचितशुभ-
स्त्रसत्यस्मिन् धर्मे पतति महतो ऽर्थाद्गत इह॥ १४ ॥[1]

त्रासास्थाने त्रासस्तदस्थानत्रासः। दाहकरणो भवत्यपायेषु किं कारणं। महतो अपुण्यस्कन्धप्रसवस्य करणात्। कियन्तं कालमिति दीर्घसमयं। एवं पश्चादादीनवः। येन च कारणेन यावन्तं च कालं तत् संदर्शयति। किं पुनः कारणे तु सतीति चतुर्विधं त्रासकारणं दर्शयति। गोत्रं चास्य न भवति सन्मित्रं वा अव्युत्पन्नमतिर्वा भवति महायानधर्मतायां पूर्वं वानुपचितशुभो भवति। पतति महतो ऽर्थादिति। महाबोधिसंभारार्थात्। अप्राप्तपरिहाणितो ऽपरमादीनवं दर्शयति। त्रासकारणमुक्तमत्रासकारणं वक्तव्यमित्यत्रासकारणत्वे श्लोकः।

तदन्यान्याभावात्परमगहनत्वादनुगमात्[2]
विचित्रस्याख्यानाद्ध्रुवकथनयोगाद्बहुमुखात्।
यथाख्यानं नार्थाद्भगवति च भावातिगहनात्
न धर्मे ऽस्मिंस्त्रासो भवति विदुषां योनिविचयात्॥ १५ ॥

तदन्यान्याभावादिति ततो ऽन्यस्य महायानस्याभावात्। अथ श्रावकयानमेव महायानं स्यादन्यस्य श्रावकस्य प्रत्येकबुद्धस्य वाभावः स्यात्। सर्व एव हि बुद्धा भवेयुः। परमगहनत्वाच्च। सर्वज्ञज्ञानमार्गस्यानुगमाच्च तुल्यकालप्रवृत्त्या। विचित्रस्याख्यानात्। विचित्रश्चात्र संभारमार्ग आख्यायते न केवलं शून्यतैव। तस्मादभिप्रायिकेनानेन भवितव्यमिति। ध्रुवकथनयोगाद्बहुमुखादभीक्ष्णं चात्र शून्यता कथ्यते बहुभिश्च पर्यायैस्तेषु तेषु सूत्रान्तेषु तस्माद्भवितव्यमत्र महता प्रयोजनेन। अन्यथा हि सकृत्प्रतिषेधमात्रकृतमभविष्यदिति। यथाख्यानं नार्थात् न चास्य यथारुतमर्थो ऽस्मादपि त्रासो न युक्तः। भगवति च भावातिगहनादतिगहनश्च बुद्धानां भावो दुराज्ञेयस्तस्मान्नास्माभिस्तदज्ञाना-

(1) Mètre çikhariṇī jusqu'au vers 16. — (2) Le traducteur chinois a lu °दनुपमात् et rendu par *wou-p'i*, «sans comparaison».



त्त्रसितव्यमिति। एवं योनिशः प्रविचयाद्विदुषां त्रासो न भवति। दूरानुप्रविष्टज्ञानगोचरत्वे श्लोकः।

श्रुतं निश्रित्यादौ प्रभवति मनस्कार इह यो
मनस्काराज्ज्ञानं प्रभवति च तत्वार्थविषयं।
ततो धर्मप्राप्तिः प्रभवति च तस्मिन्मतिरतो
यदा प्रत्यात्मं सा कथमसति तस्मिन्व्यवसितिः ॥ १६ ॥

श्रुतं निश्रित्यादौ मनस्कारः प्रभवति यो योनिश इत्यर्थः। योनिशो मनस्कारात्तत्वार्थविषयं ज्ञानं प्रभवति लोकोत्तरा सम्यग्दृष्टिस्ततस्तत्फलस्य धर्मस्य प्राप्तिस्ततस्तस्मिन् प्राप्ते मतिर्विमुक्तिज्ञानं प्रादुर्भवति। एवं यदा प्रत्यात्मं सा मतिर्भवति। कथमसति तस्मिन्नेषा व्यवसितिर्निश्चयो भवति नैवेदं बुद्धवचनमिति। अत्रासपदस्थानत्वे श्लोकः।

अहं न बोद्धा न गभीरबोद्धा बुद्धो गभीरं किमतर्कगम्यं।
कस्माद्गभीरार्थविदां च मोक्ष इत्येतदुत्त्रासपदं न युक्तं॥ १७ ॥[1]

यदि तावदहमस्य न बोद्धेत्युत्त्रासपदं तन्न युक्तं। अथ बुद्धो ऽपि गम्भीरस्य पदार्थस्य न बोद्धा स किं गभीरं देशयिष्यतीत्युत्त्रासपदं तदयुक्तं। अथ गम्भीरं कस्मादतर्कगम्यमित्युत्त्रासपदं तन्न युक्तं। अथ कस्माद्गभीरार्थविदामेव मोक्षो न तार्किकाणामित्युत्त्रासपदं तन्न युक्तं। अनधिमुक्तित एव तत्सिद्धौ श्लोकः।

हीनाधिमुक्तेः सुनिहीनधातोर्हीनैः सहायैः परिवारितस्य।
औदार्यगाम्भीर्यसुदेशिते ऽस्मिन्धर्मे ऽधिमुक्तिर्यदि नास्ति सिद्धं॥ १८ ॥

यस्य हीना चाधिकमुक्तिस्ततश्च हीन एव धातुः समुदागत आलयविज्ञानभावना। हीनैरेव सहायैः समानाधिमुक्तिधातुकैर्यः परिवारितस्तस्यास्मिन्नौदार्यगाम्भीर्यसुदेशिते महायानधर्मे यद्यधिमुक्तिर्नास्ति अत एव सिद्धमुत्कृष्टमिदं महायानमिति। अश्रुतसूत्रान्तप्रतिक्षेपायोगे श्लोकः।

श्रुतानुसारेण हि बुद्धिमत्तां लब्ध्वा श्रुते यः प्रकरोत्यवज्ञां।
श्रुते विचित्रे सति चाप्रमेये शिष्टे कुतो निश्चयमेति मूढः ॥ १९ ॥

कामं तावदधिमुक्तिर्न स्यादश्रुतानां तु सूत्रान्तानामविशेषेण प्रतिक्षेपो न

(1) Mètre upajāti jusqu'au vers 21.

युक्तः । श्रुतानुसारेणैव हि बुद्धिमत्त्वं लब्ध्वा यः श्रुत एवावज्ञां करोति मूढः स सत्येवावशिष्टे श्रुते विचित्रे चाप्रमेये च कुतः कारणान्निश्चयमेति न तद् बुद्धवचनमिति । न हि तस्य श्रुतादन्यद्बलमस्ति तस्मादश्रुत्वा प्रतिक्षेपो न युक्तः । यदपि च श्रुतं तद्योनिशो मनसि कर्तव्यं नायोनिश इत्ययोनिशोमनसिकारादीनवे श्लोकः ।

यथारुते ऽर्थे परिकल्प्यमाने स्वप्रत्ययो हानिमुपैति बुद्धेः ।
स्वाख्याततां च क्षिपति क्षतिं च प्राप्नोति धर्मे प्रतिघावतीव ॥ २० ॥

स्वप्रत्यय इति स्वयंदृष्टिपरामर्षको न विज्ञानामन्तिकादर्थपर्येषी । हानिमुपैति बुद्धेरिति यथाभूतज्ञानादप्राप्तिपरिहानितः । धर्मस्य च स्वाख्याततां प्रतिक्षिपति तन्निदानं चापुण्यप्रभावात् क्षतिं प्राप्नोति । धर्मे च प्रतिघातमावरणं च धर्मव्यसनसंवर्तनीयं कर्मेत्ययमत्रादीनवः । अयथावतत्त्वार्थमविजानतो ऽपि प्रतिघातो न युक्त इति प्रतिघातायोगे श्लोकः ।

मनःप्रदोषः प्रकृतिप्रदुष्टो . . . . . .[1] ह्ययुक्तरूपः ।
प्रागेव संदेहगतस्य धर्मे तस्मादुपेक्षैव वरं ह्यदोषा ॥ २१ ॥

प्रकृतिप्रदुष्ट इति प्रकृतिसावद्यः । तस्मादुपेक्षैव वरं । कस्मात् । सा ह्यदोषा । प्रतिघातस्तु सदोषः ।

महायानसूत्रालंकारे महायानसिद्ध्यधिकारः प्रथमः

## II

शरणगमनविशेषसंग्रहश्लोकः ।

रत्नानि यो हि शरणप्रगतो ऽत्र याने
ज्ञेयः स एव परमः शरणगतानां ।
सर्वत्रगाभ्युपगमाधिगमाभिभूति-
भेदैश्चतुर्विधमयार्थविशेषणेन ॥ १ ॥[2]

स एव परमः शरणं गतानामिति । केन कारणेन । चतुर्विधस्वभावार्थविशेषणेन । चतुर्विधो ऽर्थः सर्वत्रगाभ्युपगमाधिगमाभिभूतिभेदतो वेदितव्यः ।

(1) Omission de six syllabes : - - ᴗ - - ᴗ. — (2) Mètre vasantatilakā.



सर्वत्रगार्थः । अभ्युपगमार्थः । अधिगमार्थः । अभिभवार्थः । ते पुनरुत्तरत्र निर्देक्ष्यन्ते । तथाप्यत्र शरणप्रगतानां बहुदुष्करकार्यत्वात् केचिन्नोत्सहन्ते । श्लोकः ।

यस्मादादौ दुष्कर एष व्यवसायो
दुःसाधो ऽसौ नैकसहस्रैरपि कल्पैः ।
सिद्धो यस्मात्सत्वहिताधानमहार्थ-
स्तस्मादग्रे यान इहाग्रशरणार्थः ॥ २ ॥[1]

एतेन तस्य शरणगमनव्यवसायस्य प्रणिधानप्रतिपत्तिविशेषाभ्यां यशोहेतुत्वं दर्शयति । फलप्राप्तिविशेषेण महार्थत्वं । पूर्वाधिकृते सर्वत्रगार्थे श्लोकः ।

सर्वान् सत्वांस्तारयितुं यः प्रतिपन्नो
याने ज्ञाने सर्वगते कौशल्ययुक्तः ।
यो निर्वाणे संसरणे ऽप्येकरसो ऽसौ[2]
ज्ञेयो धीमानेष हि सर्वत्रग एवं ॥ ३ ॥

एतेन चतुर्विधं सर्वत्रगार्थं[3] . . . . . . . . . . . . . . . . . . . . . .
. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .
. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .
. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .
. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

असांकेतिकं धर्मताप्रातिलम्भिकं चेति प्रभेदलक्षणा प्रवृत्तिरौदारिकसूक्ष्मप्रभेदेन । शरणप्रतिपत्तिविशेषणे श्लोकः ।

शरणगतिमिमां गतो महार्थां गुणगणवृद्धिमुपैति सो ऽप्रमेयां ।
स्फुरति जगदिदं कृपाशयेन प्रथयति चाप्रतिमं महार्थधर्मं ॥ १२ ॥[4]

अत्र शरणगमनस्यां महार्थतां स्वपरार्थप्रतिपत्तिभ्यां दर्शयति । स्वार्थप्रति-

(1) Mètre mattamayūra jusqu'au vers 3.

(2) Ex conj. Le ms. donne संसृ-श्रान्त्येकरसो ऽसौ·

(3) Ici commence dans le manuscrit original une lacune de deux feuillets, dissimulée et comblée au moyen d'un passage emprunté à quelque çāstra, mais dont je n'ai pu déterminer exactement la provenance. On trouvera ce passage à l'Appendice. La version chinoise montre que la lacune correspond à huit vers de notre texte, avec le commentaire afférent.

(4) Mètre puṣpitāgrā.

पत्तिः पुनर्बह्वप्रकारा ऽप्रमेयगुणवृद्ध्या । अप्रमेयत्वं तर्कसंख्याकालाप्रमेयतया वेदितव्यं । न हि सा गुणवृद्धिस्तर्केण प्रमेया न संख्यया न कालेनात्यन्तिकत्वात् । परार्थप्रतिपत्तिराशयतश्च करुणास्फुरणेन प्रयोगतश्च महायानधर्मप्रथनेन । महायानं हि महार्यदृशां धर्मः ।

महायानसूत्रालंकारे शरणगमनाधिकारो द्वितीयः

## III

गोत्रप्रभेदसंग्रहश्लोकः

सत्त्वाग्रत्वं स्वभावश्च लिङ्गं गोत्रप्रभेदता ।
आदीनवो ऽनुशंसश्च द्विधौपम्यं चतुर्विधा ॥ १ ॥[1]

अनेन गोत्रस्यास्तित्वमग्रत्वं स्वभावो लिङ्गं प्रभेद आदीनवो ऽनुशंसो द्विधौपम्यं चेत्येष प्रभेदः संगृहीतः । एते च प्रभेदाः प्रत्येकं चतुर्विधाः । अनेन गोत्रास्तित्वविभागे श्लोकः ।

धातूनामधिमुक्तेश्च प्रतिपत्तेश्च भेदतः ।
फलभेदोपलब्धेश्च गोत्रास्तित्वं निरूप्यते ॥ २ ॥

नानाधातुकत्वात्सत्त्वानामपरिमाणो धातुप्रभेदो यथोक्तमक्षराशिसूत्रे[2] । तस्मादेवंजातीयको ऽपि धातुभेदः प्रत्येतव्य इति । अस्ति यानत्रये गोत्रभेदः । अधिमुक्तिभेदो ऽपि सत्त्वानामुपलभ्यते प्रथमत एव कस्यचित् क्वचिदेव याने ऽधिमुक्तिर्भवति सो ऽन्तरेण गोत्रभेदं न स्यात् । उत्पादितायामपि च प्रत्ययवशेनाधिमुक्तौ प्रतिपत्तिभेद उपलभ्यते कश्चिन्निर्वोढा भवति कश्चिन्नेति सो ऽन्तरेण गोत्रप्रभेदं न स्यात् । फलभेदश्चोपलभ्यते हीनमध्यविशिष्टा बोधयः

(1) Mètre anuṣṭubh jusqu'au v. 10.

(2) Le ms. porte ग्रक्षराशिस्वत्रे. Le chinois dit : «Le sūtra (*siu-to-lo*) des dhātus nombreux» (= Bahudhātuka-sūtra). La collection chinoise et la tibétaine ne renferment pas de sūtra spécial portant ce titre; cependant le Bahudhātuka-sūtra est expressément cité dans l'Abhidharma-koça sur I, 27.



सो ऽन्तरेण गोत्रभेदं न स्यात् बीजानुरूपत्वात् फलस्य । अग्रत्वविभागे श्लोकः ।

उदग्रत्वे ऽथ सर्वत्वे महार्थत्वे ऽक्षयाय च ।
शुभस्य तन्निमित्तत्वात् गोत्राग्रत्वं विधीयते ॥ ३ ॥

अत्र गोत्रस्य चतुर्विधेन निमित्तत्वेनाग्रत्वं दर्शयति । तद्धि गोत्रं कुशलमूलानामुदग्रत्वे निमित्तं सर्वत्वे महार्थत्वे अक्षयत्वे च । न हि श्रावकाणां तथोदग्राणि कुशलमूलानि न च सर्वाणि सन्ति बलवैशारद्याद्यभावात् । न च महार्थान्यपरार्थत्वात् । न चाक्षयाण्यनुपधिशेषनिर्वाणावसानत्वात् । लक्षणविभागे श्लोकः ।

प्रकृत्या परिपुष्टं च आश्रयश्चाश्रितं च तत् ।
सदसच्चैव विज्ञेयं गुणोत्तारणतार्थतः ॥ ४ ॥

एतेन चतुर्विधं गोत्रं दर्शयति । प्रकृतिस्थं समुदानीतमाश्रयस्वभावमाश्रितस्वभावं च तदेव यथाक्रमं । तत्पुनर्हेतुभावेन सत् फलभावेनासत् । गुणोत्तारणार्थेन गोत्रं वेदितव्यं गुणा उत्तरन्त्यस्मादुद्भवन्तीति कृत्वा । लिङ्गविभागे श्लोकः ।

कारुण्यमधिमुक्तिश्च क्षान्तिश्चादिप्रयोगतः ।
समाचारः शुभस्यापि गोत्रे लिङ्गं निरूप्यते ॥ ५ ॥

चतुर्विधं लिङ्गं बोधिसत्त्वगोत्रे । आदिप्रयोगत एव कारुण्यं सत्त्वेषु । अधिमुक्तिर्महायानधर्मे । क्षान्तिर्दुष्करचर्यायां सहिष्णुतार्थेन । समाचारश्च पारमितामयस्य कुशलस्येति । प्रभेदविभागे श्लोकः ।

नियतानियतं गोत्रमहार्यं हार्यमेव च ।
प्रत्ययैर्गोत्रभेदो ऽयं समासेन चतुर्विधः ॥ ६ ॥

समासेन चतुर्विधं गोत्रं नियतानियतं तदेव यथाक्रमं प्रत्ययैरहार्यं हार्यं चेति । आदीनवविभागे श्लोकः ।

क्लेशाभ्यासः कुमित्रत्वं विघातः परतन्त्रता ।
गोत्रस्यादीनवो ज्ञेयः समासेन चतुर्विधः ॥ ७ ॥

बोधिसत्त्वगोत्रे समासेन चतुर्विध आदीनवः येन गोत्रस्थो ऽगुणेषु प्रवर्तते ।

क्लेशबाहुल्यं । अकल्याणमित्रता । उपकरणविघातः । पारतन्त्र्यं च । अनुशंसविभागे श्लोकः ।

चिरादपायगमनमाशुमोक्षश्च तत्र च ।
तनुदुःखोपसंवित्तिः सोद्वेगा सत्वपाचना ॥ ८ ॥

चतुर्विधो बोधिसत्वस्य गोत्रे ऽनुशंसः । चिरेणापायान् गच्छति । क्षिप्रं च तेभ्यो मुच्यते । मृदुकं च दुःखं तेषूपपन्नः प्रतिसंवेदयते । संविग्नचेतास्तदुपपन्नांश्च सत्वान्करुणायमानः परिपाचयति । महासुवर्णगोत्रौपम्ये श्लोकः ।

सुवर्णगोत्रवत् ज्ञेयममेयशुभताश्रयः ।
ज्ञाननिर्मलतायोगप्रभावाणां च निश्रयः ॥ ९ ॥

महासुवर्णगोत्रं हि चतुर्विधस्य सुवर्णस्याश्रयो भवति । प्रभूतस्य प्रभास्वरस्य निर्मलस्य कर्मण्यस्य च । तत्साधर्म्येण बोधिसत्वगोत्रमप्रमेयकुशलमूलाश्रयः । ज्ञानाश्रयः । क्लेशनैर्मल्यप्राप्त्याश्रयः । अभिज्ञादिप्रभावाश्रयश्च । तस्मान्महासुवर्णगोत्रोपमं वेदितव्यं । महारत्नगोत्रौपम्ये श्लोकः ।

सुरत्नगोत्रवत् ज्ञेयं महाबोधिनिमित्ततः ।
महाज्ञानसमाध्यार्यमहासत्वार्थनिश्रयात् ॥ १० ॥

महारत्नगोत्रं हि चतुर्विधरत्नाश्रयो भवति । जात्यस्य वर्णसंपन्नस्य संस्थानसंपन्नस्य प्रमाणसंपन्नस्य च । तदुपमं बोधिसत्वगोत्रं वेदितव्यं महाबोधिनिमित्तत्वात् महाज्ञाननिमित्तत्वादार्यसमाधिनिमित्तत्वात् चित्तस्य हि संस्थितिः समाधिः महासत्वपरिपाकनिमित्तत्वाच्च बहुसत्वपरिपाचनात् । अगोत्रस्थविभागे श्लोकः ।

ऐकान्तिको दुश्चरिते ऽस्ति कश्चित्
कश्चित् समुद्घातितशुक्लधर्मा ।
अमोक्षभागीयशुभो ऽस्ति कश्चिन्
निहीनशुक्लो ऽस्त्यपि हेतुहीनः ॥ ११ ॥[1]

अपरिनिर्वाणधर्मक एतस्मिन्नगोत्रस्थो ऽभिप्रेतः । स च समासतो द्विविधः । तत्कालापरिनिर्वाणधर्मा अत्यन्तं च । तत्कालापरिनिर्वाणधर्मा चतुर्विधः । दुश्चरितैकान्तिकः समुच्छिन्नकुशलमूलः । अमोक्षभागीयकुशलमूलः । हीन-

(1) Mètre upajāti.



कुशलमूलश्चापरिपूर्णसंभारः । अत्यन्तापरिनिर्वाणधर्मा तु हेतुहीनो यस्य परिनिर्वाणगोत्रमेव नास्ति । प्रकृतिपरिपुष्टगोत्रमाहात्म्ये श्लोकः ।

गाम्भीर्यौदार्यवादे परहितकरणायोदिते दीर्घधर्मे
अज्ञात्वैवाधिमुक्तिर्भवति सुविपुला संप्रपत्तिक्षमा च ।
संपत्तिश्चावसाने द्वयगतपरमा यद्भवत्येव तेषां
तज्ज्ञेयं बोधिसत्वप्रकृतिगुणवतस्तत्प्रपुष्टाच्च गोत्रात् ॥ १२ ॥[1]

यद्गाम्भीर्यौदार्यवादिनि परहितक्रियार्थमुक्ते विस्तीर्णे महायानधर्मे गाम्भीर्यौदार्यार्थमज्ञात्वैवाधिमुक्तिर्विपुला भवति । प्रतिपत्तौ चोत्साहः[2] संपत्तिश्चावसाने महाबोधिर्द्वयगतायाः संपत्तेः परमा तत्प्रकृत्या गुणवतः परिपुष्टस्य च बोधिसत्वगोत्रस्य माहात्म्यं वेदितव्यं । द्वयगता इति द्वये लौकिकाः श्रावकाश्च । परमेति विशिष्टा । फलतो गोत्रविशेषणे श्लोकः ।

सुविपुलगुणबोधिवृक्षवृद्ध्यै
घनसुखदुःखशमोपलब्धये च ।
स्वपरहितसुखक्रियाफलत्वाद्
भवति ˘- समुदग्रगोत्रमेतत् ॥ १३ ॥[3]

स्वपरहितफलस्य बोधिवृक्षस्य प्रशस्तमूलत्वमनेन बोधिसत्वगोत्रं संदर्शितं ।

महायानसूत्रालंकारे गोत्राधिकारस्तृतीयः

## IV

चित्तोत्पादलक्षणे श्लोकः ।

महोत्साहा महारम्भा महार्थाथ महोदया ।
चेतना बोधिसत्वानां द्वयार्था चित्तसंभवः ॥ १ ॥[4]

महोत्साहा संनाहवीर्येण गम्भीरदुष्करदीर्घकालप्रतिपत्त्योत्सहनात् । महारम्भा यथासंनाहप्रयोगवीर्येण । महार्था आत्मपरहिताधिकारात् । महोदया

(1) Mètre sragdharā.

(2) Ex conj. Ms. : चाषदः. Le chinois traduit : *jen*, «patience».

(3) Mètre puṣpitāgrā. Il manque un iambe après *bhavati*, au quatrième pāda.

(4) Mètre anuṣṭubh jusqu'au vers 6.

महाबोधिसमुदागमत्वात् । सो ऽयं त्रिविधो गुणः परिदीपितः पुरुषकारगुणो द्वाभ्यां पदाभ्यामर्थक्रियागुणः फलपरिग्रहगुणश्च द्वाभ्यां । द्वयार्था महाबोधिसत्वार्थक्रियालम्बनत्वात् । इति त्रिगुणा द्वयालम्बना च चेतना चित्तोत्पाद इत्युच्यते । चित्तोत्पादप्रभेदे श्लोकः ।

चित्तोत्पादो ऽधिमोक्षो ऽसौ शुद्धाध्याशयिको ऽपरः ।
वैपाक्यो [1] भूमिषु मतस्तथावरणवर्जितः ॥ २ ॥

चतुर्विधो बोधिसत्वानां चित्तोत्पादः । आधिमोक्षिको [1] ऽधिमुक्तिचर्याभूमौ । शुद्धाध्याशयिकः सप्तसु भूमिषु । वैपाकिको [1] ऽष्टम्यादिषु । अनावरणिको बुद्धभूमौ । चित्तोत्पादविनिश्चये चत्वारः श्लोकाः ।

करुणामूल इष्टो ऽसौ सदासत्वहिताशयः ।
धर्माधिमोक्षस्तज्ज्ञानपर्येष्ट्यालम्बनस्तथा ॥ ३ ॥
उत्तरच्छन्दयानो ऽसौ प्रतिष्ठा शीलसंवृतिः ।
उत्थापना विपक्षस्य परिपन्थो [1] ऽधिवासना ॥ ४ ॥
शुभवृद्ध्यनुशंसो ऽसौ पुण्यज्ञानमयः स हि ।
सदापारमितायोगनिर्याणश्च स कथ्यते ॥ ५ ॥
भूमिपर्यवसानो ऽसौ प्रतिस्वं तत्प्रयोगतः ।
विज्ञेयो बोधिसत्वानां चित्तोत्पादविनिश्चयः ॥ ६ ॥

तथायं विनिश्चयः । किंमूल एष चतुर्विधो बोधिसत्वानां चित्तोत्पादः किमाशयः किमधिमोक्षः किमालम्बनः कियानः किंप्रतिष्ठः किमादीनवः किमनुशंसः किंनिर्याणः किंपर्यवसान इति । आह । करुणामूलः । सदासत्वहिताशयः । महायानधर्माधिमोक्षः । तज्ज्ञानपर्येष्ट्याकारेण तज्ज्ञानालम्बनात् । उत्तरोत्तरच्छन्दयानः । बोधिसत्वशीलसंवरप्रतिष्ठः । परिपन्थ आदीनवः । कः पुनस्तत्परिपन्थो विपक्षस्यान्ययानचित्तस्योत्थापना ऽधिवासना वा । पुण्यज्ञानमयकुशलधर्मवृद्ध्यनुशंसः । सदापारमिताभ्यासनिर्याणः । भूमिपर्यवसानश्च प्रतिस्वं भूमिप्रयोगात् । यस्यां भूमौ यः प्रयुक्तस्तस्य तद्भूमिपर्यवसानः । समादानसांकेतिकचित्तोत्पादे श्लोकः ।

मित्रबलात् हेतुबलान्मूलबलाच्छ्रुतबलाच्छुभाभ्यासात् ।
अदृढदृढोदय उक्तश्चित्तोत्पादः पराख्यानात् ॥ ७ ॥ [2]

(1) *Vaipākya, ādhimokṣika, vaipākika, paripantha,* mots nouveaux. — (2) Mètre āryā jusqu'au vers 20.



यो हि पराख्यानाच्चित्तोत्पादः परविज्ञापनात्स उच्यते समादानसांकेतिकः । स पुनर्मित्रबलाद्वा भवति कल्याणमित्रानुरोधात् । हेतुबलाद्वा गोत्रसामर्थ्यात् । कुशलमूलाद्वातीतपुष्टितः [1] । श्रुतबलाद्वा तत्र तत्र धमपर्याये भाष्यमाणे बहूनां बोधिचित्तोत्पादात् । शुभाभ्यासाद्वा दृष्ट इव धर्मे सततश्रवणोद्ग्रहणधारणादिभिः । स पुनर्मित्रबलाददृढोदयो वेदितव्यः । हेत्वादिबलाद् दृढोदयः । पारमार्थिकचित्तोत्पादे सप्त श्लोकाः ।

सूपासितसंबुद्धे सुसंभृतज्ञानपुण्यसंभारे ।
धर्मेषु निर्विकल्पज्ञानप्रसवात्परमतास्य ॥ ८ ॥
धर्मेषु च सत्वेषु च तत्कृत्येषूत्तमे च बुद्धत्वे ।
समचित्तोपालम्भात्प्रामोद्यविशिष्टता तस्य ॥ ९ ॥
जन्मौदार्यं तस्मिन्नुत्साहः शुद्धिराशयस्यापि ।
कौशल्यं परिशिष्टे निर्याणं चैव विज्ञेयं ॥ १० ॥
धर्माधिमुक्तिबीजात्पारमिताश्रेष्ठमातृतो जातः ।
ध्यानमये सुखगर्भे करुणा संवर्धिका धात्री ॥ ११ ॥
औदार्यं विज्ञेयं प्रणिधानमहादशाभिनिर्हारात् ।
उत्साहो बोद्धव्यो दुष्करदीर्घाधिकाखेदात् ॥ १२ ॥
आसन्नबोधिबोधात्तदुपायज्ञानलाभतश्चापि ।
आशयशुद्धिर्ज्ञेया कौशल्यं त्वन्यभूमिगतं ॥ १३ ॥
निर्याणं विज्ञेयं यथाव्यवस्थानमनसिकारेण ।
तत्कल्पनताज्ञानादविकल्पनया च तस्यैव ॥ १४ ॥

प्रथमेन श्लोकेनोपदेशप्रतिपत्त्यधिगमविशेषैः पारमार्थिकत्वं चित्तोत्पादस्य दर्शयति । स च पारमार्थिकश्चित्तोत्पादः प्रमुदितायां भूमाविति । प्रामोद्यविशिष्टतायास्तत्र कारणं दर्शयति । तत्र धर्मेषु समचित्तता धर्मनैरात्म्यप्रतिबोधात् । सत्वेषु समचित्तता आत्मपरसमतोपगमात् । सत्वकृत्येषु समचित्तता आत्मन इव तेषां दुःखक्षयाकाङ्क्षणात् । बुद्धत्वे समचित्तता तद्धर्मधातोरात्मन्यभेदप्रतिबोधात् । तस्मिन्नेव च पारमार्थिकचित्तोत्पादे षडर्था वेदितव्याः । जन्म औदार्यमुत्साह आशयशुद्धिः परिशिष्टकौशल्यं निर्याणं च । तत्र जन्म बीजमातृगर्भधात्रीविशेषाद्वेदितव्यं । औदार्यं दशमहाप्रणिधानाभिनिर्हारात् । उत्साहो दीर्घकालिकदुष्कराखेदात् । आशयशुद्धिरासन्नबोधिज्ञानात्तदुपा-

(1) Ex conj. Ms. : °हृतत्ता (?) पु°. Le chinois traduit : «Par suite de ce que les actes du passé accompli ont leurs racines de bien en plénitude».

यज्ज्ञानलाभाच्च । परिशिष्टकौशल्यमन्यासु भूमिषु कौशल्यं । निर्याणं यथाव्यवस्थानभूमिमनसिकारेण । कथं मनसिकारेण तस्य भूमिव्यवस्थानस्य कल्पनाज्ञानात्कल्पनामात्रमेतदिति । तस्यैव च कल्पनाज्ञानस्याविकल्पनात् । औपम्यमाहात्म्ये षट् श्लोकाः ।

पृथिवीसम उत्पादः कल्याणसुवर्णसंनिभश्चान्यः ।
शुक्लनवचन्द्रसदृशो वह्निप्रख्यो ऽपरोऽवगन्तव्यः ॥ १५ ॥
भूयो महानिधानवदन्यो रत्नाकरो यथैवान्यः ।
सागरसदृशो ज्ञेयो वज्रप्रख्यो ऽचलेन्द्रनिभः ॥ १६ ॥
भैषज्यराजसदृशो महासुहृत्संनिभो ऽपरो ज्ञेयः ।
चिन्तामणिप्रकाशो दिनकरसदृशो ऽपरो ज्ञेयः ॥ १७ ॥
गन्धर्वमधुरघोषवदन्यो राजोपमो ऽपरो ज्ञेयः ।
कोष्ठागारप्रख्यो महापथसमस्तथैवान्यः ॥ १८ ॥
यानसमो विज्ञेयो गन्धर्वसमश्च वेतसगप्रभवः ।
आनन्दशब्दसदृशो महानदीस्रोतसदृशश्च ॥ १९ ॥
मेघसदृशश्च कथितश्चित्तोत्पादो जिनात्मजानां हि ।
तस्मात्तथा गुणाढ्यं चित्तं मुदितैः समुत्पाद्यं ॥ २० ॥

प्रथमचित्तोत्पादो बोधिसत्वानां पृथिवीसमः सर्वबुद्धधर्मतत्संभारप्रसवस्य प्रतिष्ठाभूतत्वात् । आशयसहगतश्चित्तोत्पादः कल्याणसुवर्णसदृशो हितसुखाध्याशयस्य विकाराभजनात् । प्रयोगसहगतः शुक्लपक्षनवचन्द्रोपमः कुशलधर्मवृद्धिगमनात् । अध्याशयसहगतो वह्निसदृश इन्धनाकरविशेषेणेवाग्निस्तस्योत्तरोत्तरविशेषाधिगमनात् । विशेषाधिगमाशयो ह्यध्याशयः । दानपारमितासहगतो महानिधानोपम आमिषसंभोगेनाप्रमेयसत्वसंतर्पणादक्षयत्वाच्च । शीलपारमितासहगतो रत्नाकरोपमः सर्वगुणरत्नानां ततः प्रसवात् । क्षान्तिपारमितासहगतः सागरोपमः सर्वानिष्टोपनिपातैरक्षोभ्यत्वात् । वीर्यपारमितासहगतो वज्रोपमो दृढत्वादभेद्यतया । ध्यानपारमितासहगतः पर्वतराजोपमो निष्कम्पत्वादविक्षेपतः । प्रज्ञापारमितासहगतो भैषज्यराजोपमः सर्वक्लेशज्ञेयावरणव्याधिप्रशमनात् । अप्रमाणसहगतो महासुहृत्संनिभः सर्वावस्थं सत्वानुपेक्षकत्वात् । अभिज्ञासहगतश्चिन्तामणिसदृशो यथाधिमोक्षं तत्फलसमृद्धेः । संग्रहवस्तुसहगतो दिनकरसदृशो विनेयसस्यपरिपाचनात् । प्रतिसंवित्सहगतो गन्धर्वमधुरघोषोपमो विनेयावर्जकधर्मदेशकत्वात् । प्रतिशरणसहगतो महाराजोपमो ऽविप्रणाशहेतुत्वात् । पुण्यज्ञानसंभारसहगतः कोष्ठागारोपमो बहुपुण्यज्ञानसंभारकोषस्थानत्वात् । बोधिपक्षसहगतो महाराजपथोपमः सर्वार्य-



पुद्गलयातानुयातत्वात्[1] । शमथविपश्यनासहगतो यानोपमः सुखवहनात् । धारणीप्रतिभानसहगतो गन्धर्वोपमः उदकधारणाक्षयोद्भेदसाधर्म्येण श्रुताश्रुतधर्मार्थधारणाक्षयोद्भेदतः । धर्मोद्दानसहगत आनन्दशब्दसदृशो मोक्षकामानां विनेयानां प्रियश्रावणात् । एकायनमार्गसहगतो नदीस्रोतःसमः स्वरसवाहित्वात् । अनुत्पत्तिकधर्मक्षान्तिलाभे एकायनत्वं तद्भूमिगतानां बोधिसत्वानामभिन्नकार्यक्रियात्वात् । उपायकौशल्यसहगतो मेघोपमः सर्वसत्वार्थक्रियातदधीनत्वात् तुषितभवनवासादिसंदर्शनतः । यथा मेघात्सर्वभाजनलोकसंपत्तयः । एष च द्वाविंशत्युपमश्चित्तोत्पाद आर्याक्षयमतिसूत्रे[2] ऽनुगतानुसारेणानुगन्तव्यः । चित्तानुत्पादपरिभाषायां श्लोकः ।

परार्थचित्तात्तदुपायलाभतो महाभिसंध्यर्थसुतत्वदर्शनात् ।
महार्हचित्तोदयवर्जिता जनाः शमं गमिष्यन्ति विहाय तत्सुखं ॥ २१ ॥[3]

तेन चित्तोत्पादेन वर्जिताः सत्वाश्चतुर्विधं सुखं न लभन्ते यद्बोधिसत्वानां परार्थचिन्तनात्सुखं । यच्च परार्थोपायलाभात् । यच्च महाभिसंध्यर्थसंदर्शनात् गम्भीरमहायानस्वतोभिप्रायिकार्थविबोधतः । यच्च परमतत्वस्य धर्मनैरात्म्यस्य संदर्शनात्सुखं । चित्तोत्पादप्रशंसायां दुर्गतिपरिखेदनिर्भयतामुपादाय श्लोकः ।

सहोदयाच्चित्तवरस्य धीमतः सुसंवृतं चित्तमनन्तदुष्कृतात् ।
सुखेन दुःखेन च मोदते सदा शुभी[4] कृपालुश्च विवर्धनद्वयं ॥ २२ ॥

तस्य चित्तवरस्य सहोदयाद्बोधिसत्वस्य सुसंवृतं चित्तं भवत्यनन्तसत्वाधि-

[1] Ex conj. Ms. : सर्वार्ययुतगलयातानुयातत्वात. Le chinois traduit : «Parce que les grands nobles vont devant, et le reste marche à la suite».

[2] L'Akṣayamati-sūtra est fréquemment cité dans le Çikṣā-samuccaya. Je n'ai pas retrouvé le passage correspondant dans l'Akṣayamati-nirdeça-sūtra traduit par Tchou Fa-hou entre 265 et 316 (Nanj. 74; éd. jap. de Tōkyō III, 5), ni dans la traduction de Tche-yen, qui se place entre 420 et 479 (Nanj. 77; éd. jap. III, 2) et qui forme les chapitres 27-30 du Mahā-saṃnipāta. J'ai retrouvé l'énumération de dix cittotpādas seulement, avec des termes de comparaisons analogues, dans l'Akṣayamati-paripṛcchā, qui forme le 45e chapitre du Ratnakūṭa (Nanj. 23, 45; éd. jap. II, 6 [p. 70a]), traduit par Bodhiruci entre 693 et 713.

[3] Mètre vaṃçasthā jusqu'au vers 23.

[4] *Çubhin*, mot nouveau : «qui a du *çubha-karman*».



IMPRIMERIE NATIONALE.

ष्ठानाद् दुष्कृतादतो ऽस्य दुर्गतितो भयं न भवति। स च द्वयं वर्धयन् शुभं च कर्म कृपां च नित्यं च शुभी भवति कृपालुश्च तेन सदा मोदते। सुखेनापि शुभित्वात्। दुःखेनापि परार्थक्रियानिमित्तेन कृपालुत्वात्। अतो ऽस्य बहुकर्तव्यतापरिखेदादपि भयं न भवति। अकरणसंवरलाभे श्लोकः।

यदानपेक्षः स्वशरीरजीविते परार्थमभ्येति परं परिश्रमं।
परोपघातेन तथाविधः कथं स दुष्कृते कर्मणि संप्रवत्स्यति ॥ २३ ॥

अस्य पिण्डार्थो यस्य पर एव प्रियतरो नात्मा परार्थं स्वशरीरजीविते निरपेक्षत्वात्। स कथमात्मार्थं परोपघातेन दुष्कृते कर्मणि प्रवत्स्यतीति। चित्ताव्यावृत्तौ श्लोकौ।

मायोपमान्वीक्ष्य स सर्वधर्मानुद्यानयात्रामिव चोपपत्तीः।
क्लेशाच्च दुःखाच्च बिभेति नासौ संपत्तिकाले ऽथ विपत्तिकाले ॥ २४ ॥[1]
स्वका गुणाः सत्वहिताच्च मोदः संचिन्त्यजन्मर्द्धिविकुर्वितं च।
विभूषणं भोजनमग्रभूमिः क्रीडारतिर्नित्यकृपात्मकानां ॥ २५ ॥[2]

मायोपमसर्वधर्मेक्षणात्स बोधिसत्वः संपत्तिकाले क्लेशेभ्यो न बिभेति। उद्यानयात्रोपमोपपत्तीक्षणात् विपत्तिकाले दुःखान्न बिभेति। तस्य कुतो भयाद्बोधिचित्तं व्यावर्तिष्यते। अपि च स्वगुणा मण्डनं बोधिसत्वानां। परहितात्प्रीतिर्भोजनं। संचिन्त्योपपत्तिरुद्यानभूमिः। ऋद्धिविकुर्वितं क्रीडारतिर्बोधिसत्वानामेवास्ति। नाबोधिसत्वानां। तेषां कथं चित्तं व्यावर्तिष्यते। दुःखत्रासप्रतिषेधे श्लोकः।

परार्थमुद्योगवतः कृपात्मनो ह्यवीचिरप्येति यतो ऽस्य रम्यतां।
कुतः पुनस्त्रस्यति तादृशो भवन् पराश्रयैर्दुःखसमुद्भवैर्भवे ॥ २६ ॥[3]

अपि च यस्य परार्थमुद्योगवतः करुणात्मकत्वादवीचिरपि रम्यः स कथं परार्थनिमित्तैर्दुःखोत्पादैर्भवे पुनस्त्रासमापत्स्यते। यतो ऽस्य दुःखात्त्रासः स्याच्चित्तस्य व्यावृत्तिर्भवति। सत्वोपेक्षाप्रतिषेधे श्लोकः।

महाकृपाचार्यसदोषितात्मनः परस्य दुःखैरुपतप्तचेतसः।
परस्य कृत्ये समुपस्थिते पुनः परैः समादापनतो ऽतिलज्जना[4] ॥ २७ ॥

(1) Mètre upendravajrā. — (2) Mètre upajāti. — (3) Mètre vaṃçasthā jusqu'au vers 27. — (4) *(Ati-)lajjanā*, mot nouveau, synonyme de *lajjā*.



यस्य महाकरुणाचार्येण नित्योषित आत्मा परदुःखैश्च दुःखितं चेतस्तस्योत्पन्ने परार्थे करणीये यदि परैः कल्याणमित्रैः समादापना कर्तव्या भवति अतिलज्जना। कौशीद्यपरिभाषायां श्लोकः।

शिरसि विनिहितोच्चसत्वभारः शिथिलगतिर्न हि शोभते ऽग्रसत्वः।
स्वपरविविधबन्धनातिबद्धः शतगुणमुत्सहमर्हति प्रकर्तुं ॥ २८ ॥[1]

शिरसि महान्तं सत्वभारं विनिधाय बोधिसत्वः शिथिलं पराक्रममाणो न शोभते शतगुणं हि स वीर्यं कर्तुमर्हति श्रावकवीर्यात् तथा हि स्वपरबन्धनैर्विविधैरत्यर्थं बद्धः क्लेशकर्मजन्मस्वभावैः।

महायानसूत्रालंकारे चित्तोत्पादाधिकारश्चतुर्थः

## V

प्रतिपत्तिलक्षणे श्लोकः।

महाश्रयारम्भफलोदयात्मिका जिनात्मजानां प्रतिपत्तिरिष्यते।
सदा महादानमहाधिवासना महार्थसंपादनकृत्यकारिका ॥ १ ॥[2]

तत्र महाश्रया चित्तोत्पादाश्रयत्वात्। महारम्भा स्वपरार्थारम्भात्। महाफलोदया महाबोधिफलत्वात्। अत एव यथाक्रमं महादाना सर्वसत्वोपादानात्। महाधिवासना सर्वदुःखाधिवासनात्। महार्थसंपादनकृत्यकारिका विपुलसत्वार्थसंपादनात्। स्वपरार्थनिर्विशेषत्वे श्लोकः।

परत्र लब्ध्वात्मसमानचित्ततां स्वतो ऽधि वा श्रेष्ठतरेष्टतां परे।
तथात्मनो ऽन्यार्थविशिष्टसंज्ञिनः स्वकार्थता का कतमा परार्थता ॥ २ ॥

परत्रात्मसमानचित्ततां लब्ध्वा ऽधिमुक्तितो वा सांकेतिकचित्तोत्पादलाभे ज्ञानतो वा पारमार्थिकचित्तोत्पादलाभे। आत्मतो वा पुनः परत्र विशिष्टतरामिष्टतां लब्ध्वा तेनैव च कारणेनात्मनः परार्थे विशिष्टसंज्ञिनो बोधि-

(1) Mètre puṣpitāgrā. — (2) Mètre vaṃçasthā jusqu'au vers 10.

सत्वस्य कः स्वार्थः परार्थो वा । निर्विशेषं हि तस्योभयमित्यर्थः । परार्थविशेषणे श्लोकः ।

परत्र लोको न तथातिनिर्दयः प्रवर्तते तापनकर्मणा रिपौ ।
यथा परार्थे भृशदुःखतापने कृपात्मकः स्वात्मनि संप्रवर्तते ॥ ३ ॥

यथा स्वात्मनः परार्थो विशिष्यते तत्साधयति परार्थमात्मनो ऽत्यर्थं संतापनात् । परार्थप्रतिपत्तिविभागे द्वौ श्लोकौ ।

निकृष्टमध्योत्तमधर्मतास्थिते सुदेशनावर्जनता ऽवतारणा ।
विनीतिरर्थे परिपाचना शुभे तथाववादस्थितिबुद्धिमुक्तयः ॥ ४ ॥
गुणैर्विशिष्टैः समुदागमस्तथा कुलोदयो व्याकरणाभिषिक्तता ।
तथागतज्ञानमनुत्तरं पदं परार्थ एष त्र्यधिको दशात्मकः ॥ ५ ॥

त्रिविधे सत्वनिकाये हीनमध्यविशिष्टगोत्रस्थे त्रयोदशविधो बोधिसत्वस्य परार्थः । सुदेशना ऽनुशासन्यादेशनाप्रतिहार्याभ्यां[1] । आवर्जना ऋद्धिप्रातिहार्येण । अवतारणा शासनाभ्युपगमनात् । विनीतिरर्थे ऽवतीर्णानां संशयच्छेदनं । परिपाचना कुशले । अववादश्चित्तस्थितिः । प्रज्ञा विमुक्तिः अभिज्ञादिभिर्विशेषकैर्गुणैः । समुदागमः । तथागतकुले जन्म । अष्टम्यां भूमौ व्याकरणं दशम्यामभिषेकश्च । सह तथागतज्ञानेनेत्येष त्रिषु गोत्रस्थेषु यथायोगं त्रयोदशविधः परार्थो बोधिसत्वस्य । परार्थप्रतिपत्तिसंपत्तौ श्लोकः ।

जनानुरूपाविपरीतदेशना निरुन्नता चाप्यममा विचक्षणा ।
क्षमा च दान्ता च सुदूरगा ऽक्षया जिनात्मजानां प्रतिपत्तिरुत्तमा ॥ ६ ॥

यथा ऽसौ परार्थप्रतिपत्तिः संपन्ना भवति तथा संदर्शयति । कथं चासौ संपन्ना भवति । यदि गोत्रस्थजनानुरूपा ऽविपरीता च देशना भवति । अनुन्नता चावर्जना । अममा चावतारणा । न ऋद्ध्या मन्यते न चावतारितान्सत्वान्ममायति । विचक्षणा चार्थे विनीतिप्रतिपत्तिर्भवति । क्षमा च शुभे परिपाचनाप्रतिपत्तिः । दान्ता चाववादादिप्रतिपत्तिः । न ह्यदान्तो ऽववादादिषु परेषां समर्थः । सुदूरगा च कुलोदयादिप्रतिपत्तिः । न ह्यदूरगतया प्रतिपत्त्या कुलोदयादयः परेषां कर्तुं शक्याः । सर्वा चैषा परार्थप्रतिपत्तिर्बोधि-

(1) *Anuçāsanī*, mot nouveau. Le chinois traduit littéralement par *souei kiao*, «enseignement à la suite».



सत्वानामक्षया भवत्यभ्युपगतसत्वाक्षयत्वादतो ऽपि संपन्ना वेदितव्या । प्रतिपत्तिविशेषणे द्वौ श्लोकौ ।

महाभये कामिजनः प्रवर्तते चले विपर्याससुखे भवप्रियः ।
प्रतिस्वमाधिप्रशमे शमप्रियः सदा तु सर्वाधिगमे कृपात्मकः ॥ ७ ॥
जनो विमूढः स्वसुखार्थमुद्यतः सदा तदप्राप्य परैति दुःखतां ।
सदा तु धीरो हि परार्थमुद्यतो द्वयार्थमाधाय परैति निर्वृतिं ॥ ८ ॥

तत्र कामानां महाभयत्वं बहुकायिकचैतसिकदुःखदुर्गतिगमनहेतुत्वात् । चलं विपर्याससुखं रूपारूप्यभवप्रियाणामनित्यत्वात्परमार्थदुःखत्वाच्च संस्कारदुःखतया । आधयः क्लेशा वेदितव्या दुःखाधानात् । विमूढो जनः सदा स्वसुखार्थं प्रतिपन्नः सुखं नाप्नोति दुःखमेवाप्नोति । बोधिसत्वस्तु परार्थं प्रतिपन्नः स्वपरार्थं संपाद्य निर्वृतिसुखं प्राप्नोत्ययमस्यापरः[1] प्रतिपत्तिविशेषः । गोचरपरिणामने श्लोकः ।

यथा यथा ह्यक्षविचित्रगोचरे प्रवर्तते चारगतो जिनात्मजः ।
तथा तथा युक्तसमानतापदैर्हिताय सत्वेष्वभिसंस्करोति तत् ॥ ९ ॥

येन येन प्रकारेण चक्षुरादीन्द्रियगोचरे विचित्रे बोधिसत्वः प्रवर्तते । ईर्यापथव्यापारचारे वर्तमानस्तेन तेन प्रकारेण संबद्धसादृश्यवचनैर्हितार्थं सत्वेषु तत्सर्वमभिसंस्करोति । यथा गोचरपरिशुद्धिसूत्रे[2] विस्तरेण निर्दिष्टं । सत्वेष्वक्षान्तिप्रतिषेधे श्लोकः ।

सदा ऽस्वतन्त्रीकृतदोषचेतने जने न संदोषमुपैति[3] बुद्धिमान् ।
अकामकारेण हि विप्रपत्तयो जने भवन्तीति कृपाविवृद्धितः ॥ १० ॥

सदा क्लेशैरस्वतन्त्रीकृतचेतने जने न संदोषमुपैति बोधिसत्वः । किं कारणं ।

(1) Ms. : ° स्याखरः. Le chinois donne *cheng*, «supérieur».

(2) Le Gocarapariçuddhi-sūtra est cité dans le Çikṣā-samuccaya, p. 350, 21. Le chinois rend ce titre par *Hing ts'ing tsing king*. Le Tripiṭaka chinois ne contient pas de sūtra isolé sous ce titre.

(3) *Saṃdoṣa*, si la lecture est exacte, est un mot nouveau. Le chinois traduit : «Il ne produit pas de pensée souillée».

अकामकारेणैषां विप्रतिपत्तयो भवन्तीति विदित्वा करुणावृद्धिगमनात् । प्रतिपत्तिमाहात्म्ये श्लोकः ।

भवगतिसकलाभिभूयगन्त्री परमशमानुगता प्रपत्तिरेव ।
विविधगुणगणैर्विवर्धमाना जगदुपगृह्य सदा कृपाशयेन ॥ ११ ॥ [1]

चतुर्विधं माहात्म्यं संदर्शयति । अभिभवमाहात्म्यं सकलं भवत्रयं गतिं च पञ्चविधामभिभूयगमनात् । यथोक्तं प्रज्ञापारमितायां [2] । रूपं चेत्सुभूत भावो ऽभविष्यन्नाभावो नदं महायानं सदेवमानुषासुरलोकमभिभूय निर्यास्यतीति विस्तरः । निर्वृतिमाहात्म्यमप्रतिष्ठनिर्वाणानुगतत्वात् । गुणवृद्धिमाहात्म्यं सत्वापरित्यागमाहात्म्यं चेति ।

महायानसूत्रालंकारे प्रतिपत्त्यधिकारः पञ्चमः

## VI

परमार्थलक्षणविभागे श्लोकः ।

न सन्न चासन्न तथा न चान्यथा न जायते व्येति न चावहीयते ।
न वर्धते नापि विशुध्यते पुनर्विशुध्यते तत्परमार्थलक्षणं ॥ १ ॥ [3]

अद्वयार्थो हि परमार्थः । तमद्वयार्थं पञ्चभिराकारैः संदर्शयति । न सत्परिकल्पितपरतन्त्रलक्षणाभ्यां न चासत्परिनिष्पन्नलक्षणेन । न तथा परिकल्पितपरतन्त्राभ्यां परिनिष्पन्नस्यैकत्वाभावात् । न चान्यथा ताभ्यामेवान्यत्वाभावात् । न जायते न च व्येत्यनभिसंस्कृतत्वाद्धर्मधातोः । न हीयते न च वर्धते संक्लेशव्यवदानपक्षयोर्निरोधोत्पादे तदवस्थत्वात् । न विशुध्यति प्रकृत्यसंक्लिष्टत्वात् न च न विशुध्यति आगन्तुकोपक्लेशविगमात् । इत्येतत्पञ्चविधमद्वयलक्षणं परमार्थलक्षणं वेदितव्यं । आत्मदृष्टिविपर्यासप्रतिषेधे श्लोकः ।

न चात्मदृष्टिः स्वयमात्मलक्षणा न चापि दुःसंस्थितता विलक्षणा ।
द्वयान्न चान्यद् भ्रम एष तदितस्ततश्च मोक्षो भ्रममात्रसंक्षयः ॥ २ ॥

[1] Mètre puṣpitāgrā.

[2] Je n'ai pas réussi à retrouver ce passage dans l'Aṣṭasāhasrikā-prajñāpāramitā, qui contient pourtant un si grand nombre de formules analogues.

[3] Mètre vaṃçasthā jusqu'au vers 5.



न तावदात्मदृष्टिरेवात्मलक्षणा । नापि दुःसंस्थितता । तथा हि सा विलक्षणा आत्मलक्षणात्परिकल्पितात् । सा पुनः पञ्चोपादानस्कन्धाः क्लेशदौष्ठुल्यप्रभावितत्वात् । नाप्यतो द्वयादन्यदात्मलक्षणमुपपद्यते । तस्मान्नास्त्यात्मा । भ्रम एष तूत्पन्नो येयमात्मदृष्टिस्तस्मादेव चात्माभावान्मोक्षो ऽपि भ्रममात्रसंक्षयो वेदितव्यो न तु कश्चिन्मुक्तः । विपर्यासपरिभाषायां द्वौ श्लोकौ ।

कथं जनो विभ्रममात्रमाश्रितः परैति दुःखप्रकृतिं न साततां [1] ।
अवेदको वेदक एव दुःखितो न दुःखितो धर्ममयो न तन्मयः ॥ ३ ॥
प्रतीत्यभावप्रभवे कथं जनः समक्षवृत्तिः श्रयते ऽन्यकारितं ।
तमःप्रकारः कतमो ऽयमीदृशो यतो ऽविपश्यन्सदसन्निरीक्षते ॥ ४ ॥

कथं नामायं लोको भ्रान्तिमात्रमात्मदर्शनं निश्रित्य सततानुबद्धं दुःखस्वभावं संस्काराणां न पश्यति । अवेदको ज्ञानेन तस्या दुःखप्रकृतेः । वेदको ऽनुभवेन दुःखस्यादुःखितो दुःखस्याप्रहीणत्वात् । न दुःखितो दुःखयुक्तस्यात्मनो ऽसत्वात् । धर्ममयो धर्ममात्रत्वात् पुद्गलनैरात्म्येन । न च धर्ममयो धर्मनैरात्म्येन । यदा च लोको भावानां प्रतीत्यसमुत्पादं प्रत्यक्षं पश्यति तं तं प्रत्ययं प्रतीत्य ते ते भावा भवन्तीति । तत्कथमेतां दृष्टिं श्रयते ऽन्यकारितं दर्शनादिकं न प्रतीत्यसमुत्पन्नमिति । कतमो ऽयमीदृशस्तमःप्रकारो लोकस्य यद्विद्यमानं प्रतीत्यसमुत्पादमविपश्यन्न विद्यमानमात्मानं निरीक्षते । शक्यं हि नाम तमसा विद्यमानमद्रष्टुं स्यान्न त्वविद्यमानं द्रष्टुमिति । असत्यात्मनि शमजन्मयोगे श्लोकः ।

न चान्तरं किंचन विद्यते ऽनयोः सदर्थवृत्त्या शमजन्मनोरिह ।
तथापि जन्मक्षयतो विधीयते शमस्य लाभः शुभकर्मकारिणां ॥ ५ ॥

न चास्ति संसारनिर्वाणयोः किंचिन्नानाकरणं परमार्थवृत्त्या नैरात्म्यस्य समतया । तथापि जन्मक्षयान्मोक्षप्राप्तिर्भवत्येव शुभकर्मकारिणां ये मोक्षमार्गं भावयन्ति । विपर्यासपरिभाषां कृत्वा तत्प्रतिपक्षपारमार्थिकज्ञानप्रवेशे चत्वारः श्लोकाः ।

संभृत्य संभारमनन्तपारं ज्ञानस्य पुण्यस्य च बोधिसत्वः ।
धर्मेषु चिन्तासुविनिश्रितत्वाज्जल्पान्वयामर्थगतिं परैति ॥ ६ ॥ [2]

[1] *Sātata*, mot nouveau, glosé par *satatānubaddha*.— [2] Mètre indravajrā jusqu'au vers 9.

अर्थांस्तु विज्ञाय च जल्पमात्रान्संतिष्ठते तन्निभचित्तमात्रे ।
प्रत्यक्षतामेति च धर्मधातुस्तस्माद्वियुक्तो द्वयलक्षणेन ॥ ७ ॥
नास्तीति चित्तात्परमेत्य बुद्ध्या चित्तस्य नास्तित्वमुपैति तस्मात् ।
द्वयस्य नास्तित्वमुपेत्य धीमान् संतिष्ठते ऽतद्गतिधर्मधातौ ॥ ८ ॥
अकल्पनाज्ञानबलेन धीमतः समानुयातेन समन्ततः सदा ।
तदाश्रयो गह्वरदोषसंचयो महागदेनेव विषं निरस्यते ॥ ९ ॥

एकेन संभृतसंभारत्वं धर्मचिन्तासुविनिश्चितत्वं समाधिनिश्रित्यभावनात् मनोजल्पाच्च तेषां धर्माणामर्थप्रख्यानावगमात्तत्प्रवेशं दर्शयति । असंख्येयप्रभेदकालं पारमस्य परिपूरणमित्यनन्तपारं । द्वितीयेन मनोजल्पमात्रानर्थान्विदित्वा तदाभासे चित्तमात्रे ऽवस्थानमियं बोधिसत्वस्य निर्वेधभागीयावस्था । ततः परेण धर्मधातोः प्रत्यक्षतो गमने द्वयलक्षणेन वियुक्तो ग्राह्यग्राहकलक्षणेन इयं दर्शनमार्गावस्था । तृतीयेन यथासौ धमधातुः प्रत्यक्षतामेति तद् दर्शयति । कथं चासौ धर्मधातुः प्रत्यक्षतामेति । चित्तादन्यदालम्बनं ग्राह्यं नास्तीत्यवगम्य बुद्ध्या तस्यापि चित्तमात्रस्य नास्तित्वावगमनं ग्राह्यभावे ग्राहकाभावात् । द्वये चास्य नास्तित्वं विदित्वा धर्मधातौ अवस्थानमतद्गतिर्ग्राह्यग्राहकलक्षणाभ्यां रहित एवं धर्मधातुः प्रत्यक्षतामेति । चतुर्थेन भावनामार्गावस्थायामाश्रयपरिवर्तनात् पारमार्थिकज्ञानप्रवेशं दर्शयति । सदा सर्वत्र समतानुगतेनाविकल्पज्ञानबलेन यत्र तत्समतानुगतं परतन्त्रे स्वभावे तदाश्रयस्य दूरानुप्रविष्टस्य दोषसंचयस्य दौष्ठुल्यलक्षणस्य महागदेनेव विषस्य निरसनात् । परमार्थज्ञानमाहात्म्ये श्लोकः ।

मुनिविहितसुधर्मसुव्यवस्थो मतिमुपधाय समूलधर्मधातौ ।
स्मृतिमतिमवगम्य कल्पमात्रां व्रजति गुणार्णवपारमाशु धीरः ॥ १० ॥ (1)

बुद्धविहिते सुधर्मे सुव्यवस्थापिते स परमार्थज्ञानप्रविष्टो बोधिसत्वः संपिण्डितधर्मालम्बनस्य मूलचित्तस्य धर्मधातौ मतिमुपनिविधाय या स्मृतिरुपलभ्यते तां सर्वां स्मृतिप्रवृत्तिं कल्पनामात्रामवगच्छत्येवं गुणार्णवस्य पारं बुद्धत्वमाशु व्रजतीत्येतत्परमार्थज्ञानस्य माहात्म्यं ।

महायानसूत्रालंकारे तत्वाधिकारः षष्ठः

(1) Mètre puṣpitāgrā.



# VII

प्रभावलक्षणविभागे श्लोकः ।

उत्पत्तिवाक्चित्तशुभाशुभाधितत्स्थाननिःसारपदापरोक्षं ।
ज्ञानं हि सर्वत्रगसप्रभेदेष्वव्याहतं धीरगतः प्रभावः ॥ १ ॥ (1)

परेषामुपपत्तौ ज्ञानं च्युतोपपादाभिज्ञा (2) । वाचि ज्ञानं दिव्यश्रोत्राभिज्ञायां वाचं तत्र गत्वोपपन्ना भाषन्ते । चित्ते ज्ञानं चेतःपर्यायाभिज्ञा । पूर्वशुभाशुभाधाने ज्ञानं पूर्वनिवासाभिज्ञा । यत्र विनेयास्तिष्ठन्ति तत्स्थानगमनज्ञानं ऋद्धिविषयाभिज्ञा (3) । निःसरणे ज्ञानमास्रवक्षयाभिज्ञा यथा सत्वा उपपत्तितो निःसरन्तीति । एषु षट्स्वर्थेषु सर्वत्र लोकधातौ सप्रभेदेषु पदापरोक्षमव्याहतं ज्ञानं स प्रभावो बोधिसत्वानां षडभिज्ञासंगृहीतः । प्रभावलक्षणविभागे स्वभावार्थ उक्तः । हेत्वर्थमारभ्य श्लोकः ।

ध्यानं चतुर्थं सुविशुद्धमेत्य निष्कल्पनाज्ञानपरिग्रहेण ।
यथाव्यवस्थानमनस्क्रियातः प्रभावसिद्धिं परमां परैति ॥ २ ॥ (4)

येन निश्रयेण येन ज्ञानेन येन मनसिकारेण तस्य प्रभावस्य समुदागमस्तत्संदर्शयति । फलार्थमारभ्य श्लोकः ।

येनार्यदिव्याप्रतिमैर्विहारैर्ब्राह्मैश्च नित्यं विहरत्युदारैः ।
बुद्धांश्च सत्वांश्च स दिक्षु गत्वा संमानयत्यानयते विशुद्धिं ॥ ३ ॥

त्रिविधं फलमस्य प्रभावस्य संदर्शयति । आत्मन आर्यादिसुखविहारमतुल्यं चोत्कृष्टं च लोकधात्वन्तरेषु गत्वा बुद्धानां पूजनं सत्वानां विशोधनं च । कर्मार्थं षड्विधमारभ्य चत्वारः श्लोकाः । दर्शनकर्म संदर्शनकर्म चारभ्य श्लोकः ।

मायोपमान्पश्यति लोकधातून्सर्वान्ससत्वान्सविवर्तनाशान् ।
संदर्शयत्येव च तान्यथेष्टं वशी विचित्रैरपि स प्रकारैः ॥ ४ ॥

(1) Mètre indravajrā.

(2) Expression nouvelle, équivalant à *cyutyupapatti* de Mahāvyutp., 7, 9.

(3) Le manuscrit donne *ṛddhiviṣṭhayā°*.

(4) Mètre upajāti jusqu'au vers 9.

स्वयं च सर्वलोकधातूनां ससत्वानां सविवर्तसंवर्तानां मायोपमत्वदर्शनात्। परेषां यथेष्टं तत्संदर्शनात्। अन्यैश्च विचित्रैः कम्पनज्वलनादिप्रकारैः। दशवशितालाभात्। यथा दशभूमिके[1] ऽष्टम्यां भूमौ निर्दिष्टाः। रश्मिकर्मारभ्य श्लोकः।

रश्मिप्रमोक्षैर्भृशदुःखितांश्च आपायिकान्स्वर्गगतान्करोति।
मारान्वयान् क्षुब्धविमानशोभान्[2] संकम्पयंस्त्रासयते समारान्॥ ५॥

द्विविधं रश्मिकर्म संदर्शयति। अपायोपपन्नानां च प्रसादं जनयित्वा स्वर्गोपपादनं। मारभवनानां च समारकाणां कम्पनोद्वेजनं। विक्रीडनकर्म चारभ्य श्लोकः।

समाधिविक्रीडितमप्रमेयं संदर्शयत्यग्रगणस्य मध्ये।
स कर्मजन्मोत्तमनिर्मितैश्च सत्वार्थमातिष्ठति सर्वकालं॥ ६॥

अप्रमेयसमाधिविक्रीडितसंदर्शनात् बुद्धपर्षन्मण्डलमध्ये त्रिविधेन निर्माणेन सदा सत्वार्थकरणाच्च। त्रिविधं निर्माणं शिल्पकर्मस्थाननिर्माणं। विनेयवशेन यथेष्टोपपत्तिनिर्माणं। उत्तमनिर्माणं च तुषितभवनवासादिकं। क्षेत्रपरिशुद्धिकर्म आरभ्य श्लोकः।

ज्ञानवशित्वात्समुपैति शुद्धिं क्षेत्रं यथाकामनिदर्शनाय।
अबुद्धनामेषु च बुद्धनामसंश्रावणात्तान्क्षिपते ऽन्यधातौ॥ ७॥

द्विविधपापविशोधनया। भाजनपरिशोधनया ज्ञानवशित्वाद्यथेष्टं स्फटिकवैदुर्यादिमयबुद्धक्षेत्रसंदर्शनतः। सत्वपरिशोधनया च बुद्धनामविरहितेषु

(1) Le Daçabhūmika-sūtra, dont nous possédons plusieurs traductions chinoises, énonce en effet les dix vaçitās dans la huitième terre, la bhūmi Acalā. Voir p. ex. trad. Çikṣānanda (Nj. 88; éd. de Tōkyō I, 2; l'ouvrage y forme une section de l'Avataṃsaka, chap. 38, p. 74a) et trad. Çīladharma (éd. de Tōkyō XXV, 8; cette version manque à la collection cataloguée par Nanjio; elle a été exécutée à Ouroumtsi, sur un texte rapporté par Ou-k'ong; cf. *Journ. asiat.* [*L'itinéraire d'Ou-k'ong*], 1895, II, p. 365); la liste des dix vaçitās associées à la huitième bhūmi s'y trouve p. 54-55.

(2) Ex conj. Ms.: मारान्वयानुक्ष°.



लोकधातुषूपपन्नानां सत्वानां बुद्धनामसंश्रावणया प्रसादं ग्राहयित्वा तद्विरहितेषु लोकधातुषूपपादनात्। योगार्थमारभ्य श्लोकः।

शक्तो भवत्येव[1] च सत्वपाके संजातपक्षः शकुनिर्यथैव।
बुद्धात्प्रशंसां लभते ऽतिमात्रामादेयवाक्यो भवति प्रजानां॥ ८॥

त्रिविधं योगं प्रदर्शयति। सत्वपरिपाचनशक्तियोगं प्रशंसायोगमादेयवाक्यतायोगं च। वृत्त्यर्थमारभ्य श्लोकः।

षड्धाप्यभिज्ञा त्रिविधा च विद्या अष्टौ विमोक्षा ऽभिभुवस्तथा ऽष्टौ।
दशापि कृत्स्नायतनान्यमेयाः समाधयो धीरगतः प्रभावः॥ ९॥

षड्भिः प्रभेदैर्बोधिसत्वस्य प्रभावो वर्तते। अभिज्ञाविद्याविमोक्षाभिभ्वायतनकृत्स्नायतनाप्रमाणसमाधिप्रभेदैः। एवं षडर्थेन विभागलक्षणेन प्रभावं दर्शयित्वा तन्माहात्म्योद्भावनार्थं श्लोकः।

स हि परमवशित्वलब्धबुद्धिर्जगदवशं स्ववशे विधाय नित्यं।
परहितकरणैकताभिरामश्चरति भवेषु हि सिंहवत्सुधीरः॥ १०॥[2]

त्रिविधं माहात्म्यं दर्शयति। वशितामाहात्म्यं स्वयं परमज्ञानवशित्वप्राप्त्या क्लेशास्ववशस्य जगतः स्ववशे स्थापनात्। अभिरतिमाहात्म्यं सदा परहितक्रियैकारामत्वात्। भवनिर्भयतामाहात्म्यं च।

प्रभावाधिकारः महायानसूत्रालंकारे सप्तमः

# VIII

बोधिसत्वपरिपाके संग्रहश्लोकः।

रुचिः प्रसादः प्रशमो ऽनुकम्पना क्षमाथ मेधा प्रबलत्वमेव च।
अहार्यताङ्गैः समुपेतता भृशं जिनात्मजे तत्परिपाकलक्षणं॥ १॥[3]

(1) Ex conj. Ms. : शक्ताभवच्चसत्वपाके. Le double *va* de *bhavaty eva* a sans doute amené ici, soit dans l'archétype, soit plutôt dans la copie, une faute d'haplographie.

(2) Mètre puṣpitāgrā.

(3) Mètre vaṃçasthā jusqu'au vers 10.

रुचिर्महायानदेशनाधर्मे प्रसादस्तद्देशिके प्रशमः क्लेशानामनुकम्पा सत्वेषु क्षमा दुष्करचर्यायां मेधा ग्रहणधारणप्रतिवेधेषु[1] प्रबलत्वमधिगमे अहार्यता मारपरप्रवादिभिः प्राहाणिकाङ्गैः[2] समन्वागतत्वं। भृशमिति रुच्यादीनामधिमात्रत्वं दर्शयति। एष समासेन बोधिसत्वानां नवप्रकार आत्मपरिपाको वेदितव्यः। रुचिपरिपाकमारभ्य श्लोकः।

सुमित्रतादित्रयमुग्रवीर्यता परार्धनिष्ठोत्तमधर्मसंग्रहः।
कृपालुसद्धर्ममहापरिग्रहे मतं हि सम्यकपरिपाकलक्षणं ॥ २ ॥

सुमित्रतादित्रयं सत्पुरुषसंसेवा सद्धर्मश्रवणं योनिशोमनसिकारश्च। उग्रवीर्यता अधिमात्रो वीर्यारम्भः। परार्धनिष्ठा सर्वाचिन्त्यस्थाननिर्विचिकित्सता। उत्तमधर्मसंग्रहो महायानधर्मरक्षा तत्प्रतिपन्नानामुपद्रवेभ्यो रक्षणात्। बोधिसत्वस्य महायानधर्मपरिग्रहमधिकृत्येदं रुचिपरिपाकलक्षणं वेदितव्यं। येन कारणेन परिपच्यते सुमित्रतादित्रयेण। यश्च तस्याः परिपाक उग्रवीर्यपरार्धनिष्ठायुक्तः स्वभावः। यत्कर्म चोत्तमधर्मसंग्रहकरणात्तदेतेन परिदीपितं। प्रसादपरिपाकमारभ्य श्लोकः।

गुणज्ञताथाशुसमाधिलाभिता फलानुभूतिर्मनसो ऽध्यभेदता।
जिनात्मजे शास्तरि संप्रपत्तये[3] मतं हि सम्यक्परिपाकलक्षणं ॥ ३ ॥

तत्परिपाको ऽपि कारणतः स्वभावतः कर्मतश्च परिदीपितः। गुणज्ञता इत्यपि स भगवांस्तथागत इति विस्तरेण कारणं। अवेत्यप्रभावलाभादभेद्यचित्तता स्वभावः। आशुसमाधिलाभस्तत्फलस्य चाभिज्ञादिकस्य प्रत्यनुभवनं कर्म। प्रशमपरिपाकमारभ्य श्लोकः।

सुसंवृतिः क्लिष्टवितर्कवर्जना[4] निरन्तरायो ऽथ शुभाभिरामता।
जिनात्मजे क्लेशविनोदनाय तन्मतं हि सम्यकपरिपाकलक्षणं ॥ ४ ॥

क्लेशविनोदना बोधिसत्वस्य प्रशमः। तत्परिपाको ऽपि कारणतः स्वभावतः कर्मतश्च परिदीपितः। इन्द्रियाणां स्मृतिसंप्रजन्याभ्यां सुसंवृतिः कारणं।

(1) *Prativedha*, cf. Çikṣā-samuccaya, 214, n. 5.

(2) *Prāhāṇika* (*aṅga*), mot nouveau. Cf. infra, v. 10.

(3) *Samprapatti*, mot nouveau : «chercher refuge». Le chinois ne le traduit pas; mais cf. les divers sens du verbe *samprapad*.

(4) *Varjanā*, mot nouveau, équivalent de *varjanam*.



क्लिष्टवितर्कवर्जना स्वभावः। प्रतिपक्षभावनायां निरन्तरायत्वं कुशलाभिरामता च कर्म। कृपापरिपाकलक्षणमधिकृत्य श्लोकः।

कृपा प्रकृत्या परदुःखदर्शनं निहीनचित्तस्य च संप्रवर्जनं[1]।
विशेषगत्वं जगदग्रजन्मता परानुकम्पापरिपाकलक्षणं ॥ ५ ॥

स्वप्रकृत्या च गोत्रेण परदुःखदर्शनेन निहीनयानपरिवर्जनतया च परिपच्यत इति कारणं। विशेषगामित्वं परिपाकवृद्धिगमनात् स्वभावः। सर्वलोकश्रेष्ठात्मभावता कर्माविनिवर्तनीयभूमौ। क्षान्तिपरिपाकलक्षणमारभ्य श्लोकः।

धृतिः प्रकृत्या प्रतिसंख्यभावना सुदुःखशीताद्यधिवासना सदा।
विशेषगामित्वशुभाभिरामता मतं क्षमायाः परिपाकलक्षणं ॥ ६ ॥

धृतिः सहनं क्षान्तिरिति पर्यायास्तत्परिपाके गोत्रं प्रतिसंख्यानं भावना च कारणं। तीव्राणां शीतादिदुःखानामधिवासना स्वभावः। क्षमस्य विशेषगामित्वं कुशलाभिरामता च कर्म। मेधापरिपाकमारभ्य श्लोकः।

विपाकशुद्धिः श्रवणाद्यमोषता प्रविष्टता सूक्तदुरुक्तयोस्तथा।
स्मृतेर्महाबुद्ध्युदये च योग्यता सुमेधतायाः परिपाकलक्षणं ॥ ७ ॥

तत्र मेधानुकूला विपाकविशुद्धिः कारणं। श्रुतचिन्तितभावितचिरकृतचिरभाषितानामसंमोषता सुभाषितदुर्भाषितार्थसुप्रविष्टता च स्मृतेर्मेधापरिपाकस्वभावः। लोकोत्तरप्रज्ञोत्पादनयोग्यता कर्म। बलवत्वप्रतिलम्भपरिपाकमारभ्य श्लोकः।

शुभद्वयेन द्वयधातुपुष्टता फलोदये चाश्रययोग्यता परा।
मनोरथाप्तिर्जगदग्रभूतता बलोपलम्भे परिपाकलक्षणं ॥ ८ ॥

तत्र पुण्यज्ञानद्वयेन तस्य पुण्यज्ञानद्वयस्य बीजपुष्टता तत्परिपाके कारणं। अधिगमं प्रत्याश्रययोग्यता तत्परिपाकस्वभावः। मनोरथसंपत्तिर्जगदग्रभूतता च कर्म। अहार्यतापरिपाकमारभ्य श्लोकः।

सुधर्मतायुक्तिविचारणाशयो विशेषलाभः परपक्षदूषणं।
पुनः सदा मारनिरन्तरायता अहार्यतायाः परिपाकलक्षणं ॥ ९ ॥

(1) *Sampravarjanam*, mot nouveau : «éviter».

तत्परिपाकस्य सङ्गमे युक्तिविचारणाकृत आशयः कारणं। मारनिरन्तरायता स्वभावो यदा मारो न पुनः शक्नोत्यन्तरायं कर्तुं । विशेषाधिगमः परपक्षदूषणं च कर्म। प्राहाणिकाङ्गसमन्वागमपरिपाकमधिकृत्य श्लोकः।

शुभाचयो ऽथाश्रययत्नयोग्यता विवेकतोदग्रशुभाभिरामता।
जिनात्मजे ह्यङ्गसमन्वये पुनर्मतं हि सम्यक्परिपाकलक्षणं ॥ १० ॥

तत्परिपाकस्य कारणं कुशलमूलोपचयः । आश्रयस्य वीर्यारम्भक्षमत्वं स्वभाव :। विवेकोत्कृष्टता कुशलाभिरामता च कर्म। नवविधात्मपरिपाकमाहात्म्यमारभ्य श्लोकः।

इति नवविधवस्तुपाचितात्मा परपरिपाचनयोग्यतामुपेतः।
शुभमयसततप्रवर्धितात्मा भवति सदा जगतो ऽग्रबन्धुभूतः ॥ ११ ॥ [1]

द्विविधं तन्माहात्म्यं। परपरिपाके प्रतिशरणत्वं । सततं धर्मकायवृद्धिश्च। तत एव जगतो ऽग्रबन्धुभूतः। सत्वपरिपाकविभागे एकादश श्लोकाः।

व्रणे ऽपि भोज्ये परिपाक इष्यते यथैव तत्स्रावणभोगयोग्यता।
तथाश्रये ऽस्मिन्द्वयपक्षशान्तता तथोपभोगत्वसुशान्तपक्षता ॥ १२ ॥ [2]

अनेन परिपाकस्वभावं दर्शयति। यथा व्रणस्य स्रावणयोग्यता परिपाकः। भोजनस्य च भोगयोग्यता । एवं सत्वानामाश्रये व्रणभोजनस्थानीये स्रावणस्थानीयं विपक्षशमनं। भोगस्थानीयस्य प्रतिपक्षोपभोगः। तद्योग्यता आश्रयस्य परिपाक इति। विपक्षप्रतिपक्षावत्र पक्षद्वयं वेदितव्यं। द्वितीयः श्लोकः।

विपाचनोक्ता परिपाचना तथा प्रपाचना चाप्यनुपाचनापरा।
सुपाचनाप्यधिपाचना मता निपाचनोत्पाचनना च देहिषु ॥ १३ ॥

अनेन परिपाकप्रभेदं दर्शयति। क्लेशविगमेन पाचनना विपाचना। सर्वतो यानत्रयेण पाचना परिपाचना । वाह्यपरिपाकविशिष्टत्वात् प्रकृष्टा पाचना [3] प्रपाचना। यथाविनेयधर्मदेशनात्तदनुरूपा पाचना अनुपाचना। सत्कृत्य पाचना सुपाचना। अधिगमेन पाचना अधिपाचना अविपरीतार्थेन।

[1] Mètre puṣpitāgrā.
[2] Mètre vaṃçasthā jusqu'au v. 21.
[3] Ms. : सत्कृत्य पाचना; mais la restitution est certaine.



नित्या पाचना निपाचना अपरिहाणीयार्थेन । क्रमेणोत्तरोत्तरपाचना उत्पाचना। इत्ययमष्टप्रकारः परपरिपाकप्रभेदः। तृतीयचतुर्थौ श्लोकौ।

हिताशयेनेह यथा जिनात्मजो व्यवस्थितः सर्वजगद्विपाचयन्।
तथा न माता न पिता न बन्धवः सुतेषु बन्धुष्वपि सुव्यवस्थिताः ॥ १४ ॥
तथा जनो नात्मनि वत्सलो मतः कुतो ऽपि सुस्निग्धपराश्रये जने।
यथा कृपात्मा परसत्ववत्सलो हिते सुखे चैव नियोजनात् मतः ॥ १५ ॥

आभ्यां किं दर्शयति । यादृशेनाशयेन बोधिसत्वः सत्वान्परिपाचयति तमाशयं दर्शयति । मातापितृबान्धवाशयविशिष्टं लोकात्मवात्सल्यविशिष्टं च हितसुखसंयोजनात्। आत्मवत्सलस्तु लोक आत्मानं हिते च सुखे च संनियोजयति। अवशिष्टैः श्लोकैर्येन प्रयोगेण सत्वान्परिपाचयति तं पारमिताप्रतिपत्त्या संदर्शयति । यादृशेन दानेन यथा सत्वान्परिपाचयति तदारभ्य श्लोकः।

न बोधिसत्वस्य शरीरभोगयोः परेष्वदेयं पुनरस्ति सर्वथा ।
अनुग्रहेण द्विविधेन पाचयन् परं समैर्दानगुणैर्न तृप्यते ॥ १६ ॥

त्रिविधेन दानेन पाचयति । सर्वस्वशरीरभोगदानेन अविषमदानेन अतृप्तिदानेन च। कथं परिपाचयति दृष्टधर्मसंपरायानुग्रहेण। अविघातेनेच्छापरिपूर्णात्। अनागतेन च संगृह्य कुशलप्रतिष्ठापनात्। यादृशेन शीलेन यथा सत्वान्परिपाचयति तदारभ्य श्लोकः।

सदा प्रकृत्याध्यविहिंसकः [1] स्वयंरतो ऽप्रमत्तो ऽत्र परं निवेशयन्।
परंपरानुग्रहकृत् द्विधा परे विपाकनिष्यन्दगुणेन पाचकः ॥ १७ ॥

पञ्चविधेन शीलेन। ध्रुवशीलेन प्रकृतिशीलेन परिपूर्णशीलेनाध्यविहिंसकत्वात्। परिपूर्णो ह्यविहिंसको ऽध्यविहिंसकः । दशकुशलकर्मपथपरिपूरितः । यथोक्तं [2] द्वितीयायां भूमौ । अधिगमशीलेन स्वयंरततया निरन्तरास्खलितशीलेन चाप्रमत्ततया। कथं च परिपाचयति। शीले संनिवेशनात्। द्विधानु-

[1] *Adhyavihiṃsaka*, mot nouveau. Le chinois, d'accord avec l'explication du commentaire, traduit *adhi* en tête du mot par *man*, «plein».

[2] Le chinois ajoute : «Dans le sūtra des Dix Terres» (*Chi-ti king* = Daçabhūmika-sūtra). Cf. sup., p. 26, n. 1.

ग्रहक्रियया दृष्टधर्मे संपराये च। संपरायानुग्रहं परेषु विपाकनिष्यन्दगुणाभ्यां परंपरया करोति। तद्विपाकनिष्यन्दयोरन्योन्यानुकूल्येनाव्यवच्छेदात्। यादृश्या क्षान्त्या यथा सत्वान्परिपाचयति तदारभ्य श्लोकः।

परे ऽपकारिण्युपकारिबुद्धिमान् प्रमर्षयन्नुग्रमपि व्यतिक्रमं।
उपायचित्तैरपकारमर्षणैः शुभे समादापयते ऽपकारिणः ॥ १८ ॥

अपकारिणि परे उपकारिबुद्ध्या प्रगाढापकारमर्षणक्षान्त्या परिपाचयति। उपकारिबुद्धित्वं पुनः क्षान्तिपारमितापरिपूर्यानुकूल्यवृत्तिता वेदितव्यं। कथं परिपाचयति। दृष्टधर्मानुग्रहेण चापकारमर्षणात्। संपरायानुग्रहेण चोपायज्ञैरपकारमर्षणैरावर्ज्यापकारिणां कुशले समादापनात्। यादृशेन वीर्येण यथा सत्वान्परिपाचयति तदारभ्य श्लोकः।

पुनः स यत्नं परमं समाश्रितो न खिद्यते कल्पसहस्रकोटिभिः।
जिनात्मजः स गणं प्रपाचयन्परैकचित्तस्य शुभस्य कारणात् ॥ १९ ॥

अधिमात्रदीर्घकालाखेदे वीर्येण दीर्घकालाखेदित्वमनन्तसत्वपरिपाचनात्। परैकचित्तस्य कुशलस्यार्थे कल्पसहस्रकोटिभिरखेदात्। अत एवोक्तं भवति यथा परिपाचयति। कुशलचित्तसंनियोजनात् दृष्टधर्मसंपरायानुग्रहेणेति यादृशेन ध्यानेन यथा सत्वान्परिपाचयति तदारभ्य श्लोकः।

वशित्वमागम्य मनस्यनुत्तरं परं समावर्जयते ऽत्र शासने।
निहत्य सर्वामवमानकामतां शुभेन संवर्धयते च तं पुनः ॥ २० ॥

प्राप्तानुत्तरवशित्वेन ध्यानेन निरामिषेण च निहतसर्वावमानाभिलाषेण परिपाचयति। बुद्धशासने परस्यावर्जनादावर्जितस्य च कुशलधर्मसंवर्धनात् परिपाचयति। यादृश्या प्रज्ञया यथा सत्वान्परिपाचयति तदारभ्य श्लोकः।

स तत्वभावार्थनये सुनिश्चितः करोति सत्वान्सुविनीतसंशयान्।
ततश्च ते तज्जिनशासनादराद्विवर्धयन्ते स्वपरं गुणैः शुभैः ॥ २१ ॥

स बोधिसत्वस्तत्वार्थनये चाभिप्रायार्थनये च सुविनिश्चितया प्रज्ञया परि-



पाचयति। कथं परिपाचयति सत्वानां संशयविनयनात्। ततश्च शासनबहुमानात्तेषामात्मपरगुणसंवर्धकत्वेन। नियमनश्लोकः।

इति सुगतिगतौ शुभत्रये वा जगदखिलं कृपया स बोधिसत्वः।
तनुपरमविमध्यमप्रकारैर्विनयति लोकसमानभावगत्या ॥ २२ ॥ (1)

अनेन यत्र च विनयति सुगतिगमने यानत्रये वा। यच्च विनयति जगदखिलं। येन च विनयति कृपया। यश्च विनयति बोधिसत्वः। यादृशैश्च परिपाचनप्रकारैस्तनुपरमविमध्यमप्रकारैः। यावन्तं च कालं तत्परिदीपनात् समासेन परिपाकमाहात्म्यं दर्शयति। तत्र तनुः प्रकारो ऽधिमुक्तिचर्याभूमौ बोधिसत्वस्य परमो ऽष्टम्यादिषु विमध्यमः सप्तसु वेदितव्यः यावल्लोकस्य भावस्तत्समानया गत्या अत्यन्तमित्यर्थः।

महायानसूत्रालंकारे परिपाकाधिकारो ऽष्टमः

# IX

सर्वाकारज्ञतायां द्वौ श्लोकौ। तृतीयस्तयोरेव निर्देशभूतः।

अमेयैर्दुष्करशतैरमेयैः कुशलाचयैः।
अप्रमेयेण कालेन अमेयावरणक्षयात् ॥ १ ॥ (2)
सर्वाकारज्ञतावाप्तिः सर्वावरणनिर्मला।
विवृता रत्नपेटेव बुद्धत्वं समुदाहृतं ॥ २ ॥
कृत्वा दुष्करमद्भुतं श्रमशतैः संचित्य सर्वं शुभं
कालेनोत्तमकल्पयानमहता सर्वावृतीनां क्षयात्।
सूक्ष्मस्यावरणस्य भूमिषु गतस्योत्पाटनाद्बुद्धता
रत्नानामिव सा प्रभावमहतां पेटा समुद्घातिता ॥ ३ ॥ (3)

समुदागमतः स्वभावत औपम्यतश्च बुद्धत्वमुद्भावितं। यावद्भिर्दुष्करशतैर्यावद्भिः कुशलसंभारैर्यावता कालेन यावतः क्लेशज्ञेयावरणस्य प्रहाणात्समुदागच्छत्ययं समुदागमः। सर्वाकारज्ञतावाप्तिः सर्वावरणनिर्मला स्वभावः।

(1) Mètre puṣpitāgrā. — (2) Mètre anuṣṭubh jusqu'au vers 2. — (3) Mètre çārdūlavikrīḍita.



IMPRIMERIE NATIONALE.

विवृता रत्नपेटा तदौपम्यं । तस्यैव बुद्धत्वस्याद्वयलक्षणे सानुभावे द्वौ श्लोकौ ।

सर्वधर्माश्च बुद्धत्वं धर्मो नैव च कश्चन ।
शुक्लधर्ममयं तच्च न च तैस्तन्निरूप्यते ॥ ४ ॥[1]
धर्मरत्ननिमित्तत्वाल्लब्धरत्नाकरोपमं ।
शुभसस्यनिमित्तत्वाल्लब्धमेघोपमं मतं ॥ ५ ॥

सर्वधर्माश्च बुद्धत्वं तथताया अभिन्नत्वात्तद्विशुद्धिप्रभावितत्वाच्च बुद्धत्वस्य न च कश्चिद्धर्मो ऽस्ति परिकल्पितेन धर्मस्वभावेन शुक्लधर्ममयं च बुद्धत्वं पारमितादीनां कुशलानां तद्भावेन परिवृत्तेः । न च तैस्तन्निर्दिश्यते पारमितादीनां पारमितादिभावेनापरिनिष्पत्तेरिदमद्वयलक्षणं । रत्नाकरमेघोपमत्वमनुभावः । देशना धर्मरत्नानां तत्प्रभवत्वात् कुशलसस्यानां च विनेयसंतानक्षेत्रेषु ।

बुद्धत्वं सर्वधर्मः समुदितमथ वा सर्वधर्मव्यपेतं
प्रोद्भूतेर्धर्मरत्नप्रततसुमहतो धर्मरत्नाकराभं ।
भूतानां शुक्लसस्यप्रसवसुमहतो हेतुतो मेघभूतं
दानाद्धर्माम्बुवर्षप्रततसुविहितस्याक्षयस्य प्रजासु ॥ ६ ॥[2]

अनेन तृतीयेन श्लोकेन तमेवार्थं निर्दिशति । सुमहतः प्रततस्य धर्मरत्नस्य प्रोद्भूतेर्निमित्तत्वाद्रत्नाकराभं भूतानां महतः शुक्लसस्यप्रसवहेतुत्वान्मेघभूतं । महतः सुविहितस्याक्षयस्य धर्माम्बुवर्षस्य दानात् प्रजास्वित्ययमत्र पदविग्रहो वेदितव्यः । तस्यैव बुद्धत्वस्य शरणत्वानुत्तर्ये पञ्च श्लोकाः ।

परित्राणं हि बुद्धत्वं सर्वक्लेशगणात्सदा ।
सर्वदुश्चरितेभ्यश्च जन्ममरणतो ऽपि च ॥ ७ ॥[3]

अनेन संक्षेपतः क्लेशकर्मजन्मसंक्लेशपरित्राणार्थेन शरणत्वं दर्शयति ।

उपद्रवेभ्यः सर्वेभ्यो अपायादनुपायतः ।
सत्कायाद्धीनयानाच्च तस्माच्छरणमुत्तमं ॥ ८ ॥

अनेन द्वितीयेनोपद्रवादिपरित्राणाद्विस्तरेण । तत्र सर्वोपद्रवपरित्राणत्वं

(1) Mètre anuṣṭubh jusqu'au vers 5. — (2) Mètre sragdhara. — (3) Mètre anuṣṭubh jusqu'au vers 8.



यद् बुद्धानुभावेन अन्धाश्चक्षूंषि प्रतिलभन्ते बधिराः श्रोत्रं विक्षिप्तचित्ताः स्वस्थचित्तमीतयः शाम्यन्तीत्येवमादि । अपायपरित्राणत्वं बुद्धप्रभया तद्गतानां मोक्षणात् तदगमने च प्रतिष्ठापनात् । अनुपायपरित्राणत्वं तीर्थिकदृष्टिव्युत्थापनात्[1] । सत्कायपरित्राणत्वं यानद्वयेन परिनिर्वापणात्[2] । हीनयानपरित्राणत्वमनियतगोत्राणां महायानैकायनीकरणात् ।

शरणमनुपमं तच्छ्रेष्ठबुद्धत्वमिष्टं जननमरणसर्वक्लेशपापेषु रक्षा ।
विविधभयगतानां सर्वरक्षापयानं प्रततविविधदुःखापायनोपायगानां ॥ ९ ॥[3]

अनेन तृतीयेन तस्यैव शरणत्वस्यानुपमश्रेष्ठस्य चानुत्तर्यं तेनैवार्थेन दर्शयति ।

बौद्धैर्धर्मैर्यच्च सुसंपूर्णशरीरं यत्सद्धर्मं वेत्ति च सत्वान्प्रविनेतुं ।
यातं पारं यत्कृपया सर्वजगत्सु तद् बुद्धत्वं श्रेष्ठमिहत्यं[4] शरणानां ॥ १० ॥[5]

अनेन चतुर्थेन यैः कारणैस्तत्तथानुत्तरं शरणं भवति तत्संदर्शयति । बौद्धैर्धर्मैर्बलवैशारद्यादिभिः सुसंपूर्णस्वभावत्वात् । स्वार्थनिष्ठामधिकृत्य सद्धर्मसत्वविनयोपायज्ञानात् करुणापारगमनाच्च परार्थनिष्ठामधिकृत्य ।

आलोकात्सर्वसत्वानां बुद्धत्वं शरणं महत् ।
सर्वव्यसनसंपत्तिव्यावृत्त्यभ्युदये मतं ॥ ११ ॥[6]

अनेन पञ्चमेन श्लोकेन यावन्तं कालं यावतां सत्वानां यत्रार्थे शरणं भवति तत्समासेन दर्शयति । यत्रार्थे इति सर्वव्यसनव्यावृत्तौ संपत्त्यभ्युदये च । आश्रयपरावृत्तौ षट् श्लोकाः ।

क्लेशज्ञेयवृतीनां सततमनुगतं बीजमुत्कृष्टकालं
यस्मिन्नस्तं प्रयातं भवति सुविपुलैः सर्वहानिप्रकारैः ।
बुद्धत्वं शुक्लधर्मप्रवरगुणयुता आश्रयस्यान्यथाप्ति-
स्तत्प्राप्तिर्निर्विकल्पाद्विषयसुमहतो ज्ञानमार्गात्सुशुद्धात् ॥ १२ ॥[7]

अनेन विपक्षबीजवियोगतः प्रतिपक्षसंपत्तियोगतश्चाश्रयपरिवृत्तिः परि-

(1) *Vyutthāpana*, mot nouveau : «écarter».

(2) *Parinirvāpaṇa*, mot nouveau : «mener au Parinirvāṇa».

(3) Mètre malinī.

(4) Ex conj. Ms. : °मिहक्यं. Peut-être encore à corriger en *ihaiṣyaṃ*.

(5) Mètre mattamayūra.

(6) Mètre anuṣṭubh.

(7) Mètre sragdhara.

दीपिता। यथा च तत्प्राप्तिर्द्विविधमार्गलाभात्। सुविशुद्धलोकोत्तरज्ञानमार्गलाभात्। तत्पृष्ठलब्धानन्तज्ञेयविषयज्ञानमार्गलाभाच्च। उत्कृष्टकालमित्यनादिकालं। सुविपुलैः सर्वहानिप्रकारैरिति भूमिप्रकारैः।

स्थितश्च तस्मिन्स तथागतो जगन्महाचलेन्द्रस्थ इवाभ्युदीक्षते।
शमाभिरामं करुणायते जनमघाभिरामे[1] ऽन्यजने तु का कथा ॥ १३ ॥[2]

अनेन द्वितीयेनान्याश्रयपरावृत्तिभ्यस्तद्विशेषं दर्शयति। तत्स्थो हि महाचलेन्द्रस्थ इव दूरान्तरनिकृष्टं लोकं पश्यति। दृष्ट्वा च करुणायते श्रावकप्रत्येकबुद्धानपि प्रागेव तदन्यान्।

प्रवृत्तिरुद्वृत्तिरवृत्तिराश्रयो[3] निवृत्तिरावृत्तिरथो द्वयाद्वया।
समा विशिष्टा अपि सर्वगात्मिका तथागतानां परिवृत्तिरिष्यते ॥ १४ ॥

अनेन तृतीयेन तद्दशप्रभेदं दर्शयति। सा हि तथागतानां परिवृत्तिः परार्थवृत्तिरिति प्रवृत्तिः। सर्वधर्मविशिष्टत्वादुत्कृष्टा वृत्तिरित्युद्वृत्तिः। संक्लेशहेताववृत्तिः। आश्रय इति यो ऽसौ परिवृत्त्याश्रयस्तं दर्शयति। संक्लेशान्निवृत्तितो निवृत्तिः। आत्यन्तिकत्वादायता वृत्तिरित्यावृत्तिः। अभिसंबोधिपरिनिर्वाणदर्शनवृत्त्या द्वया वृत्तिः। संसारनिर्वाणाप्रतिष्ठितत्वात्संस्कृतासंस्कृतत्वेनाद्वया वृत्तिः। विमुक्तिसामान्येन श्रावकप्रत्येकबुद्धसमा वृत्तिः। बलवैशारद्यादिभिः बुद्धधर्मैरसमत्वाद्विशिष्टा वृत्तिः। सर्वयानोपदेशगतत्वात्सर्वगता वृत्तिः।

यथाम्बरं सर्वगतं सदा मतं तथैव तत्सर्वगतं सदा मतं।
यथाम्बरं रूपगणेषु सर्वगं तथैव तत्सत्वगणेषु सर्वगं ॥ १५ ॥

अनेन चतुर्थेन तत्स्वभावस्य बुद्धत्वस्य सर्वगतत्वं दर्शयति। आकाशसाधर्म्येणोद्देशनिर्देशतः पूर्वापरार्धाभ्यां। सत्वगणेषु सर्वगतत्वं बुद्धत्वस्यात्मत्वेन सर्वसत्वोपगमने परिनिष्पत्तितो वेदितव्यं।

यथोद्भाजने भिन्ने चन्द्रबिम्बं न दृश्यते।
तथा दुष्टेषु सत्वेषु बुद्धबिम्बं न दृश्यते ॥ १६ ॥[4]

(1) Ex conj. Ms. : ज्ञनन्सव्यभिरामे·

(2) Mètre vaṃçasthā jusqu'au vers 15.

(3) Ms. : °राश्रय.

(4) Mètre anuṣṭubh jusqu'au vers 48.



अनेन पञ्चमेन सर्वगतत्वे ऽप्यभाजनभूतेषु सत्वेषु अबुद्धबिम्बदर्शनं दृष्टान्तेन साधयति।

यथाग्निर्ज्वलते ऽन्यत्र पुनरन्यत्र शाम्यति।
बुद्धेष्वपि तथा ज्ञेयं संदर्शनमदर्शनं ॥ १७ ॥

अनेन षष्ठेन बुद्धविनेयेषु सत्सु बुद्धोत्पादात्तद्दर्शनं। विनीतेषु परिनिर्वाणात्तददर्शनं अग्निज्वलनशमनसाधर्म्येण साधयति। अनाभोगाप्रतिप्रस्रब्धबुद्धकार्यत्वे[1] चत्वारः श्लोकाः।

अघटितेभ्यस्तूर्येभ्यो यथा स्याच्छब्दसंभवः।
तथा जिने विनाभोगं देशनायाः समुद्भवः ॥ १८ ॥
यथा मणेर्विना यत्नं स्वप्रभावनिदर्शनं।
बुद्धेष्वपि विनाभोगं तथा कृत्यनिदर्शनं ॥ १९ ॥

आभ्यां श्लोकाभ्यामनाभोगेन बुद्धकार्यं साधयत्यघटिततूर्यशब्दमणिप्रभावसाधर्म्येण।

यथाकाशे अविच्छिन्ना दृश्यन्ते लोकतः क्रियाः।
तथैवानास्रवे धातौ अविच्छिन्नाः जिनक्रियाः ॥ २० ॥
यथाकाशे क्रियाणां हि हानिरभ्युदयः सदा।
तथैवानास्रवे धातौ बुद्धकार्योदयव्ययः ॥ २१ ॥

आभ्यामप्यप्रतिप्रस्रब्धबुद्धकार्यत्वं बुद्धकृत्यस्याविच्छेदात्। आकाश इव लोकक्रियाणामविच्छेदे ऽपि चान्यान्यक्रियोदयव्ययस्तथैव। अनास्रवधातुगाम्भीर्ये षोडश श्लोकाः।

पौर्वापर्यविशिष्टापि सर्वावरणनिर्मला।
न शुद्धा नापि चाशुद्धा तथता बुद्धता मता ॥ २२ ॥

पौर्वापर्येण विशिष्टत्वान्न शुद्धा। पश्चात्सर्वावरणनिर्मलत्वान्नाशुद्धा मलविगमात्।

शून्यतायां विशुद्धायां नैरात्म्यान्मार्गलाभतः।
बुद्धाः शुद्धात्मलाभित्वात् गता आत्ममहात्मतां ॥ २३ ॥

(1) (*A-*)*pratiprasrabdha*, mot nouveau. Le chinois traduit (dans le commentaire sur le vers 21) par *pou-che*, « ne pas abandonner ».

तत्र चानास्रवे धातौ बुद्धानां परमात्मा निर्दिश्यते। किं कारणं। अग्रनैरात्म्यात्मकत्वात्। अग्रं नैरात्म्यं विशुद्धा तथता सा च बुद्धानामात्मा स्वभावार्थेन तस्यां विशुद्धायामग्रं नैरात्म्यमात्मानं बुद्धा लभन्ते शुद्धं। अतः शुद्धात्मलाभित्वात् बुद्धा आत्ममाहात्म्यं प्राप्ता इत्यनेनाभिसंधिना[1] बुद्धानामनास्रवे धातौ परमात्मा व्यवस्थाप्यते।

न भावो नापि चाभावो बुद्धत्वं तेन कथ्यते।
तस्माद्बुद्धतथाप्रश्ने अव्याकृतनयो मतः॥ २४॥

तेनैव कारणेन बुद्धत्वं न भाव उच्यते। पुद्गलधर्माभावलक्षणत्वात्तदात्मकत्वाच्च बुद्धत्वस्य। नाभाव उच्यते तथतालक्षणभावात्। अतो बुद्धस्य भावाभावप्रश्ने भवति तथागतः परं मरणान्न भवतीत्येवमादिरव्याकृतनयो मतः।

दाहशान्तिर्यथा लोहे दर्शने तिमिरस्य च।
चित्तज्ञाने तथा बौद्धे भावाभावो न शस्यते॥ २५॥

यथा च लोहे दाहशान्तिर्दर्शने च तिमिरमेतस्य शान्तिर्न भावो दाहतिमिरयोरभावलक्षणत्वात्। नाभावः शान्तिलक्षणेन भावात्। एवं बुद्धानां चित्तज्ञाने च दाहतिमिरस्थानीययो रागाविद्ययोः शान्तिर्न भावः शस्यते तदभावप्रभावितत्वाच्चेतःप्रज्ञाविमुक्त्या नाभावस्तेन तेन विमुक्तिलक्षणेन भावात्।

बुद्धानाममले धातौ नैकता बहुता न च।
आकाशवद्देहत्वात्पूर्वदेहानुसारतः॥ २६॥

बुद्धानामनास्रवधातौ नैकत्वं पूर्वदेहानुसारेण। न बहुत्वं देहाभावादाकाशवत्।

बलादिबुद्धधर्मेषु बोधी रत्नाकरोपमा।
जगत्कुशलसस्येषु महामेघोपमा मता॥ २७॥
पुण्यज्ञानसुपूर्णत्वात्पूर्णचन्द्रोपमा मता।
ज्ञानालोककरत्वाच्च महादित्योपमा मता॥ २८॥

[1] Ex conj. Le ms. porte इत्यनग्राभिस॥ना. La restitution, très vraisemblable au point de vue graphique, me semble de plus conforme au chinois *tse p'ei yi yi*, «par suite de l'esprit (mati) de ce sens (artha)».



एतौ रत्नाकरमेघोपमत्वे पूर्णचन्द्रमहादित्योपमत्वे च श्लोकौ गतार्थौ।

अमेया रश्मयो यद्वद्व्यामिश्रा भानुमण्डले।
सदैककार्या वर्तन्ते लोकमालोकयन्ति च॥ २९॥
तथैवानास्रवे धातौ बुद्धानामप्रमेयता।
मिश्रैककार्या कृत्येषु ज्ञानालोककरा मता॥ ३०॥

एकेन व्यामिश्ररश्म्येककार्यस्योपमतया साधरणकर्मतां दर्शयति। रश्मीनामेककार्यत्वं पाचनशोषणसमानकार्यत्वाद्वेदितव्यं। द्वितीयेनानास्रवे धातौ मिश्रैककार्यत्वं निर्माणादिकृत्येषु।

यथैकरश्मिनिःसरात्सर्वरश्मिविनिःसृतिः।
भानोस्तथैव बुद्धानां ज्ञेया ज्ञानविनिःसृतिः॥ ३१॥

एककाले सर्वरश्मिविनिःसृत्या स च बुद्धानामेककाले ज्ञानप्रवृत्तिं दर्शयति।

यथैवादित्यरश्मीनां वृत्तौ नास्ति ममायितं।
तथैव बुद्धज्ञानानां वृत्तौ नास्ति ममायितं॥ ३२॥
यथा सूर्यैकमुक्ताभै रश्मिभिर्भास्यते जगत्।
सकृत् ज्ञेयं तथा सर्वं बुद्धज्ञानैः प्रभास्यते॥ ३३॥

ममत्वाभावे जगज्ज्ञेयप्रभासेन च। यथाक्रमं श्लोकौ गतार्थौ।

यथैवादित्यरश्मीनां मेघाद्यावरणं मतं।
तथैव बुद्धज्ञानानामावृतिः सत्वदुष्टता॥ ३४॥

यथा रश्मीनां मेघाद्यावरणमप्रभासेन। तथा बुद्धज्ञानानामावरणं सत्वानामाभाजनत्वेन दुष्टता पञ्चकषायात्युत्सदतया।

यथा पांशुवशाद्वस्त्रे रङ्गचित्रा विचित्रता।
तथाऽवेधवशान्मुक्तौ ज्ञानचित्रा विचित्रता॥ ३५॥

यथा पांशुविशेषेण वस्त्रे रङ्गविचित्रता क्वचिदविचित्रता। तथैव पूर्वप्राण-

धानचर्याबलाधानविशेषात् बुद्धानां विमुक्तौ ज्ञानविचित्रता भवति । श्रावकप्रत्येकबुद्धानां विमुक्तावविचित्रता ।

गाम्भीर्यममले धातौ लक्षणस्थानकर्मसु ।
बुद्धानामेतदुदितं रङ्गैर्वाकाशचित्रणा[1] ॥ ३६ ॥

एतदनास्रवधातौ बुद्धानां त्रिविधं गाम्भीर्यमेवमुक्तं। लक्षणगाम्भीर्यं चतुर्भिः श्लोकैः । स्थानगाम्भीर्यं पञ्चमेनैकत्वपृथक्त्वाभ्यामस्थितत्वात् । कर्मगाम्भीर्यं दशभिः । तत्पुनर्लक्षणगाम्भीर्यं विशुद्धिलक्षणं परमात्मलक्षणमव्याकृतलक्षणं विमुक्तिलक्षणं चारभ्योक्तं। कर्मगाम्भीर्यं बोधिपक्षादिरत्नाश्रयत्वकर्म सत्वपरिपाचनकर्म निष्ठागमनकर्म धर्मदेशनाकर्म निर्माणादिकृत्यकर्म ज्ञानप्रवृत्तिकर्म अविकल्पनकर्म चित्राकारज्ञानकर्म ज्ञानाप्रवृत्तिकर्म विमुक्तिसामान्यज्ञानविशेषकर्म चारभ्योक्तं । सेयमनास्रवे धातौ निष्प्रपञ्चत्वादाकाशोपमे गाम्भीर्यप्रभेददेशना यथा रङ्गैराकाशचित्रणी[1] वेदितव्या ।

सर्वेषामविशिष्टापि तथता शुद्धिमागता ।
तथागतत्वं तस्माच्च तद्गर्भाः सर्वदेहिनः ॥ ३७ ॥

सर्वेषां निर्विशिष्टा तथता तद्विशुद्धिस्वभावश्च तथागतः । अतः सर्वे सत्वास्तथागतगर्भा इत्युच्यते। विभुत्वविभागे श्लोका एकादश ।

श्रावकाणां विभुत्वेन लौकिकस्याभिभूयते ।
प्रत्येकबुद्धेभ्यो मनः श्रावकस्याभिभूयते ॥ ३८ ॥
बोधिसत्वविभुत्वस्य तत्कलां नानुगच्छति ।
तथागतविभुत्वस्य तत्कलां नानुगच्छति ॥ ३९ ॥

आभ्यां तावद् द्वाभ्यां प्रभावोत्कर्षविशेषेण बुद्धानां विभुत्वं दर्शयति ।

अप्रमेयमचिन्त्यं च विभुत्वं बौद्धमिष्यते ।
यस्य यत्र यथा यावत्काले यस्मिन्प्रवर्तते ॥ ४० ॥

अनेन तृतीयेन प्रकारप्रभेदगाम्भीर्यविशेषाभ्यां कथमप्रमेयं कथं वाचिन्त्यमित्याह । यस्य पुद्गलस्यार्थे तत्प्रवर्तते यत्र लोकधातौ यथा तादृशैः प्रकारैर्यावदल्पं वा बहु वा यस्मिन्काले । अवशिष्टैः श्लोकैः मनोवृत्तिभेदेन विभुत्वभेदं दर्शयति ।

पञ्चेन्द्रियपरावृत्तौ विभुत्वं लभ्यते परं ।
सर्वार्थवृत्तौ सर्वेषां गुणद्वादशशतोदये[1] ॥ ४१ ॥

पञ्चेन्द्रियपरावृत्तौ द्विविधं विभुत्वं परमं लभ्यते । सर्वेषां पञ्चानामिन्द्रियाणां सर्वपञ्चार्थवृत्तौ । तत्र प्रत्येकं द्वादशगुणशतोत्पत्तौ ।

मनसो ऽपि परावृत्तौ विभुत्वं लभ्यते परं ।
विभुत्वानुचरे ज्ञाने निर्विकल्पे सुनिर्मले ॥ ४२ ॥

मनसः परावृत्तौ विभुत्वानुचरे निर्विकल्पे सुविशुद्धे ज्ञाने परमं विभुत्वं लभ्यते । येन सहितं सर्वं विभुत्वज्ञानं प्रवर्तते ।

सार्थोद्ग्रहपरावृत्तौ[2] विभुत्वं लभ्यते परं ।
क्षेत्रशुद्धौ यथाकामं भोगसंदर्शनाय हि ॥ ४३ ॥

अर्थपरावृत्तौ उद्ग्रहपरावृत्तौ च क्षेत्रविशुद्धिविभुत्वं परमं लभ्यते येन यथाकामं भोगसंदर्शनं करोति ।

विकल्पस्य परावृत्तौ विभुत्वं लभ्यते परं ।
अव्याघाते सदाकालं सर्वेषां ज्ञानकर्मणां ॥ ४४ ॥

विकल्पपरावृत्तौ सर्वेषां ज्ञानानां कर्मणां च सर्वकालमव्याघाते परमं विभुत्वं लभ्यते ।

प्रतिष्ठायाः परावृत्तौ विभुत्वं लभ्यते परं ।
अप्रतिष्ठितनिर्वाणं बुद्धानामचले[3] पदे ॥ ४५ ॥

प्रतिष्ठापरावृत्तावप्रतिष्ठितनिर्वाणं परमं विभुत्वं लभ्यते बुद्धानामनास्रवे धातौ ।

मैथुनस्य परावृत्तौ विभुत्वं लभ्यते परं ।
बुद्धसौख्यविहारे ऽथ दाराऽसंक्लेशदर्शने ॥ ४६ ॥

[1] *Citraṇā* (*citraṇī* dans le commentaire), mot nouveau. Le chinois traduit : *houa*, «tracé, dessin».



[1] Le pāda est hypermètre.

[2] *Udgraha*, mot nouveau, traduit par *cheou*, «recevoir» et dans le commentaire par *chi*, «vijñāna».

[3] Le ms. lit ainsi, mais le traducteur chinois a lu *acale*, puisque sa version porte *pou tong*, «non agité».

मैथुनस्य परावृत्तौ द्वयोर्बुद्धसुखविहारे च दाराऽसंक्लेशदर्शने च।

आकाशसंज्ञाव्यावृत्तौ विभुत्वं लभ्यते परं।
चिन्तितार्थसमृद्धौ च गतिरूपविभावने॥ ४७ ॥

आकाशसंज्ञाव्यावृत्तौ द्वयोरेव चिन्तितार्थसमृद्धौ च येन गगनगर्भो भवति। गतिरूपविभावने च यथेष्टगमनादाकाशवशीकरणाच्च [1]।

इत्यमेयपरावृत्तावमेयविभुता मता।
अचिन्त्यकृत्यानुष्ठानाद्बुद्धानाममलाश्रये॥ ४८ ॥

इत्यनेन मुखेनाप्रमेया परावृत्तिः। तत्र चाप्रमेयं विभुत्वमचिन्त्यकर्मानुष्ठानं बुद्धानामनास्रवे धातौ वेदितव्यं। तस्यैव बुद्धस्य सत्त्वपरिपाकनिमित्तत्वे सप्त श्लोकाः।

शुभे वृद्धो लोको व्रजति सुविशुद्धौ परमतां
शुभे चानारब्ध्वा व्रजति शुभवृद्धौ परमतां।
व्रजत्येवं लोको दिशि दिशि जिनानां सुकथितै-
रपक्वः पक्वो वा च पुनरशेषं ध्रुवमिह॥ ४९ ॥[2]

अनेन यादृशस्य परिपाकस्य निमित्तं भवति तद्दर्शयति। उपचितकुशलमूलानां च विमुक्तौ परमतायामनुपचितकुशलमूलानां च कुशलमूलोपचये। अपक्वः शुभवृद्धौ परमतां व्रजनपाकं व्रजति पक्वः सुविशुद्धौ परमतां व्रजति। एवं च नित्यकालं व्रजति न च निःशेषं लोकस्यानन्तत्वात्।

तथा कृत्वा चर्यां परमगुणयोगाद्भुतवतीं
महाबोधिं नित्यां ध्रुवमशरणानां च शरणं।
लभन्ते यद्धीरा ˘ ˘ ˘[3] गसदा सर्वसमयं
तदाश्चर्यं लोके सुविधिचरणान्नाद्भुतमपि॥ ५० ॥

अनेन द्वितीयेन परिपक्वानां बोधिसत्त्वानां परिपाकस्याश्चर्यं नाश्चर्यं।

[1] Ms. : आकाशीकरणाच्च. Mais le chinois traduit : «Parce qu'il arrive à annuler (*kiai*) l'espace».

[2] Mètre çikhariṇī jusqu'au vers 55.

[3] Lacune de trois syllabes brèves.



लक्षणं सदा सर्वसमयमिति नित्यं निरन्तरं च तदनुभूय मार्गचरणं सुविधिचरणं।

क्वचिद्धर्माश्चकं[1] बहुमुखशतैर्दर्शयति यः
क्वचिज्जन्मान्तर्धिं क्वचिदपि विचित्रां जनचरीं[2]।
क्वचित्कृत्स्नां बोधिं क्वचिदपि च निर्वाणमसकृत्
न च स्थानात्तस्माद्विचलति स सर्वं च कुरुते॥ ५१ ॥

अनेन तृतीयेन युगपद्बहुमुखपरिपाचनोपायप्रयोगे निमित्तत्वं दर्शयति। यथा यत्रस्थः सत्त्वान् विनयति। विचित्रा जनचरी जातकभेदेन। न च स्थानाच्चलतीत्यनास्रवाद्धातोः।

न बुद्धानामेवं भवति मम पक्वो ऽयमिति चा-
प्रपाच्यो ऽयं देही अपि च अधुना पाच्यत इति।
विना संस्कारं तु प्रपचमुपयात्येव जनता
शुभैर्धर्मैर्नित्यं दिशि दिशि समन्तात्त्रयमुखं॥ ५२ ॥

अनेन चतुर्थेन तत्परिपाकप्रयोगनिमित्तत्वमनभिसंस्कारेण दर्शयति। त्रयमुखमिति यानत्रयेण।

यथायत्नं भानुः प्रततविशदैरंशुविसरैः
प्रपाके सस्यानां दिशि समन्तात्प्रकुरुते।
तथा धर्मार्को ऽपि प्रशमविधिधर्मांशुविसरैः
प्रपाके सत्त्वानां दिशि दिशि समन्तात्प्रकुरुते॥ ५३ ॥

अनेन पञ्चमेनानभिसंस्कारपरिपाचनदृष्टान्तं दर्शयति।

यथैकस्माद्दीपाद्भवति सुमहान्दीपनिचयो
ऽप्रमेयो ऽसंख्येयो न च स पुनरेति व्ययमतः।
तथैकस्माद् बुद्धाद्भवति सुमहान् परिपाकनिचयो
ऽप्रमेयो ऽसंख्येयो न च पुनरेति व्ययमतः॥ ५४ ॥

[1] *Sic* ms. Le chinois dit : «Tantôt la loi, tantôt la suppression de la loi». Le mot signifie en tout cas : «se rapportant au dharma» et se construit avec *janma* et *antardhim*.

[2] *Janacarī*, mot nouveau. Le chinois ne le traduit pas, mais le commentaire montre que nous avons ici une sorte d'équivalent d'un composé *janma-caryā*.

अनेन षष्ठेन परंपरया परिपाचनं ।

यथा तोयैस्तृप्तिं व्रजति न महासागर इव
न वृद्धिं वा याति प्रततविषदाम्बुप्रविशनैः ।
तथा बौद्धो धातुः सततसमितैः शुद्धिविशनै-
र्न तृप्तिं वृद्धिं वा व्रजति परमाश्चर्यमिह तत् ॥ ५५ ॥

अनेन सप्तमेन परिपक्कानां विमुक्तिप्रवेशे समुद्रोदाहरणेन धर्मधातोरतृप्तिं चावकाशदानादवृद्धिं ध्यानाधिकत्वात् । धर्मधातुविशुद्धौ चत्वारः श्लोकाः ।

सर्वधर्मद्वयावारतथताशुद्धिलक्षणः ।
वस्तुज्ञानतदालम्बवशिताक्षयलक्षणः ॥ ५६ ॥[1]

एष स्वभावार्थमारभ्यैकः श्लोकः । क्लेशज्ञेयावरणद्वयात्सर्वधर्मतथताविशुद्धिलक्षणश्च । वस्तुतदालम्बनज्ञानयोरक्षयवशितालक्षणश्च ।

सर्वतस्तथताज्ञानभावना समुदागमः ।
सर्वसत्वद्वयाधानसर्वथाऽक्षयता फलं ॥ ५७ ॥

एष हेत्वर्थं फलार्थं चारभ्य द्वितीयः श्लोकः । सर्वतस्तथताज्ञानभावना धर्मधातुविशुद्धिहेतुः । सर्वत इति सर्वधर्मपर्यायमुखैः । सर्वसत्वानां सर्वथा हितसुखद्वयाधानाक्षयता फलं ।

कायवाक्चित्तनिर्माणप्रयोगोपायकर्मकः ।
समाधिधारणीद्वारद्वयामेयसमन्वितः ॥ ५८ ॥

एष कर्मार्थं योगार्थं चारभ्य तृतीयः श्लोकः । त्रिविधं कायादिनिर्माणं कर्म समाधिधारणीमुखाभ्यां द्वयेन चाप्रमेयेण पुण्यज्ञानसंभारेण समन्वागमो योगः ।

स्वभावधर्मसंभोगनिर्माणैर्भिन्नवृत्तिकः ।
धर्मधातुर्विशुद्धो ऽयं बुद्धानां समुदाहृतः ॥ ५९ ॥

(1) Mètre anuṣṭubh jusqu'au vers 81.



एष वृत्त्यर्थमारभ्य चतुर्थः श्लोकः । स्वाभाविकसांभोगिकनैर्माणिककायवृत्त्या[1] भिन्नवृत्तिकः । बुद्धकायविभागे सप्त श्लोकाः ।

स्वाभाविको ऽथ सांभोग्यः[1] कायो नैर्माणिको ऽपरः ।
कायभेदा हि बुद्धानां प्रथमस्तु द्वयाश्रयः ॥ ६० ॥

त्रिविधः कायो बुद्धानां । स्वाभाविको धर्मकाय आश्रयपरावृत्तिलक्षणः । सांभोगिको येन पर्षन्मण्डलेषु धर्मसंभोगं करोति । नैर्माणिको येन निर्माणेन सत्वार्थं करोति ।

सर्वधातुषु सांभोग्यो भिन्नो गणपरिग्रहैः ।
क्षेत्रैश्च नामभिः कायैर्धर्मसंभोगचेष्टितैः ॥ ६१ ॥

तत्र सांभोगिकः सर्वलोकधातुषु पर्षन्मण्डलबुद्धक्षेत्रनामशरीरधर्मसंभोगक्रियाभिर्भिन्नः ।

समः सूक्ष्मश्च तच्छ्लिष्टः कायः स्वाभाविको मतः ।
संभोगविभुताहेतुर्यथेष्टं भोगदर्शने ॥ ६२ ॥

स्वाभाविकः सर्वबुद्धानां समो निर्विशिष्टतया । सूक्ष्मो दुर्ज्ञानतया । तेन सांभोगिकेन कायेन संबद्धः संभोगविभुत्वे च हेतुर्यथेष्टं भोगदर्शनाय ।

अमेयं बुद्धनिर्माणं कायो नैर्माणिको मतः ।
द्वयोर्द्वयार्थसंपत्तिः सर्वाकारा प्रतिष्ठिता ॥ ६३ ॥

नैर्माणिकस्तु कायो बुद्धानामप्रमेयप्रभेदं बुद्धनिर्माणं सांभोगिकः स्वार्थसंपत्तिलक्षणः । नैर्माणिकः परार्थसंपत्तिलक्षणः । एवं द्वयार्थसंपत्तिर्यथाक्रमं द्वयोः प्रतिष्ठिता सांभोगिके च काये नैर्माणिके च ।

शिल्पजन्ममहाबोधिसदानिर्वाणदर्शनैः ।
बुद्धनिर्माणकायो ऽयं महामायो विमोचने ॥ ६४ ॥

स पुनर्निर्माणकायः सदा विनेयार्थं शिल्पस्य वीणावादनादिभिः । जन्म-

(1) *Sāṃbhogya*, *sāṃbhogika*, mots nouveaux.

नस्याभिसंबोधेश्च निर्वाणस्य च दर्शनैर्विमोचने महोपायत्वात्परार्थसंपत्तिलक्षणो वेदितव्यः ।

त्रिभिः कायैस्तु विज्ञेयो बुद्धानां कायसंग्रहः ।
साश्रयः स्वपरार्थो यस्त्रिभिः कायैर्निदर्शितः ॥ ६५ ॥

त्रिभिश्च कायैर्बुद्धानां सर्वकायसंग्रहो वेदितव्यः । एभिस्त्रिभिः कायैः साश्रयः स्वपरार्थो निदर्शितः । द्वयोः स्वपरार्थप्रभावितत्वात् द्वयोश्च तदाश्रितत्वाद्यथा पूर्वमुक्तं ।

आश्रयेणाशयेनापि कर्मणा ते समा मताः ।
प्रकृत्या ऽस्रंसनेनापि प्रबन्धेनैषु नित्यता ॥ ६६ ॥

त च त्रयः कायाः सर्वबुद्धानां यथाक्रमं त्रिभिर्निर्विशेषा आश्रयेण धर्मधातोरभिन्नत्वात् आशयेन पृथक् बुद्धाशयस्याभावात् । कर्मणा च साधारणकर्मकत्वात् । तेषु च त्रिषु कायेषु यथाक्रमं त्रिविधा नित्यता वेदितव्या येन नित्यकायास्तथागता उच्यन्ते। प्रकृत्या नित्यता स्वाभाविकस्य स्वभावेन नित्यत्वात् । अस्रंसनेन सांभोगिकस्य धर्मसंभोगाविच्छेदात् । प्रबन्धेन नैर्माणिकस्यान्तर्व्यये पुनः पुनर्निर्माणदर्शनात्। बुद्धज्ञानविभागे दश श्लोकाः ।

आदर्शज्ञानमचलं त्रयज्ञानं तदाश्रितं ।
समताप्रत्यवेक्षायां कृत्यानुष्ठान एव च ॥ ६७ ॥

चतुर्विधं बुद्धानां ज्ञानमादर्शज्ञानं समताज्ञानं प्रत्यवेक्षाज्ञानं कृत्यानुष्ठानज्ञानं च। आदर्शज्ञानमचलं त्रीणि ज्ञानानि तदाश्रितानि चलानि ।

आदर्शज्ञानमममापरिच्छिन्नं सदानुगं ।
सर्वज्ञेयेष्वसंमूढं न च तेष्वामुखं सदा ॥ ६८ ॥

आदर्शज्ञानमममममपरिच्छिन्नं देशतः सदानुगं कालतः । सर्वज्ञेयेष्वसंमूढं सदावरणविगमात् न च तेष्वामुखमनाकारत्वात् ।

सर्वज्ञाननिमित्तत्वान्महाज्ञानाकरोपमं ।
संभोगबुद्धताज्ञानप्रतिबिम्बोदयाच्च तत् ॥ ६९ ॥



तेषां च समतादिज्ञानानां सर्वप्रकाराणां हेतुत्वात्सर्वज्ञानानामाकरोपमं । संभोगबुद्धत्वतज्ज्ञानप्रतिबिम्बोदयाच्च तदादर्शज्ञानमित्युच्यते ।

सत्वेषु समताज्ञानं भावनाशुद्धितो ऽमलं ।
अप्रतिष्ठसमाविष्टं समताज्ञानमिष्यते ॥ ७० ॥

यद्बोधिसत्वेनाभिसमयकालेषु समताज्ञानं प्रतिलब्धं तद्भावनाशुद्धितो बोधिप्राप्तस्याप्रतिष्ठितनिर्वाणे निविष्टं समताज्ञानमिष्यते ।

महामैत्रीकृपाभ्यां च सर्वकालानुगं मतं ।
यथाधिमोक्षं सत्वानां बुद्धबिम्बनिदर्शकं ॥ ७१ ॥

महामैत्रीकरुणाभ्यां सर्वकालानुगं यथाधिमोक्षं च सत्वानां बुद्धबिम्बनिदर्शकं। यतः केचित्सत्वास्तथागतं नीलवर्णं पश्यन्ति केचित्पीतवर्णमित्येवमादि।

प्रत्यवेक्षणकं ज्ञाने ज्ञेयेष्वव्याहतं सदा ।
धारणीनां समाधीनां निधानोपममेव च ॥ ७२ ॥
परिषन्मण्डले सर्वविभूतीनां निदर्शकं ।
सर्वसंशयविच्छेदि महाधर्मप्रवर्षकं ॥ ७३ ॥

प्रत्यवेक्षणकं ज्ञानं यथाश्लोकं।

कृत्यानुष्ठानताज्ञानं निर्माणैः सर्वधातुषु ।
चित्राप्रमेयाचिन्त्यैश्च सर्वसत्वार्थकारकं ॥ ७४ ॥

कृत्यानुष्ठानज्ञानं सर्वलोकधातुषु निर्माणैर्नानाप्रकारैरप्रमेयैरचिन्त्यैश्च सर्वसत्वार्थकरं ।

कृत्यनिष्पत्तिभिर्भेदैः संख्याक्षेत्रैश्च सर्वदा ।
अचिन्त्यं बुद्धनिर्माणं विज्ञेयं तच्च सर्वथा ॥ ७५ ॥

तच्च बुद्धनिर्माणं सदा सर्वथा चाचिन्त्यं वेदितव्यं । कृत्यक्रियाभेदतः संख्यातक्षेत्रतश्च ।

धारणात्समचित्ताच्च सम्यग्धर्मप्रकाशनात् ।
कत्यानुष्ठानतश्चैव चतुर्ज्ञानसमुद्भवः ॥ ७६ ॥

तत्र धारणात् श्रुतानां धर्माणां। समचित्तता सर्वसत्त्वेष्वात्मपरसमतया। शेषं गतार्थं। बुद्धानेकत्वापृथक्त्वे श्लोकः।

गोत्रभेदादवैयर्थ्यात्साकल्यादप्यनादितः।
अभेदान्नैकबुद्धत्वं बहुत्वं चामलाश्रये ॥ ७७ ॥

एक एव बुद्ध इत्येतन्नेष्यते। किं कारणं। गोत्रभेदात्। अनन्ता हि बुद्धगोत्राः सत्त्वाः। तत्रैक एवाभिसंबुद्धो नान्येऽभिसंभोत्स्यन्त इति। कुत एतत्। पुण्यज्ञानसंभारवैयर्थ्यं च स्यादन्येषां बोधिसत्त्वानामनभिसंबोधान्न च युक्तं वैयर्थ्यं। तस्मादवैयर्थ्यादपि नैक एव बुद्धः सत्त्वार्थक्रियासाकल्यं च न स्यात्। बुद्धस्य बुद्धत्वे कस्यचिदप्रतिष्ठापनादेतच्च न युक्तं। न च कश्चिदादिबुद्धोऽस्ति विना संभारेण बुद्धत्वायोगाद्विना चान्येन बुद्धेन संस्थानायोगादित्यनादित्वादप्येको बुद्धो न युक्तः। बहुत्वमपि नेष्यते बुद्धानां धर्मकायस्याभेदादनास्रवे धातौ। बुद्धत्वोपायप्रवेशे चत्वारः श्लोकाः।

याऽविद्यमानता सैव परमा विद्यमानता।
सर्वथाऽनुपलम्भश्च उपलम्भः परो मतः ॥ ७८ ॥

या परिकल्पितेन स्वभावेनाविद्यमानता सैव परमा विद्यमानता परिनिष्पन्नेन स्वभावेन। यश्च सर्वथाऽनुपलम्भः परिकल्पितस्य स्वभावस्य स एव परम उपलम्भः परिनिष्पन्नस्वभावस्य।

भावना परमा चेष्टा भावनामविपश्यतां।
प्रतिलम्भः परश्चेष्टः प्रतिलम्भं न पश्यतां ॥ ७९ ॥

सैव परमा भावना यो भावनाया अनुपलम्भः। स एव परमः प्रतिलम्भो यः प्रतिलम्भानुपलम्भः।

पश्यतां गुरुत्वं दीर्घं निमित्तं वीर्यमात्मनः।
मानिनां बोधिसत्त्वानां दुरे बोधिर्निरूप्यते ॥ ८० ॥

ये च गुरुत्वं बुद्धत्वं पश्यन्ति अद्भुतधर्मयुक्तं। दीर्घं च कालं पश्यन्ति तत्समुदागमाय। निमित्तं च पश्यन्ति चित्तालम्बनं। आत्मनश्च वीर्यं वयमारब्धवीर्या बुद्धत्वं प्राप्स्याम इति। तेषामेवंमानिनां बोधिसत्त्वानामौपलम्भिकत्वात्[1] दूरे बोधिर्निरूप्यते।



पश्यतां कल्पनामात्रं सर्वमेतद्यथोदितं।
अकल्पबोधिसत्त्वानां प्राप्ता बोधिर्निरूप्यते ॥ ८१ ॥

कल्पनामात्रं त्वेतत्सर्वमिति पश्यतां तस्यापि कल्पनामात्रस्याविकल्पनादकल्पबोधिसत्त्वानामनुत्पत्तिकधर्मक्षान्तिलाभावस्थायामथतः प्राप्तैव बोधिरित्युच्यते। बुद्धानामन्योन्यनैककार्यत्वे चत्वारः श्लोकाः।

भिन्नाश्रया भिन्नजलाश्च नद्यः अल्पोदकाः कृत्यपृथक्त्वकार्याः।
जलाश्रितप्राणितनूपभोग्या भवन्ति पातालमसंप्रविष्टाः ॥ ८२ ॥[2]
समुद्रविष्टाश्च भवन्ति सर्वा एकाश्रया एकमहाजलाश्च।
मिश्रैककार्याश्च महोपभोग्या जलाश्रितप्राणिगणस्य नित्यं ॥ ८३ ॥
भिन्नाश्रया भिन्नमताश्च धीराः स्वल्पावबोधाः पृथगात्मकृत्याः।
परीत्तसत्त्वार्थसदोपभोग्या भवन्ति बुद्धत्वमसंप्रविष्टाः ॥ ८४ ॥
बुद्धत्वविष्टाश्च भवन्ति सर्वे एकाश्रया एकमहावबोधाः।
मिश्रैककार्याश्च महोपभोग्याः सदा महासत्त्वगणस्य ते हि ॥ ८५ ॥

तत्र भिन्नाश्रया नद्यः स्वभाजनभेदात्। कृत्यपृथक्त्वकार्याः पृथक्त्वेन कृत्यकरणात्। तनूपभोग्या इत्यल्पानामुपभोग्याः। शेषं गतार्थं। बुद्धत्वप्रोत्साहने श्लोकः।

इतिनिरुपमशुक्लधर्मयोगाद्धितसुखहेतुतया च बुद्धभूमेः।
शुभपरमसुखाक्षयाकरत्वात् शुभमतिरर्हति बोधिचित्तमाप्तुं ॥ ८६ ॥[3]

निरुपमशुक्लधर्मयोगात् स्वार्थसंपत्तितः। हितसुखहेतुत्वाच्च बुद्धत्वस्य परार्थसंपत्तिः। अनवद्योत्कृष्टाक्षयसुखाकरत्वाच्च सुखविहारो विशेषतः। बुद्धिमानहीनबोधिचित्तमादातुं तत्प्रणिधानपरिग्रहात्।

## महायानसूत्रालंकारे बोध्यधिकारो नवमः

[1] *Aupalambhikatva*, mot nouveau, dérivé de *aupalambhika*, q. cf. Çikṣa-samuccaya, Index II, s. v.

[2] Mètre upajati jusqu'au vers 85.

[3] Mètre puṣpitagra.



IMPRIMERIE NATIONALE.

# X

उद्दानं।

आदिः सिद्धिः शरणं गोत्रं चित्ते तथैव चोत्पादः।
स्वपरार्थस्तत्वार्थः प्रभावपरिपाकबोधिश्च ॥ १ ॥[1]

एष च बोध्यधिकार आदिमारभ्य यावत् बोधिपटलानुसारेणानुगन्तव्यः। अधिमुक्तिप्रभेदलक्षणविभागे श्लोकौ।

जाताजाता ग्राहिका ग्राह्यभूता मित्रादात्ता स्वात्मतो भ्रान्तिका च।
अभ्रान्तान्या आमुखा नैव चान्या घोषाचारा चैषिका[2] चेक्षिका च॥ २ ॥[3]

जाता अतीतप्रत्युत्पन्ना। अजाता अनागता। ग्राहिका आध्यात्मिको ययालम्बनमधिमुच्यते। ग्राह्यभूता बाह्या यानालम्बनत्वेनाधिमुच्यते। मित्रादात्ता औदारिकी। स्वात्मतः सूक्ष्मा। भ्रान्तिका हीना विपरीताधिमोक्षात्। अभ्रान्तिका प्रशान्ता। आमुखा अन्तिके समवहितप्रत्ययत्वात्। अनामुखा दूरे विपर्ययात्। घोषाचारा श्रुतमयी। एषिका चिन्तामयी। ईक्षिका भावनामयी प्रत्यवेक्षणात्।

हार्या कीर्णा ऽव्यावकीर्णा विपक्षैर्हीनोदारा आवृता ऽनावृता च।
युक्ता ऽयुक्ता संभृता ऽसंभृता च गाढं विष्टा दूरगा चाधिमुक्तिः ॥ ३ ॥

हार्या मृद्वी। व्यवकीर्णा मध्या। अव्यवकीर्णा विपक्षैरधिमात्रा। हीना ऽन्ययाने। उदारा महायाने। आवृता सावरणा विशेषगमनाय। अनावृता निरावरणा। युक्ता सातत्यसत्कृत्यप्रयोगात्। अयुक्ता तद्विरहिता। संभृताधि-

(1) Mètre āryā. Ce vers, qui consiste simplement dans la table des matières de la première section, manque en chinois.

(2) *Eṣikā*, féminin de l'adjectif *eṣaka*, mot nouveau, glosé dans le commentaire par *cintāmaya*. Le chinois le traduit par *k'iou yi*, « chercher le sens ».

(3) Mètre çālinī jusqu'au vers 3.



गमयोग्या। असंभृता विपर्ययात्। गाढं विष्टा भूमिप्रविष्टा। दूरगा परिशिष्टासु भूमिषु। अधिमुक्तिपरिपन्थे[1] त्रयः श्लोकाः।

अमनस्कारबाहुल्यं कौशीद्यं योगविभ्रमः।
कुमित्रं शुभदौर्बल्यमयोनिशोमनस्क्रिया ॥ ४ ॥[2]

जाताया अमनसिकारबाहुल्यं परिपन्थः। अजातायाः कौशीद्यं ग्राह्यग्राहकभूताया योगविभ्रमस्तथैवाभिनिवेशात्। मित्रादात्तायाः कुमित्रं विपरीतग्राहणात्। स्वात्मतो ऽधिमुक्तेः कुशलमूलदौर्बल्यं। अभ्रान्ताया अयोनिशो अमनसिकारः परिपन्थस्तद्विरोधित्वात्।

प्रमादो ऽल्पश्रुतत्वं च श्रुतचिन्ताल्पतुष्टता।
शममात्राभिमानश्च तथा ऽपरिजयो मतः ॥ ५ ॥

आमुखायाः प्रमादस्तस्या अप्रमादकृतत्वात्। घोषाचाराया अल्पश्रुतत्वं नीतार्थसूत्रान्ताश्रवणात्। एषिकायाः श्रुतमात्रसंतुष्टत्वमल्पचिन्तासंतुष्टत्वं च। ईक्षिकायाश्चिन्तामात्रसंतुष्टत्वं शमथमात्राभिमानश्च। हार्याव्यवकीर्णयोरपरिजयः परिपन्थः।

अनुद्वेगस्तथोद्वेग आवृतिश्चाप्ययुक्तता।
असंभृतिश्च विज्ञेया ऽधिमुक्तिपरिपन्थता ॥ ६ ॥

हीनाया अनुद्वेगः संसारात्। उदाराया उद्वेगः। अनावृतायाश्चावृतिः। युक्ताया अयुक्तता। संभृताया असंभृतिः परिपन्थः। अधिमुक्तावनुशंसे पञ्च श्लोकाः।

पुण्यं महदकौकृत्यं सौमनस्यं सुखं महत्।
अविप्रणाशः स्थैर्यं च विशेषगमनं तथा ॥ ७ ॥
धर्माभिसमयश्चाथ स्वपरार्थाप्तिरुत्तमा।
क्षिप्राभिज्ञत्वमेते हि अनुशंसाधिमुक्तितः ॥ ८ ॥

जातायां प्रत्युत्पन्नायां पुण्यं महत्। अतीतायामकौकृत्यमविप्रतिसारात्। ग्राहिकायां ग्राह्यभूतायां च महत्सौमनस्यं समाधियोगात्। कल्याणमित्र-

(1) *Paripantha*, mot nouveau, synonyme de *paripanthin*.

(2) Mètre anuṣṭubh jusqu'au vers 9.

जनितायामविप्रणाशः । स्वयमधिमुक्तौ स्थैर्यं । भ्रान्तिकायामामुखायां श्रुतमयादिकायां च यावत् मध्यायां विशेषगमनं । अधिमात्रायां धर्माभिसमयः । हीनायां स्वार्थप्राप्तिः । उदारायां परार्थप्राप्तिः परमा । अनावृतयुक्तसंभृतादिषु शुक्लपक्षासु क्षिप्राभिज्ञत्वमनुशंसः ।

कामिनां सा श्वसदृशी कूर्मप्रख्या समाधिनां[1] ।
भृत्योपमा स्वार्थिनां सा राजप्रख्या परार्थिनां ॥ ९ ॥

यथा श्वा दुःखार्तः सततमवितृप्तः क्षुधितको यथा कूर्मश्चासौ जलविवरके संकुचितकः । यथा भृत्यो नित्यमुपचकितमूर्तिर्विचरति । यथा राजा राज्ञां विषये वशवर्ती विहरति ।

तथा कामिस्थातृस्वपरजनकृत्यार्थमुदिते[2]
विशेषो विज्ञेयः सततमधिमुक्त्या विविधया ।
महायाने तस्य विधिवदिह मत्वा परमतां
भृशं तस्मिन् धीरः सततमिह तामेव वृणुयात् ॥ १० ॥[3]

अपि खलु कामिनामधिमुक्तिः श्वसदृशी लौकिकसमाधिगतानां कूर्मप्रख्या स्वार्थवतां भृत्योपमा । राजप्रख्या परार्थवतां । एतमेवार्थं परेणोपपाद्य महायानाधिमुक्तौ समादापयति । अधिमुक्तिलयप्रतिषेधे श्लोकाः ।

मनुष्यभूताः संबोधिं प्राप्नुवन्ति प्रतिक्षणं ।
अप्रमेया यतः सत्वा लयं नातोऽधिवासयेत् ॥ ११ ॥[4]

त्रिभिः कारणैर्लयो न युक्तः । यतो मनुष्यभूता बोधिं प्राप्नुवन्ति । नित्यं प्राप्नुवन्ति । अप्रमेयाश्च प्राप्नुवन्ति । अधिमुक्तिपुण्यविशेषणे द्वौ श्लोकौ ।

यथा पुण्यं प्रसवते परेषां भोजनं ददत् ।
न तु स्वयं स भुञ्जानस्तथा पुण्यमहोदयः ॥ १२ ॥

(1) *Samādhin*, mot nouveau. Le chinois traduit : «Les hommes qui pratiquent les samādhis hétérodoxes». C'est exactement la glose fournie par le commentaire du vers suivant : *laukikasamādhigata*.

(2) La lecture *sthātṛ* n'est pas douteuse; le mot pourrait paraître suspect comme équivalent de *samādhin*, mais dans le commentaire sur XI, 42, *sthāna* (équivalent abrégé de *nāmni sthāna*, XI, 6 et 33) et *samādhi* sont employés comme synonymes.

(3) Mètre çikhariṇī.

(4) Mètre anuṣṭubh jusqu'au vers 13.



सूत्रोक्तो लभ्यते धर्मात्परार्थाश्रयदेशितात् ।
न तु स्वार्थाश्रयाद्धर्माद्देशितादुपलभ्यते ॥ १३ ॥

यथा भोजनं ददतः[1] पुण्यमुत्पद्यते परार्थाधिकारात् । न तु स्वयं भुञ्जानस्य स्वार्थाधिकारात् । एवं परार्थाश्रयदेशितात् महायानधर्मात्तेषु तेषु सूत्रेषूक्तः पुण्योदयो महाँल्लभ्यते । न तु स्वार्थाश्रयदेशितात् श्रावकयानधर्मात् । अधिमुक्तिफलपरिग्रहे श्लोकः ।

इति विपुलगतौ महोघधर्मे जनिय[2] सदा मतिमान्महाधिमुक्तिं ।
विपुलसततपुण्यतद्विवृद्धिं व्रजति गुणैरसमैर्महात्मतां च ॥ १४ ॥[3]

यत्र यादृश्याधिमुक्त्या यो यत्फलं परिगृह्णाति । विस्तीर्णे महायानधर्मेऽपरिणीययोदाराधिमुक्त्या मतिमान्[4] त्रिविधं फलं परिगृह्णाति । विपुलपुण्यवृद्धिं तस्या एवाधिमुक्तेर्वृद्धिं तद्धेतुकां चातुल्यगुणमहात्मतां बुद्धत्वं ।

महायानसूत्रालंकारे अधिमुक्त्यधिकारो दशमः

## XI

धर्मपर्येष्ट्यधिकारे आलम्बनपर्येष्टौ चत्वारः श्लोकाः ।

पिटकत्रयं द्वयं वा संग्रहतः कारणैर्नवभिरिष्टं ।
वासनबोधनशमनप्रतिवेधैस्तद्विमोचयति ॥ १ ॥[5]

पिटकत्रयं सूत्रविनयाभिधर्माः । तदेव त्रयं हीनयानाग्रयानभेदेन द्वयं भवति । श्रावकपिटकं बोधिसत्वपिटकं च । तत्पुनस्त्रयं द्वयं वा केनार्थेन पिटकमित्याह । संग्रहतः सर्वज्ञेयार्थसंग्रहाद्वेदितव्यं । केन कारणेन त्रयं । नवभिः कारणैर्विचिकित्साप्रतिपक्षेण सूत्रं यो यत्रार्थे संशयितस्तस्य तन्निश्चयार्थं देशनात् । अन्तद्वयानुयोगप्रतिपक्षेण विनयः सावद्यपरिभोगप्रतिषेधतः कामसुखल्लिकानुयोगान्तस्यानवद्यपरिभोगानुज्ञानत आत्मक्लमथानुयोगान्तस्य । स्वयंदृष्टिपरामर्षप्रतिपक्षेणाभिधर्मोऽविपरीतधर्मलक्षणाभिद्योतनात् ।

(1) Ms. : दत्तः.

(2) *Janiya*, garanti par le mètre, est un absolutif incorrect de *janayati*.

(3) Mètre puṣpitāgrā.

(4) Je me suis abstenu ici, comme ailleurs, de rétablir le sandhi grammatical.

(5) Mètre āryā jusqu'au vers 4.

पुनः शिक्षात्रयदेशना सूत्रेण अधिशीलाधिचित्तसंपादनता विनयेन शीलवतोऽविप्रतिसारादविप्रतिसारेण[1] समाधिलाभात्। अधिप्रज्ञासंपादनाभिधर्मेणाविपरीतार्थप्रविचयात्। पुनर्धर्मार्थदेशना सूत्रेण। धर्मार्थनिष्पत्तिर्विनयेन क्लेशविनयसंयुक्तस्य तयोः प्रतिवेधात्। धर्मार्थसांकथ्यविनिश्चयकौशल्यमभिधर्मेणेति। एभिर्नवभिः कारणैः पिटकत्रयमिष्टं। तच्च संसाराद्विमोचनार्थं। कथं पुनस्तद्विमोचयति। वासनबोधनशमनप्रतिवेधैस्तद्विमोचयति। श्रुतेन चित्तवासनतः। चिन्तया बोधनतः। भावनया शमथेन शमनतः। विपश्यनया प्रतिवेधतः।

सूत्राभिधर्मविनयाश्चतुर्विधार्था मताः समासेन।
तेषां ज्ञानाद्धीमान्सर्वाकारज्ञतामेति ॥ २ ॥

ते च सूत्रविनयाभिधर्माः प्रत्येकं चतुर्विधार्थाः समासतस्तेषां ज्ञानाद्बोधिसत्वः सर्वज्ञतां प्राप्नोति। श्रावकस्त्वेकस्या अपि गाथाया अर्थमाज्ञायास्रवक्षयं प्राप्नोति।

आश्रयतो लक्षणतो धर्मादर्थाच्च सूचनात्सूत्रं।
अभिमुखतोऽथाभीक्ष्ण्यादभिभवगतितोऽभिधर्मश्च ॥ ३ ॥

कथं प्रत्येकं चतुर्विधार्थः। आश्रयलक्षणधर्मार्थसूचनात्सूत्रं। तत्राश्रयो यत्र देशे देशितं येन यस्मै च। लक्षणं संवृतिसत्यलक्षणं परमार्थसत्यलक्षणं च। धर्माः स्कन्धायतनधात्वाहारप्रतीत्यसमुत्पादादयः। अर्थोऽनुसंधिः। अभिमुखत्वादभीक्ष्णत्वादभिभवनादभिगमनाच्चाभिधर्मो वेदितव्यः। निर्वाणाभिमुखो धर्मोऽभिधर्मः सत्यबोधिपक्षविमोक्षमुखादिदेशनात्। अभीक्ष्णं धर्मोऽभिधर्म एकैकस्य धर्मस्य रूप्यरूपिसनिदर्शनादिप्रभेदेन बहुलनिर्देशात्। अभिभवतीत्यभिधर्मः परप्रवादाभिभवनाद्विवादाधिकरणादिभिः। अभिगम्यते सूत्रार्थ एतेनेत्यभिधर्मः।

आपत्तेरुत्थानाद्व्युत्थानान्निःसृतेश्च विनयत्वं।
पुद्गलतः प्रज्ञप्तेः प्रविभागविनिश्चयाच्चैव ॥ ४ ॥

आपत्तितः समुत्थानतो व्युत्थानतो निःसरणतश्च वेदितव्यः। तत्रापत्तिः

[1] Ms. : ऽविप्रतिसारादिनेमण. Le chinois garantit la restitution que j'ai introduite dans le texte.



पञ्चापत्तिनिकायाः। समुत्थानमापत्तीनामज्ञानात्प्रमादात् क्लेशप्राचुर्यादनादराच्च। व्युत्थानमाशयतो न दण्डकर्मतः। निःसरणं सप्तविधं। प्रतिदेशना। अभ्युपगमः शिक्षादत्तकादीनां दण्डकर्मणः। समवद्योतः[1] प्रज्ञप्ते शिक्षापदे पुनः पर्यायेण। अज्ञानात्प्रस्रब्धिः समग्रेण संघेन शिक्षापदस्य प्रतिप्रस्रम्भणात्। आश्रयपरिवृत्तिर्भिक्षुभिक्षुण्योः स्त्रीपुरुषव्यञ्जनपरिवर्तनादसाधारणा वेदा-[2]पत्तिः। भूतप्रत्यवेक्षा धर्मोद्दानाकारैः प्रत्यवेक्षाविशेषः। धर्मताप्रतिलम्भश्च सत्यदर्शनेन क्षुद्रानुक्षुद्रापन्नाभावे[3] धर्मप्रतिलम्भात्। पुनश्चतुर्विधेनार्थेन विनयो वेदितव्यः। पुद्गलतो यमागम्य शिक्षा प्रज्ञप्यते। प्रज्ञप्तितो यदाऽरोचिते पुद्गलापराधे शास्ता संनिपात्य संघशिक्षां प्रज्ञापयति। प्रविभागतो यः प्रज्ञप्ते शिक्षापदे तदुद्देशस्य विभागः। विनिश्चयतश्च तत्रापत्तिः कथं भवत्यनापत्तिर्वेति निर्धारणात्। आलम्बनलाभपर्येष्टौ त्रयः श्लोकाः।

आलम्बनं मतो धर्मः अध्यात्मं बाह्यकं . . . . ।
. . . . . . . . . . . . . . . . . . . . . . . . . . . . ॥ ५ ॥[4]

. . . . . बाह्यमाध्यात्मिकं बाह्यं च। तत्र ग्राहकभूतं कायादिकमाध्यात्मिकं ग्राह्यभूतं बाह्यं तयोरेव तथताद्वयं। तत्र द्वयोराध्यात्मिकबाह्ययोरालम्बनयोर्द्वयार्थेन लाभो यथाक्रमं। यदि ग्राह्यार्थाद्ग्राहकार्थमभिन्नं पश्यति ग्राहकार्थाच्च ग्राह्यार्थं द्वयस्य पुनः समस्तस्याध्यात्मिकबाह्यालम्बनस्य तथताया लाभस्तयोरेव द्वयोरनुपलम्भाद्वेदितव्यः।

मनोजल्पैर्यथोक्तार्थप्रसन्नस्य प्रधारणात्।[5]
अर्थख्यानस्य जल्पाच्च नाम्नि स्थानाच्च चेतसः ॥ ६ ॥

[1] *Samavadyota*, mot nouveau. Le chinois traduit *kai hiu*, «expliquer en surplus». Cf. *avadyotayati*, «rappeler au souvenir, éclaircir».

[2] *Sic* ms. Le chinois a simplement *pou kong tsoei*, «pas de péché en commun».

[3] *Anukṣudra*, mot nouveau : «kṣudra secondaire». Le chinois omet ce mot.

[4] Mètre anuṣṭubh jusqu'au vers 12. — La fin du vers 5 et le commencement du commentaire manquent. Une ligne entière a été omise dans le manuscrit.

[5] *Pradhāraṇam*, mot nouveau, glosé dans le commentaire par *pravicaya*, «le tri». Le chinois traduit littéralement par *tch'e*, «maintenir».

धर्मालम्बनलाभः स्यात्त्रिभिर्ज्ञानैः श्रुतादिभिः
त्रिविधालम्बनलाभश्च[1] पूर्वोक्तस्तत्समाश्रितः ॥ ७

धर्मालम्बनलाभः पुनस्त्रिभिर्ज्ञानैर्भवति श्रुतचिन्ताभावनामयैः । तत्र समाहितेन चेतसा मनोजल्पैर्यथोक्तार्थप्रसन्नस्य तत्प्रधारणात् । श्रुतमयेन ज्ञानेन तल्लाभः मनोजल्पैरिति संकल्पैः । प्रसन्नस्येत्यधिमुक्तस्य निश्चितस्य । प्रधारणादिति प्रविचयात् । जल्पादर्थख्यानस्य प्रधारणाच्चिन्तामयेन तल्लाभः । यदि मनोजल्पादेवायमर्थः ख्यातीति पश्यति नान्यन्मनोजल्पाद्यथोक्तं द्वयालम्बनलाभे । चित्तस्य नाम्नि स्थानात् भावनामयेन ज्ञानेन तल्लाभो वेदितव्यो द्वयानुपलम्भाद्यथोक्तं द्वयालम्बनलाभे । अत एव च स पूर्वोक्तस्त्रिविधालम्बनलाभो धर्मालम्बनलाभसंनिश्रितो वेदितव्यः । मनसिकारपर्येष्टौ पञ्च श्लोकाः ।

त्रिधातुकः कृत्यकरः ससंबाधाश्रयोऽपरः ।
अधिमुक्तिनिवेशी च तीव्रच्छन्दकरोऽपरः ॥ ८ ॥
हीनपूर्णाश्रयो द्वेधा सजल्पोऽल्पजल्प एव च ।
ज्ञानेन संप्रयुक्तश्च योगोपनिषदात्मकः[2] ॥ ९ ॥
संभिन्नालम्बनश्चासौ विभिन्नालम्बनः स च ।
पञ्चधा सप्तधा चैव परिज्ञा पञ्चधाऽस्य च ॥ १० ॥
चत्वारः सप्त त्रिंशच्च आकारा भावनागताः ।
मार्गद्वयस्वभावोऽसौ ह्यनुशंसः प्रतीच्छकः ॥ ११ ॥
प्रयोगी वशवर्ती च परीत्तो विपुलात्मकः ।
योगिनां हि मनस्कार एष सर्वात्मको मतः ॥ १२ ॥

अष्टादशविधो मनस्कारः । धातुनियतः कृत्यकर आश्रयविभक्तोऽधिमुक्तिनिवेशकश्छन्दजनकः समाधिसंनिश्रितो ज्ञानसंप्रयुक्तः संभिन्नालम्बनो विभिन्नालम्बनः परिज्ञानियतो भावनाकारप्रविष्टः शमथविपश्यनामार्गस्वभावोऽनुशंसमनस्कारः प्रतीच्छकः प्रायोगिकमनस्कारो वशवर्तिमनस्कारः परीत्तमनस्कारो विपुलमनस्कारश्च । तत्र धातुनियतो यः श्रावकादिगोत्रनियतः । कृत्यकरो यः संभृतसंभारस्य । आश्रयविभक्तो यः ससंबाधगृहस्थाश्रयोऽसंबाधप्रव्रजिताश्रयश्च । अधिमुक्तिनिवेशको यो बुद्धानुस्मृतिसहगतः । छन्द-

[1] Le pāda est hypermètre. Il est facile de rétablir la mesure exacte en substituant लाभः à लाभश्च; mais la correction, surtout dans un pareil texte, ne me paraît pas nécessaire.

[2] Ex conj. Le manuscrit porte °द्गमना.



जनको यस्तत्संप्रत्ययसहगतः । समाधिसंनिश्रितो यः समन्तकमौलसमाधिसहगतः सवितर्कसविचारमात्राऽवितर्काविचारसहगतश्च । ज्ञानसंप्रयुक्तो यो योगोपनिषद्योगसहगतः स पुनर्यथाक्रमं श्रुतचिन्तामयो भावनामयश्च । संभिन्नालम्बनः पञ्चविधः सूत्रोद्दानगाथानिपातयावदुद्गृहीतयावद्देशितालम्बनः[1] । विभिन्नालम्बनः सप्तविधो नामालम्बनः पदालम्बनो व्यञ्जनालम्बनः पुद्गलनैरात्म्यालम्बनो धर्मनैरात्म्यालम्बनो रूपिधर्मालम्बनोऽरूपिधर्मालम्बनश्च । तत्र रूपिधर्मालम्बनो यः कायालम्बनः । अरूपिधर्मालम्बनो यो वेदनाचित्तधर्मालम्बनः । परिज्ञानियतो यः परिज्ञेये वस्तुनि परिज्ञेयेऽर्थे परिज्ञायां परिज्ञाफले तत्प्रवेदनायां[2] च । तत्र परिज्ञेयं वस्तु दुःखं परिज्ञेयोऽर्थस्तस्यैवानित्यदुःखशून्यानात्मता । परिज्ञा मार्गः । परिज्ञाफलं विमुक्तिः । तत्प्रवेदना विमुक्तिज्ञानदर्शनं । भावनाकारप्रविष्टश्चतुराकारभावनः सप्तत्रिंशदाकारभावनश्च । तत्र चतुराकारभावनः पुद्गलनैरात्म्याकारभावनो धर्मनैरात्म्याकारभावनो दर्शनाकारभावनो ज्ञानाकारभावनश्च । तत्र सप्तत्रिंशदाकारभावनः । अशुभाकारभावनो दुःखाकारभावनोऽनित्याकारभावनोऽनात्माकारभावनः स्मृत्युपस्थानेषु । प्रतिलम्भाकारभावनो निसेवनाकारभावनो विनिर्धावनाकारभावनः प्रतिपक्षाकारभावनः सम्यक्प्रहाणेषु । संतुष्टिप्रातिपक्षिकमनस्कारभावनो यदा छन्दं जनयति । विक्षेपसंशयप्रातिपक्षिकमनस्कारभावनो यदा व्यायच्छते वीर्यमारभते यथाक्रमं । औद्धत्यप्रातिपक्षिकसमाध्याकारभावनो यदा चित्तं प्रदधाति । लयप्रातिपक्षिकसमाध्याकारभावनो यदा चित्तं प्रगृह्णाति । एते यथाक्रमं चतुर्षु ऋद्धिपादेषु वेदितव्याः । स्थितचित्तस्य लोकोत्तरसंपत्तिसंप्रत्ययाकारभावनो यथा संप्रत्ययाकारभावन एवं व्यवसायाकारभावनो धर्मासंप्रमोषाकारभावनश्चित्तस्थित्याकारभावनः प्रविचयाकारभावन इन्द्रियेषु । एत एव पञ्च निर्लिखितविपक्षमनस्कारा बलेषु । संबोधिसंप्रख्यानाकारभावनस्तत्रैव विचयोत्साहसौमनस्यकर्मण्यताचित्तस्थितिसमताकारभावनाः सप्तसंबोध्यङ्गेषु । प्राप्तिनिश्चयाकारभावनः परिकर्मभूमिसंरक्षणाकारभावनः परसंप्राप्त्याकारभावन आर्यकान्तशीलप्रविष्टाकारभावनः संलिखितवृत्तिसमुदाचारकारभावनः पूर्वपरिभावितप्रतिलब्धमार्गाभ्यासाकारभावनो धर्मस्थितिनिमित्तासंप्रमोषाकारभावनोऽनिमित्तस्थित्याश्रयपरिवृत्त्याकारभावनश्च मार्गाङ्गेषु । शमथविपश्यनाभावनामार्गस्वभावयोर्न कश्चिन्निर्देशः । अनुशंसमनस्कारो द्विविधो दौष्ठुल्या-

[1] Le chinois substitue à *Nipāta* le terme *A-po-t'o-na*, « *Avadāna* ». Le chinois traduit par *kio*, « éveil, faire connaître ». Cf. inf., XVIII, 37.

[2] *Pravedanā*, mot nouveau. *pravedanam*.

पकर्षणो दृष्टिनिमित्तापकर्षणश्च। प्रतीच्छको यो धर्मस्रोतसि बुद्धबोधिसत्वानामन्तिकादववादग्राहकः। प्रायोगिकमनस्कारः पञ्चविधः समाधिगोचरे। संख्योपलक्षणप्रायोगिको येन सूत्रादिषु नामपदव्यञ्जनसंख्यामुपलक्षयते। वृत्त्युपलक्षणप्रायोगिको येन द्विविधां वृत्तिमुपलक्षयते परिमाणवृत्तिं च व्यञ्जनानामपरिमाणवृत्तिं च नामपदयोः। परिकल्पोपलक्षणप्रायोगिको येन द्वयमुपादाय द्वयपरिकल्पमुपलक्षयते। नामपरिकल्पमुपादायार्थपरिकल्पमर्थपरिकल्पमुपादाय नामपरिकल्पमपरिकल्पमक्षरं। क्रमोपलक्षणप्रायोगिको येन नामग्रहणपूर्विकामर्थग्रहणप्रवृत्तिमुपलक्षयते। प्रतिवेधप्रायोगिकश्च। स पुनरेकादशविधो वेदितव्य आगन्तुकत्वप्रतिवेधतः संप्रख्याननिमित्तप्रतिवेधतो ऽर्थानुपलम्भप्रतिवेधत उपलम्भानुपलम्भप्रतिवेधतो धर्मधातुप्रतिवेधतः पुद्गलनैरात्म्यप्रतिवेधतो धर्मनैरात्म्यप्रतिवेधतो हीनाशयप्रतिवेधत उदारमाहात्म्याशयप्रतिवेधतो यथाधिगमधर्मव्यवस्थानप्रतिवेधतो व्यवस्थापितधर्मप्रतिवेधतश्च। वशवर्तिमनस्कारस्त्रिविधः क्लेशावरणसुविशुद्धः क्लेशज्ञेयावरणसुविशुद्धो गुणाभिनिर्हारसुविशुद्धश्च। धर्मतत्वपर्येष्टौ द्वौ श्लोकौ।

तत्वं यत्सततं द्वयेन रहितं भ्रान्तेश्च संनिश्रयः
शक्यं नैव च सर्वथाभिलपितुं यच्चाप्रपञ्चात्मकं।
ज्ञेयं हेयमथो विशोध्यममलं यच्च प्रकृत्या मतं
यस्याकाशसुवर्णवारिसदृशी क्लेशाद्विशुद्धिर्मता॥ १३ ॥[1]

सततं द्वयेन रहितं तत्वं परिकल्पितः स्वभावो ग्राह्यग्राहकलक्षणेनात्यन्तमसत्वात्। भ्रान्तेः संनिश्रयः परतन्त्रस्तेन तत्परिकल्पनात्। अनभिलाप्यमप्रपञ्चात्मकं च परिनिष्पन्नः स्वभावः। तत्र प्रथमं तत्वं परिज्ञेयं द्वितीयं प्रहेयं तृतीयं विशोध्यं चागन्तुकमलाद्विशुद्धं च प्रकृत्या यस्य प्रकृत्या विशुद्धस्याकाशसुवर्णवारिसदृशी क्लेशाद्विशुद्धिः। न ह्याकाशादीनि प्रकृत्या अशुद्धानि। न चागन्तुकमलापगमादेषां विशुद्धिर्नेष्यत इति।

न खलु जगति तस्माद्विद्यते किंचिदन्य-
ज्जगदपि तदशेषं तत्र संमूढबुद्धि।
कथमयमभिरूढो लोकमोहप्रकारो
यदसदभिनिविष्टः सत्समन्ताद्विहाय॥ १४ ॥[2]

(1) Mètre çārdūlavikrīḍita. — (2) Mètre mālinī.



न खलु तस्मादेवंलक्षणाद्धर्मधातोः किंचिदन्यल्लोके विद्यते धर्मताया धर्मस्याभिन्नत्वात। शेषं गतार्थं। तत्वे मायोपमपर्येष्टौ पञ्चदश श्लोकाः।

यथा माया तथाभूतपरिकल्पो निरुच्यते।
यथा मायाकृतं तद्वत् द्वयभ्रान्तिर्निरुच्यते॥ १५ ॥[1]

यथा माया यन्त्रपरिगृहीतं भ्रान्तिनिमित्तं काष्ठलोष्टादिकं तथाभूतपरिकल्पः परतन्त्रः स्वभावो वेदितव्यः। यथा मायाकृतं तस्यां मायायां हस्त्यश्वसुवर्णाद्याकृतिस्तद्भावेन प्रतिभासिता तथा तस्मिन्नभूतपरिकल्पे द्वयभ्रान्तिर्ग्राह्यग्राहकत्वेन प्रतिभासिता परिकल्पितस्वभावाकारा वेदितव्या।

यथा तस्मिन्न तद्भावः परमार्थस्तथेष्यते।
यथा तस्योपलब्धिस्तु तथा संवृतिसत्यता॥ १६ ॥

यथा तस्मिन्न तद्भावो मायाकृते हस्तित्वाद्यभावस्तथा तस्मिन्परतन्त्रे परमार्थ इष्यते परिकल्पितस्य द्वयलक्षणस्याभावः। यथा तस्य मायाकृतस्य हस्त्यादिभावेनोपलब्धिस्तथाभूतपरिकल्पस्य संवृतिसत्यतोपलब्धिः।

तदभावे यथा व्यक्तिस्तन्निमित्तस्य लभ्यते।
तथाश्रयपरावृत्तावसत्कल्पस्य लभ्यते॥ १७ ॥

यथा मायाकृतस्याभावे तस्य निमित्तस्य काष्ठादिकस्य व्यक्तिर्भूतार्थोपलभ्यते तथाश्रयपरावृत्तौ द्वयभ्रान्त्यभावादभूतपरिकल्पस्य भूतो ऽर्थ उपलभ्यते।

तन्निमित्ते यथा लोको ह्यभ्रान्तः कामतश्चरेत्।
परावृत्तावपर्यस्तः कामचारी तथा यतिः॥ १८ ॥

यथा तन्निमित्ते काष्ठादावभ्रान्तो लोकः कामतश्चरति स्वतन्त्रस्तथा ऽश्रयपरावृत्तावपर्यस्त आर्यः कामचारी भवति स्वतन्त्रः।

तदाकृतिश्च तत्रास्ति तद्भावश्च न विद्यते।
तस्मादस्तित्वनास्तित्वं मायादिषु विधीयते॥ १९ ॥

(1) Mètre anuṣṭubh jusqu'au vers 29.

एष श्लोको गतार्थः ।

न भावस्तत्र चाभावो नाभावो भाव एव च ।<br>
भावाभावाविशेषश्च मायादिषु विधीयते ॥ २० ॥

न भावस्तत्र चाभावो यस्तदाकृतिभावो नासौ न भावः । नाभावो भाव एव च यो हस्तित्वाद्यभावो नासौ न भावः । तयोश्च भावाभावयोरविशेषो मायादिषु विधीयते । य एव हि तत्र तदाकृतिभावः । स एव हस्तित्वाद्यभावः । य एव हस्तित्वाद्यभावः स एव तदाकृतिभावः ।

तथा द्वयाभताऽत्रास्ति तद्भावश्च न विद्यते ।<br>
तस्मादस्तित्वनास्तित्वं रूपादिषु विधीयते ॥ २१ ॥

तथा ऽत्राभूतपरिकल्पे द्वयाभासतास्ति द्वयभावश्च नास्ति । तस्मादस्तित्वनास्तित्वं रूपादिषु विधीयते ऽभूतपरिकल्पस्वभावेषु ।

न भावस्तत्र चाभावो नाभावो भाव एव च ।<br>
भावाभावाविशेषश्च रूपादिषु विधीयते ॥ २२ ॥

न भावस्तत्र चाभावः । या द्वयाभासता । नाभावो भाव एव च । या द्वयतानास्तिता । भावाभावाविशेषश्च रूपादिषु विधीयते । य एव हि द्वयाभासताया भावः स एव द्वयस्याभाव इति ।

समारोपापवादाभप्रतिषेधार्थमिष्यते ।<br>
हीनयानेन यानस्य प्रतिषेधार्थमेव च ॥ २३ ॥

किमर्थं पुनरयं भावाभावयोरैकान्तिकत्वमविशेषश्चेष्यते । यथाक्रमं । समारोपापवादाभप्रतिषेधार्थमिष्यते । हीनयानगमनप्रतिषेधार्थं च । अभावस्य ह्यभावत्वं विदित्वा समारोपं न करोति । भावस्य भावत्वं विदित्वापवादं न करोति । तयोश्चाविशेषं विदित्वा न भावादुद्विजते तस्मान्न हीनयानेन निर्याति ।

भ्रान्तेर्निमित्तं भ्रान्तिश्च रूपविज्ञप्तिरिष्यते ।<br>
अरूपिणी च विज्ञप्तिरभावात्स्यान्न चेतरा ॥ २४ ॥

रूपभ्रान्तेर्या निमित्तविज्ञप्तिः सा रूपविज्ञप्तिरिष्यते रूपाख्या । सा तु



रूपभ्रान्तिररूपिणी विज्ञप्तिः । अभावाद्रूपविज्ञप्तेरितरापि न स्यादरूपिणी विज्ञप्तिः । कारणाभावात् ।

मायाहस्त्याकृतिग्राहभ्रान्तेर्द्वयमुदाहृतं ।<br>
द्वयं तत्र यथा नास्ति द्वयं चैवोपलभ्यते ॥ २५ ॥<br>
बिम्बसंकलिकाग्राहभ्रान्तेर्द्वयमुदाहृतं[1] ।<br>
द्वयं तत्र यथा नास्ति द्वयं चैवोपलभ्यते ॥ २६ ॥

मायाहस्त्याकृतिग्राह्यभ्रान्तितो द्वयमुदाहृतं । ग्राह्यं ग्राहकं च तत्र यथा नास्ति द्वयं चैवोपलभ्यते । प्रतिबिम्बं संकलिकां च मनसिकुर्वतः तद्ग्राहभ्रान्तेर्द्वयमुदाहृतं पूर्ववत् ।

तथा भावात्तथा ऽभावाद् भावाभावविशेषतः ।<br>
सदसन्तो ऽथ मायाभा ये धर्मा भ्रान्तिलक्षणाः ॥ २७ ॥

ये धर्मा भ्रान्तिलक्षणा विपक्षस्वभावास्ते सदसन्तो मायोपमाश्च । किं कारणं । सन्तस्तथाभावादभूतपरिकल्पत्वेन । असन्तस्तथा ऽभावात् ग्राह्यग्राहकत्वेन । तयोश्च भावाभावयोरविशिष्टत्वात् सन्तो ऽप्यसन्तो ऽपि मायापि चैवंलक्षणास्तस्मान्मायोपमाः ।

तथा ऽभावात्तथा ऽभावात्तथा ऽभावादलक्षणाः ।<br>
मायोपमाश्च[2] निर्दिष्टा ये धर्माः प्रातिपक्षिकाः ॥ २८ ॥

ये ऽपि प्रातिपक्षिका धर्मा बुद्धेनोपदिष्टाः स्मृत्युपस्थानादयस्ते ऽप्यलक्षणा मायाश्च निर्दिष्टाः । किं कारणं तथा ऽभावाद्यथा बालैर्गृह्यन्ते । तथा ऽभावाद्यथा देशिताः । तथा ऽभावाद्यथा संदर्शिता बुद्धेन गर्भावक्रमणजन्माभिनिष्क्रमणाभिसंबोध्यादयः । एवमलक्षणा अविद्यमानाश्च ख्यान्ति तस्मान्मायोपमाः ।

मायाराजेव चान्येन मायाराज्ञा पराजितः ।<br>
य सर्वधर्मान् पश्यन्ति निर्मारास्ते जिनात्मजाः ॥ २९ ॥

[1] Sur le mot *saṃkalikā*, cf. Çikṣā-samuccaya, 211, n. 3: Mahavastu, I, 387. Le chinois traduit *kou-siang*, « image d'un os » [= *bimba*], et *ts'iu kou*, « recueillir les ossements ». Ainsi *saṃkalika* tout seul équivaut à l'expression développée *asthi-saṃkalika* qui se trouve dans les deux passages cités ci-dessus.

[2] Ms. : य.

ये प्रातिपक्षिका धर्मास्ते मायाराजस्थानीयाः संक्लेशप्रहाणे व्यवदानाधिपत्यात्। ये ऽपि सांक्लेशिका[1] धर्मास्ते ऽपि राजस्थानीयाः संक्लेशनिर्वृत्तावाधिपत्यात्। अतस्तैः प्रातिपक्षिकैः संक्लेशपराजयो मायाराज्ञेव राज्ञः पराजयो द्रष्टव्यः। तज्ज्ञानाच्च बोधिसत्वा निर्माराः भवन्ति उभयपक्षे। औपम्यार्थे श्लोकः।

मायास्वप्नमरीचिबिम्बसदृशाः प्रोद्भासश्रुत्कोपमा[2-3]
विज्ञेयोदकचन्द्रबिम्बसदृशा निर्माणतुल्याः पुनः।
षट् षट् द्वौ च पुनश्च षट् द्वयमता एकैकशश्च त्रयः
संस्काराः खलु तत्र तत्र कथिता बुद्धैर्विबुद्धोत्तमैः॥ ३०॥[4]

यत्तूक्तं भगवता मायोपमा धर्मा यावन्निर्माणोपमा इति। तत्र मायोपमा धर्माः षडाध्यात्मिकान्यायतनानि। असत्यात्मजीवादित्वे तथा प्रख्यानात्। स्वप्नोपमाः षट् बाह्यान्यायतनानि तदुपभोगस्यावस्तुकत्वात्। मरीचिकोपमौ द्वौ धर्मौ चित्तं चैतसिकाश्च भ्रान्तिकरत्वात्। प्रतिबिम्बोपमाः पुनः षडेवाध्यात्मिकान्यायतनानि पूर्वकर्मप्रतिबिम्बत्वात्। प्रतिभासोपमाः षडेव बाह्यान्यायतनान्याध्यात्मिकानामायतनानां छायाभूतत्वात् तदाधिपत्योत्पत्तितः। षट् द्वयं मताः षट् द्वयमताः। प्रतिश्रुत्कोपमा देशनाधर्माः। उदकचन्द्रबिम्बोपमाः समाधिसंनिश्रिता धर्माः समाधेरुदकस्थानीयत्वादच्छतया। निर्माणोपमाः संचिन्त्यभवोपपत्तिपरिग्रहे ऽसंक्लिष्टसर्वक्रियाप्रयोगत्वात्। ज्ञेयपर्येष्टौ श्लोकः।

अभूतकल्पो न भूतो नाभूतो ऽकल्प एव च।
न कल्पो नापि चाकल्पः सर्वं ज्ञेयं निरुच्यते॥ ३१॥[5]

अभूतकल्पो यो न लोकोत्तरज्ञानानुकूलः कल्पः। न भूतो नाभूतो यस्तदनुकूलो यावन्निर्वेधभागीयः। अकल्पस्तथता लोकोत्तरं च ज्ञानं। न कल्पो

(1) *Sāmkleçika*, mot nouveau : «relatif au samkleça».

(2) *Prodbhāsa*, mot nouveau, glosé dans le commentaire par *pratibhāsa;* sur ce dernier mot, cf. Çikṣāsamuccaya, 204, 16, et 272, n. 3. Le chinois traduit par *ying*, «ombre, image».

(3) *Çrutka*, mot nouveau, glosé par *pratiçrutka*, mot nouveau (qui se retrouve aussi dans l'Aṣṭa-sāhasrikā, p. 205, l. 15). Le chinois traduit par *hiang*, «écho».

(4) Mètre çārdūlavikrīḍita.

(5) Mètre anuṣṭubh jusqu'au vers 33.



नापि चाकल्पो लोकोत्तरपृष्ठलब्धं लौकिकं ज्ञानं। एतावच्च सर्वं ज्ञेयं। संक्लेशव्यवदानपर्येष्टौ श्लोकद्वयं।

स्वधातुतो द्वयाभासाः साविद्याक्लेशवृत्तयः।
विकल्पाः संप्रवर्तन्ते द्वयद्रव्यविवर्जिताः॥ ३२॥

स्वधातुत इति भावाङ्गादालयविज्ञानतः। द्वयाभासा इति ग्राह्यग्राहकाभासाः। सहाविद्यया क्लेशैश्च वृत्तिरेषां त इमे साविद्याक्लेशवृत्तयः। द्वयद्रव्यविवर्जिता इति ग्राह्यद्रव्येण ग्राहकद्रव्येण च। एवं क्लेशः पर्येषितव्यः।

आलम्बनविशेषाप्तिः स्वधातुस्थानयोगतः।
त एव ह्यद्वयाभासा वर्तन्ते चर्मकाण्डवत्॥ ३३॥

आलम्बनविशेषाप्तिरिति यो धर्मालम्बनलाभः पूर्वमुक्तः। स्वधातुस्थानयोगत इति स्वधातुर्विकल्पानां तथता तत्र स्थानं नाम्नि स्थानाच्चेतसः। योगत इत्यभ्यासात्। भावनामार्गेण त एव विकल्पा अद्वयाभासा वर्तन्ते परावृत्ताश्रयस्य। चर्मवत् काण्डवच्च। यथा हि खरत्वापगमात्तदेव चर्म मृदु भवति। अग्निसंतापनया तदेव काण्डं ऋजु भवति। एवं शमथविपश्यनाभावनाभ्यां चेतःप्रज्ञाविमुक्तिलाभे परावृत्ताश्रयस्य त एव विकल्पा न पुनर्द्वयाभासाः प्रवर्तन्ते। इत्येव व्यवदानं पर्येषितव्यं। विज्ञप्तिमात्रतापर्येष्टौ द्वौ श्लोकौ।

चित्तं द्वयप्रभासं रागाद्याभासमिष्यते तद्वत्।
श्रद्धाद्याभासं न तदन्यो धर्मः क्लिष्टकुशलो ऽस्ति॥ ३४॥[1]

चित्तमात्रमेव द्वयप्रतिभासमिष्यते ग्राह्यप्रतिभासं ग्राहकप्रतिभासं च। तथा रागादिक्लेशाभासं तदेवेष्यते। श्रद्धादिकुशलधर्माभासं वा। न तु तदाभासादन्यः क्लिष्टो धर्मो ऽस्ति रागादिलक्षणः कुशलो वा श्रद्धादिलक्षणः।

यथा द्वयप्रतिभासादन्यो न द्वयलक्षणः।
इति चित्तं चित्राभासं चित्राकारं प्रवर्तते॥ ३५॥[2]

तथाभासो भावाभावो न तु धर्माणां मतः। तत्र चित्तमेव वस्तु[3] तच्चित्राभासं

(1) Mètre arya. Le chinois commence ici une nouvelle division, la seconde partie du chapitre.

(2) Mètre anuṣṭubh jusqu'au vers 46.

(3) Ex conj. Ms.: चित्तमेवस्त्वतच्चित्रा°.

प्रवर्तते। पर्यायेण रागाभासं वा द्वेषाभासं वा तदन्यधर्माभासं वा । चित्राकारं च युगपत् श्रद्धाद्याकारं। भासो भावाभावः क्लिष्टकुशलावस्थे चेतसि। न तु धर्माणां कुशलानां तत्प्रतिभासव्यतिरेकेण तल्लक्षणाभावात् । लक्षणपर्येष्टौ श्लोका अष्टौ। एकेनोद्देशः शेषैर्निर्देशः।

लक्ष्यं च लक्षणं चैव लक्षणा च प्रभेदतः।
अनुग्रहार्थं सत्वानां संबुद्धैः संप्रकाशिताः ॥ ३६ ॥

अनेनोद्देशः।

सदृष्टिकं च यच्चित्तं तत्रावस्थाविकारिता।
लक्ष्यमेतत्समासेन ह्यप्रमाणं प्रभेदतः ॥ ३७ ॥

तत्र चित्तं विज्ञानं रूपं च। दृष्टिश्चैतसिका धर्माः। तत्रावस्था चित्तविप्रयुक्ता धर्माः। अविकारिता असंस्कृतमाकाशादिकं तद्विज्ञप्तेर्नित्यं तथाप्रवृत्तेः। इत्येतत् समासेन पञ्चविधं लक्ष्यं प्रभेदेनाप्रमाणं।

यथाजल्पार्थसंज्ञाया निमित्तं तस्य वासना।
तस्मादप्यर्थ विख्यानं परिकल्पितलक्षणं ॥ ३८ ॥

लक्षणं समासेन त्रिविधं परिकल्पितादिलक्षणं । तत्र परिकल्पितलक्षणं त्रिविधं यथाजल्पार्थसंज्ञाया निमित्तं तस्य जल्पस्य वासना तस्माच्च वासनाद्यो ऽर्थः ख्याति अव्यवहारकुशलानां विनापि यथाजल्पार्थसंज्ञया । तत्र यथा ऽभिलापमर्थसंज्ञा चैतसिकी यथाजल्पार्थसंज्ञा। तस्या यदालम्बनं तन्निमित्तमेवं यच्च परिकल्प्यते यतश्च कारणाद्वासनतस्तदुभयं परिकल्पितलक्षणमत्राभिप्रेतं।

यथानामार्थमर्थस्य नाम्नः प्रख्यानता च या।
असंकल्पनिमित्तं हि परिकल्पितलक्षणं ॥ ३९ ॥

अपरपर्यायो यथा नाम चार्थश्च यथानामार्थमर्थस्य नाम्नश्च प्रख्यानता यथानामार्थप्रख्यानता। यदि यथानामार्थः ख्याति यथार्थं वा नाम इत्येतदभूतपरिकल्पालम्बनं परिकल्पितलक्षणं एतावद्धि परिकल्प्यते यदुत नाम वा अर्थो वेति।

त्रिविधत्रिविधाभासो ग्राह्यग्राहकलक्षणः।
अभूतपरिकल्पो हि परतन्त्रस्य लक्षणं ॥ ४० ॥



त्रिविधस्त्रिविधश्चाभासो ऽस्येति त्रिविधत्रिविधाभासः। तत्र त्रिविधाभासः पदाभासो ऽर्थाभासो देहाभासश्च। पुनस्त्रिविधाभासो मनउद्ग्रहविकल्पाभासः। मनो यत् क्लिष्टं सर्वदा। उद्ग्रहः पञ्च विज्ञानकायाः । विकल्पो मनोविज्ञानं। तत्र प्रथमत्रिविधाभासो ग्राह्यलक्षणः। द्वितीयो ग्राहकलक्षणः। इत्ययमभूतपरिकल्पः परतन्त्रस्य लक्षणं।

अभावभावता या च भावाभावसमानता।
अशान्तशान्ता ऽकल्पा च परिनिष्पन्नलक्षणं ॥ ४१ ॥

परिनिष्पन्नलक्षणं पुनस्तथता सा ह्यभावता च सर्वधर्माणां परिकल्पिता नाभावता च तदभावत्वेन भावात्। भावाभावसमानता च तयोर्भावाभावयोरभिन्नत्वात्। अशान्ता चागन्तुकैरुपक्लेशैः शान्ता च प्रकृतिपरिशुद्धत्वात्। अविकल्पा च विकल्पागोचरत्वात् निष्प्रपञ्चतया। एतेन त्रिविधं लक्षणं तथतायाः परिदीपितं स्वलक्षणं क्लेशव्यवदानलक्षणमविकल्पलक्षणं च । उक्तं त्रिविधं लक्षणं।

निष्पन्दधर्ममालम्ब्य योनिशो मनसिक्रिया।
चित्तस्य धातौ स्थानं च सदसत्तार्थपश्यना ॥ ४२ ॥

लक्षणा पुनः पञ्चविधा योगभूमिः। आधार आधानमादर्श आलोक आश्रयश्च। तत्राधारो निष्पन्दधर्मो यो बुद्धेनाधिगमो देशितः स तस्याधिगमस्य निष्पन्दः। आधानं योनिशो मनस्कारः। आदर्शः चित्तस्य धातौ स्थानं समाधिर्यदेतत्पूर्वं नाम्नि स्थानमुक्तं। आलोकः सदसत्वेनार्थदर्शनं लोकोत्तरा प्रज्ञा तथा सच्च सतो यथाभूतं पश्यत्यसच्चासतः। आश्रय आश्रयपरावृत्तिः।

समतागमनं तस्मिन्नार्यगोत्रं हि निर्मलं।
समं विशिष्टमन्यूनानधिकं लक्षणा मता ॥ ४३ ॥

समतागमनमनास्रवधातौ आर्यगोत्रे तदन्यैरार्यैः। तच्च निर्मलमार्यगोत्रं बुद्धानां। समं विमुक्तिसमतया श्रावकप्रत्येकबुद्धैः। विशिष्टं पञ्चभिर्विशेषैः। विशुद्धिविशेषेण सवासनक्लेशविशुद्धितः। परिशुद्धिविशेषेण क्षेत्रपरिशुद्धितः। कायविशेषेण धर्मकायतया। संभोगविशेषेण पर्षन्मण्डलेष्वविच्छिन्नधर्मसंभोगप्रवर्तनतः। कर्मविशेषेण च तुषितभवनवासादिनिर्माणैः सत्वार्थक्रियानुष्ठानतः। न च तस्योनत्वं संक्लेशपक्षनिरोधे नाधिकत्वं व्यवदानपक्षोत्पाद इत्येषा



IMPRIMERIE NATIONALE.

पञ्चविधा योगभूमिर्लक्षणा। तया हि तल्लक्ष्यं लक्षणं च लक्ष्यते। विमुक्तिपर्येष्टौ षट् श्लोकाः।

पदार्थदेहनिर्भासपरावृत्तिरनास्रवः।
धातुर्बीजपरावृत्तेः स च सर्वत्रगाश्रयः॥ ४४॥

बीजपरावृत्तेरित्यालयविज्ञानपरावृत्तितः। पदार्थदेहनिर्भासानां विज्ञानानां परावृत्तिरनास्रवो धातुर्विमुक्तिः। स च सर्वत्रगाश्रयः श्रावकप्रत्येकबुद्धगतः।

चतुर्धा वशितावृत्तेर्मनसश्चोद्ग्रहस्य च।
विकल्पस्याविकल्पे हि क्षेत्रे ज्ञाने ऽथ कर्मणि॥ ४५॥

मनसश्चोद्ग्रहस्य च विकल्पस्य चावृत्तेः परावृत्तेरित्यर्थः। चतुर्धा वशिता भवति यथाक्रममविकल्पे क्षेत्रे ज्ञानकर्मणोश्च।

अचलादित्रिभूमौ च वशिता सा चतुर्विधा।
द्विधैकस्यां तदन्यस्यामेकैका वशिता मता॥ ४६॥

सा चेयमचलादिभूमित्रये चतुर्धा वशिता वेदितव्या। एकस्यामचलायां भूमौ द्विविधा। अविकल्पे न चानभिसंस्कारनिर्विकल्पत्वात्। क्षेत्रे च बुद्धक्षेत्रपरिशोधनात्। तदन्यस्यां भूमावेकैका वशिता साधुमत्यां ज्ञानवशिता प्रतिसंविद्विशेषलाभात्। धर्ममेघायां कर्मण्यभिज्ञाकर्मणामव्याघातात्।

विदित्वा नैरात्म्यं द्विविधमिह धीमान् भवगतं
समं तच्च ज्ञात्वा प्रविशति स तत्त्वं ग्रहणतः।
ततस्तत्र स्थानान्मनस इह न ख्याति तदपि
तदख्यानं मुक्तिः परम उपलम्भस्य विगमः॥ ४७॥[(1)]

अपरो विमुक्तिपर्यायः। द्विविधं नैरात्म्यं विदित्वा भवत्रयगतं बोधिसत्त्वः समं तच्च ज्ञात्वा द्विविधनैरात्म्यं परिकल्पितपुद्गलाभावात् परिकल्पितधर्माभावात् न तु सर्वथैवाभावतः। तत्त्वं प्रविशति विज्ञप्तिमात्रतां ग्रहणतो ग्रहणमात्रमेतदिति। ततस्तत्र तत्त्वविज्ञप्तिमात्रस्थानान्मनसस्तदपि तत्त्वं न ख्याति

(1) Mètre çikhariṇī.



विज्ञप्तिमात्रं। तदख्यानं मुक्तिः परम उपलम्भस्य यो विगमः पुद्गलधर्मयोरनुपलम्भात्।

आधारे संभारादाधाने सति हि नाममात्रं पश्यन्।
पश्यति हि नाममात्रं तत्पश्यंस्तच्च नैव पश्यति भूयः॥ ४८॥[(1)]

अपरपर्यायः। आधार इति श्रुतौ संभारादिति संभृतसंभारस्य पूर्वसंभारलाभात्। आधाने सतीति योनिशोमनस्कारे नाममात्रं पश्यन्नित्यभिलापमात्रमर्थरहितं। पश्यति हि नाममात्रमिति विज्ञप्तिमात्रं नाम अरूपिणश्चत्वारः स्कन्धा इति कृत्वा तत्पश्यंस्तदपि भूयो नैव पश्यत्यर्थाभावे तद्विज्ञप्त्यदर्शनादित्ययमनुपलम्भो विमुक्तिः।

चित्तमेतत्सदौष्ठुल्यमात्मदर्शनपाशितं।
प्रवर्तते निवृत्तिस्तु तदध्यात्मस्थितेर्मता॥ ४९॥[(2)]

अपरप्रकारश्चित्तमेतत्सदौष्ठुल्यं प्रवर्तते जन्मसु। आत्मदर्शनपाशितमिति दौष्ठुल्यकारणं दर्शयति। द्विविधेनात्मदर्शनेन पाशितमतः सदौष्ठुल्यमिति। निवृत्तिस्तु तदध्यात्मस्थितेरिति तस्य चित्तस्य चित्त एवावस्थानादालम्बनानुपलम्भतः। निःस्वभावतापर्येष्टौ श्लोकद्वयं।

स्वयं स्वेनात्मना ऽभावात्स्वभावे चानवस्थितेः।
ग्राहवत्तदाभावाच्च निःस्वभावत्वमिष्यते॥ ५०॥

स्वयमभावान्निःस्वभावत्वं धर्माणां प्रत्ययाधीनत्वात्। स्वेनात्मना ऽभावान्निःस्वभावत्वं निरुद्धानां पुनस्तेनात्मनानुत्पत्तेः। स्वभाव ऽनवस्थितत्वान्निःस्वभावत्वं क्षणिकत्वादित्येतत्त्रिविधं निःस्वभावत्वं संस्कृतलक्षणत्रयानुगं वेदितव्यं। ग्राहवत्तदभावाच्च निःस्वभावत्वं तदभावादिति स्वाभावात्। यथा बालानां स्वभावग्राहो नित्यसुखशुच्यात्तो वा ऽन्येन वा परिकल्पितलक्षणेन तथासौ स्वभावो नास्ति तस्मादपि निःस्वभावत्वं धर्माणामिष्यते।[(3)] . . . . .
. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .
. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

(1) Mètre gītyāryā.

(2) Mètre anuṣṭubh jusqu'au vers 50 (ou 51 ?).

(3) Le copiste a sauté deux lignes, y compris le vers 51 qu'on peut restituer hypothétiquement ainsi, à l'aide du chinois :

निःस्वभावतया सिद्धा उत्तरोत्तरनिश्रयाः।
अनुत्पादो ऽनिरोधश्चादिशान्तिः परिनिर्वृतिः॥

निःस्वभावतया ऽनुत्पादादयः। यो हि निःस्वभावः सो ऽनुत्पन्नो यो ऽनुत्पन्नः सो ऽनिरुद्धो यो ऽनिरुद्धः स आदिशान्तो य आदिशान्तः स प्रकृतिपरिनिर्वृत इत्येवमुत्तरोत्तरनिश्रयैरेभिर्निःस्वभावताभिर्निःस्वभावतया ऽनुत्पादादयः सिद्धा भवन्ति। अनुत्पत्तिधर्मक्षान्तिपर्येष्टावार्या।

आदौ तत्वे ऽन्यत्वे स्वलक्षणे स्वयमथान्यथाभावे।
संक्लेशे ऽथ विशेषे क्षान्तिरनुत्पत्तिधर्मोक्ता ॥ ५२ ॥ [1]

अष्टास्वनुत्पत्तिधर्मेषु क्षान्तिरनुत्पत्तिकधर्मक्षान्तिः। आदौ संसारस्य न हि तस्याद्युत्पत्तिरस्ति। तत्वे ऽन्यत्वे च पूर्वपश्चिमानां न हि संसारे तेषामेव धर्माणामुत्पत्तिर्ये पूर्वमुत्पन्नास्तद्भावेनानुत्पत्तेः । न चान्येषामपूर्वप्रकारानुत्पत्तेः । स्वलक्षणे परिकल्पितस्य स्वभावस्य न हि तस्य कदाचिदुत्पत्तिः। स्वयमनुत्पत्तौ परतन्त्रस्य। अन्यथाभावे परिनिष्पन्नस्य न हि तदन्यथा भावस्योत्पत्तिरस्ति। संक्लेशे प्रहीणे न हि क्षयज्ञानलाभिनः संक्लेशस्योत्पत्तिं पुनः पश्यन्ति। विशेषे बुद्धधर्मकायानां न हि तेषां विशेषोत्पत्तिरस्ति । इत्येतेष्वनुत्पत्तिधर्मेषु क्षान्तिरनुत्पत्तिधर्मोक्ता। एकयानतापर्येष्टौ सप्त श्लोकाः।

धर्मनैरात्म्यमुक्तीनां तुल्यत्वात् गोत्रभेदतः।
द्व्याशयाप्तेश्च निर्माणात्पर्यन्तादेकयानता ॥ ५३ ॥ [2]

धर्मतुल्यत्वादेकयानता श्रावकादीनां धर्मधातोरभिन्नत्वात् यातव्यं यानमिति कृत्वा नैरात्म्यस्य तुल्यत्वादेकयानता श्रावकादीनामात्माभावतासामान्याद्याता यानमिति कृत्वा विमुक्तितुल्यत्वादेकयानता याति यानमिति कृत्वा। गोत्रभेदादेकयानता। अनियतश्रावकगोत्राणां महायानेन निर्याणाद्यान्ति तेन यानमिति कृत्वा द्व्याशयाप्तेरेकयानता बुद्धानां च सर्वसत्वेष्वात्माशयप्राप्तेः श्रावकाणां च तद्गोत्रनियतानां पूर्वं बोधिसंभारचरितादनात्मनि बद्धाशयप्राप्तेरभिन्नसंतानाधिमोक्षलाभतो बुद्धानुभावेन तथागतानुग्रहविशेषप्रदेशलाभाय इत्येकत्वाशयलाभेनैकत्वात् बुद्धतच्छ्रावकाणामेकयानता । निर्माणादेकयानता यथोक्तमनेकशतकृत्वो ऽहं श्रावकयानेन परिनिर्वृत इति विनेयानामर्थे तथा निर्माणसंदर्शनात् । पर्यन्तादप्येकयानता यतः परेण यातव्यं नास्ति तद्यानमिति कृत्वा । बुद्धत्वमेकयानमेवं तत्र तत्र सूत्रे तेन

[1] Mètre āryā. — [2] Mètre anuṣṭubh jusqu'au vers 59.



तनाभिप्रायेणैकयानता वेदितव्या न तु यानत्रयं नास्ति । किमर्थं पुनस्तेन तेनाभिप्रायेणैकयानता बुद्धैर्देशिता।

आकर्षणार्थमेकेषामन्यसंधारणाय च।
देशितानियतानां हि संबुद्धैरेकयानता ॥ ५४ ॥

आकर्षणार्थमेकेषामिति ये श्रावकगोत्रा अनियताः । अन्येषां च संधारणाय ये बोधिसत्वगोत्रा अनियताः ।

श्रावको ऽनियतो द्वेधा दृष्टादृष्टार्थयानतः ।
दृष्टार्थो वीतरागश्चावीतरागो ऽप्यसौ मृदुः ॥ ५५ ॥

श्रावकः पुनरनियतो द्विविधो वेदितव्यः । दृष्टार्थयानश्च यो दृष्टसत्यो महायानेन निर्याति अदृष्टार्थयानश्च यो न दृष्टसत्यो महायानेन निर्याति। दृष्टार्थः पुनर्वीतरागश्चावीतरागश्च कामेभ्यः। असौ च मृदुर्धन्धगतिको वेदितव्यः। यो दृष्टार्थो द्विविध उक्तः ।

तौ च लब्धार्यमार्गस्य भवेषु परिणामनात्।
अचिन्त्यपरिणामिक्या उपपत्त्या समन्वितौ ॥ ५६ ॥

तौ च दृष्टार्थौ लब्धस्यार्यमार्गस्य भवेषु परिणामनात् । अचिन्त्यपरिणामिक्या उपपत्त्या समन्वागतौ वेदितव्यौ। अचिन्त्यो हि तस्यार्यमार्गस्य परिणाम उपपत्तौ तस्मादचिन्त्यपरिणामिकी।

प्रणिधानवशादेक उपपत्तिं प्रपद्यते।
एको ऽनागामितायोगान्निर्माणैः प्रतिपद्यते ॥ ५७ ॥

तयोश्चैकः प्रणिधानवशादुपपत्तिं गृह्णाति यथेष्टं यो न वीतरागः। एको ऽनागामितायोगबलेन निर्माणैः।

निर्वाणाभिरतत्वाच्च तौ धन्धगतिकौ मतौ।
पुनः पुनः स्वचित्तस्य समुदाचारयोगतः ॥ ५८ ॥

तौ च निर्वाणाभिरतत्वादुभावपि धन्धगतिकौ मतौ चिरतरेणाभिसंबोधतः । स्वस्य श्रावकचित्तस्य निर्वित्सहगतस्याभीक्ष्णं समुदाचारात्।

सो ऽकृतार्थो ह्यबुद्धे च जातो ध्यानार्थमुद्यतः ।
निर्माणार्थी तदाश्रित्य परां बोधिमवाप्नुते ॥ ५९ ॥

यः पुनरसाववीतरागो दृष्टसत्यः सो ऽकृतार्थः शैक्षो भवन् बुद्धरहिते काले जातो ध्यानार्थमुद्यतो भवति निर्माणार्थी । तच्च निर्माणमाश्रित्य क्रमेण परां बोधिं प्राप्नोति । तमवस्थात्रयस्थं संधायोक्तं भगवता श्रीमालासूत्रे[1] । श्रावको भूत्वा प्रत्येकबुद्धो भवति पुनश्च बुद्ध इति । अग्निदृष्टान्ते च[2] यदा च पूर्वं दृष्टसत्यावस्था यदा बुद्धरहिते काले स्वयं ध्यानमुत्पाद्य जन्मकायं त्यक्त्वा निर्माणकायं गृह्णाति यदा च परां बोधिं प्राप्नोतीति । विद्यास्थानपर्यैष्टौ श्लोकः ।

विद्यास्थाने पञ्चविधे योगमकृत्वा सर्वज्ञत्वं नैति कथंचित्परमार्यः ।
इत्यन्येषां निग्रहणानुग्रहणाय स्वाज्ञार्थं वा तत्र करोत्येव स योगं ॥ ६० ॥[3]

पञ्चविधं विद्यास्थानं । अध्यात्मविद्या हेतुविद्या शब्दविद्या चिकित्साविद्या शिल्पकर्मस्थानविद्या च । तद्यदर्थं बोधिसत्वेन पर्यैषितव्यं तद्दर्शयति । सर्वज्ञत्वप्राप्त्यर्थमभेदेन सर्वं । भेदेन पुनर्हेतुविद्यां शब्दविद्यां च पर्यैषते निग्रहार्थमन्येषां तदनधिमुक्तानां । चिकित्साविद्यां शिल्पकर्मस्थानविद्यां चान्येषामनुग्रहार्थं तदर्थिकानां । अध्यात्मविद्यां स्वयमाज्ञार्थं । धातुपुष्टिपर्यैष्टौ त्रयोदश

(1) Le Çrīmālā-sūtra, ou plus exactement le Çrīmālā-devī-siṃhanāda-sūtra, est un sūtra incorporé dans la collection Ratnakūṭa. Il a été traduit deux fois en chinois : par Guṇabhadra entre 435 et 443 (Nanj. 59; éd. de Tōkyō II, 12, $53^{b}$-$59^{a}$), et par Bodhiruci entre 693 et 713 (Nanj. 23 (48); éd. de Tōkyō II, 6, $89^{b}$-$94^{b}$). Je n'ai pas retrouvé le passage correspondant à la citation d'Asaṅga, mais le sūtra exprime plusieurs fois une idée analogue. — En revanche, j'y ai retrouvé le passage cité dans le Çikṣā-samuccaya, 42, 12 (= II, 6, $90^{b}$, col. 14 : II, 12, $54^{b}$, col. 10).

(2) Le ms. porte : अग्निदृष्टान्तेन यदा, mais la correction est garantie par le chinois. Le texte chinois, d'autre part, à également besoin d'une correction. Il porte : *jou ta p'i tchong chouo,* «comme il est dit dans la Grande Comparaison». Le caractère *ta*, «grand», est manifestement une erreur pour *ho*, «feu», auquel il ressemble du reste. J'ignore quel est le texte désigné sous ce titre.

(3) Mètre mattamayūra.



श्लोकाः । पारमितापरिपूरणार्थं ये पारमिताप्रतिसंयुक्ता एवं मनसिकारा धातुपुष्टये भवन्ति त एताभिर्गाथाभिर्दर्शिताः ।

हेतूपलब्धितुष्टिश्च निश्रयतदनुस्मृतिः ।
साधारणफलेच्छा च यथाबोधाधिमुच्यना[1] ॥ ६१ ॥[2]

ते पुनर्हेतूपलब्धितुष्टिमनसिकारात् । यावदग्रत्वात्मावधारणमनसिकारः । तत्र हेतूपलब्धितुष्टिमनसिकार आदित एव तावत् । गोत्रस्थो बोधिसत्वः स्वात्मनि पारमितानां गोत्रं पश्यन् हेतूपलब्धितुष्ट्या पारमिताधातुपुष्टिं करोति । गोत्रस्थो ऽनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादयतीत्यतो ऽनन्तरं निश्रयतदनुस्मृतिमनसिकारः । स हि बोधिसत्वः स्वात्मनि पारमितानां संनिश्रयभूतं बोधिचित्तं समनुपश्यन्नेवं मनसिकरोति नियतमेताः पारमिताः परिपूरिं गमिष्यन्ति । तथा ह्यस्माकं बोधिचित्तं संविद्यत इति । उत्पादितबोधिचित्तस्य पारमिताभिः स्वपरार्थप्रयोगे साधारणफलेच्छामनसिकार आसां पारमितानां परसाधारणं वा फलं भवत्वन्यथा वा मा भूदित्यभिसंस्करणात् । स्वपरार्थं प्रयुज्यमानो ऽसंक्लेशोपायं तत्वार्थं प्रतिविध्यतीत्यतो ऽनन्तरं यथाबोधाधिमुच्यनामनसिकारः । एवं सर्वत्रानुक्रमो वेदितव्यः । यथा बुद्धैर्भगवद्भिः पारमिता अभिसंबुद्धा अभिसंभोत्स्यन्ते ऽभिसंबुध्यन्ते च तथा ऽहमधिमुच्ये इत्यभिसंस्करणात्।

चतुर्विधानुभावेन प्रीयणाखेदनिश्चयः[3] ।
विपक्षे प्रतिपक्षे च प्रतिपत्तिश्चतुर्विधा ॥ ६२ ॥

अनुभावप्रीयणामनसिकारश्चतुर्विधानुभावदर्शनप्रीयणा चतुर्विधानुभावो विपक्षप्रहाणं संभारपरिपाकः स्वपरानुग्रह आयत्यां विपाकफलनिःष्यन्दफलदानता च । सत्वस्वबुद्धधर्मपरिपाकमारभ्याखेदनिश्चयमनसिकारः सर्वसत्वविप्रतिपत्तिभिः सर्वदुःखापत्तिपातैश्चाखेदनिश्चयाभिसंस्करणात् परमबोधिप्राप्तये । विपक्षे प्रतिपक्षे च चतुर्विधप्रतिपत्तिमनसिकारः । दानादिविपक्षाणां च मात्सर्यादीनां प्रतिदेशना[3] प्रतिपक्षाणां च दानादीनामनुमोदना

(1) *Adhimucyanā*, mot nouveau. Le chinois traduit : *sin kiai*, «délivrance par la foi». Voir aussi XVI, 74.

(2) Mètre anuṣṭubh jusqu'au vers 73.

(3) *Prīyaṇā*, *pratideçanā*, mots nouveaux, formés comme *adhimucyanā* ci-dessus. Le chinois traduit *prīyaṇā* par *tö hi*, «obtenir de la joie»; et *pratideçanā* par *tch'an-hoei*, «confession».

तदधिपतेयधर्मदेशनार्थं[1] च बुद्धाध्येषणा । तासां च बोधौ परिणामना ।

प्रसादः संप्रतीच्छा च दानच्छन्दः परत्र च ।
संनाहः प्रणिधानं च अभिनन्दमनस्क्रिया ॥ ६३ ॥

अधिमुक्तिबलाधानतामारभ्य पारमिताधिपतेयधर्मार्थे च प्रसादमनसिकारः । धर्मपर्येष्टिमारभ्य संप्रतीच्छनमनसिकारस्तस्यैव धर्मस्याप्रतिवहनयोगेन परिग्रहणतया । दशनामारभ्य दानच्छन्दमनसिकारो धर्मस्यार्थस्य च प्रकाशनार्थं परेषां । प्रतिपत्तिमारभ्य संनाहमनसिकारो दानादिपरिपूरये संनहनात् । प्रणिधानमनसिकारस्तत्परिपूरिप्राप्तये समवधानार्थं । अभिनन्दमनसिकारोऽहो बत दानादिप्रतिपत्त्या सम्यक् संपादयेयमित्यभिनन्दनात् । एत एव त्रयो मनसिकारा अववादानुशासन्यां योजयितव्याः । उपायोपसंहितकर्ममनसिकारः संकल्पैः सर्वप्रकारदानादिप्रयोगमनसिकरणात् ।

शक्तिलाभे सदौत्सुक्यं दानादौ षड्विधे घनं ।
परिपाकेऽथ पूजायां सेवायामनुकम्पना ॥ ६४ ॥

औत्सुक्यमनसिकारश्चतुर्विधः । शक्तिलाभे च दानादौ षड्विधे दानदाने यावत् प्रज्ञादाने । एवं शीलादिषु षड्विधेषु । पारमिताभिरेव संग्रहवस्तुप्रयोगेण सत्वपरिपाके । पूजायां च दानेन लाभसत्कारपूजया । शेषाभिश्च प्रतिपत्तिपूजया । अविपरीतपारमितोपदेशापन्नकल्याणमित्रसेवायामौत्सुक्यमनसिकारो वेदितव्यः । अनुकम्पामनसिकारश्चतुर्भिरप्रमाणैर्दानाद्युपसंहारेण मैत्रायतः । मात्सर्यादिसमवधानेन सत्वेषु करुणायतः । दानादिसमन्वागतेषु मुदितायतः । तदसंक्लेशाधिमोक्षतश्च उपेक्षायतः ।

अकृते कुकृते लज्जा कौकृत्यं विषये रतिः ।
अमित्रसंज्ञा खेदे च रचनोद्भावनामतिः ॥ ६५ ॥

ह्रीधर्ममारभ्य लज्जामनस्कारोऽकृतेषु वा दानादिष्वपरिपूर्णमिथ्याकृतेषु वा लज्जा लज्जायमानस्य प्रवृत्तिनिवृत्त्यर्थमनानुषङ्गिकं कौकृत्यायते[2] । धृतिमारभ्य रतिमनस्कारो दानाद्यालम्बनेऽविक्षेपतश्चित्तस्य धारणात् । अखेदम-

[1] *Adhipateya;* cf. Çikṣā-samuccaya, 28, 14. — [2] *Kaukṛtyāyate*, du verbe nouveau *kaukṛtyāy°*, dénominatif tiré de *kaukṛtya*.



नस्कारो दानादिप्रयोगपरिखेदे शत्रुसंज्ञाकरणात् । रचनाच्छन्दमनस्कारः पारमिताप्रतिसंयुक्तशास्त्ररचनाभिसंस्करणात् । लोकज्ञतामारभ्य उद्भावनामनस्कारस्तस्यैव शास्त्रस्य लोके यथाभाजनमुद्भावनाभिसंस्करणात् ।

दानादयः प्रतिसरणं[1] संबोधौ नेश्वरादयः ।
दोषाणां च गुणानां च प्रतिसंवेदनाद् द्वयोः ॥ ६६ ॥

प्रतिसरणमनस्कारो बोधिप्राप्तये दानादीनां प्रतिसरणान्नेश्वरादीनां प्रतिसंविन्मनस्कारो मात्सर्यदानादिविपक्षप्रतिपक्षयोर्दोषगुणप्रतिसंवेदनात् ।

चयानुस्मरणप्रीतिर्माहार्थ्यस्य च दर्शनं ।
योगेऽभिलाषोऽविकल्पे तद्धृत्यां प्रत्ययागमे ॥ ६७ ॥

चयानुस्मरणप्रीतिमनस्कारो दानाद्युपचये पुण्यज्ञानसंभारोपचयसंदर्शनात् । माहार्थ्यसंदर्शनमनस्कारो दानादीनां बोधिपक्षे भावार्थेन महाबोधिप्राप्त्यर्थसंदर्शनात् । अभिलाषमनस्कारः स पुनश्चतुर्विधः । योगाभिलाषमनस्कारः शमथविपश्यनायोगभावनाभिलाषात् । अविकल्पाभिलाषमनस्कारः पारमितापरिपूरणार्थमुपायकौशल्याभिलाषात् । धृत्यभिलाषमनस्कारः पारमिताधिपतेयधर्मार्थधारणाभिलाषात् । प्रत्ययाभिगमाभिलाषमनस्कारः सम्यक्प्रणिधानाभिसंस्करणात् ।

सप्तप्रकारासद्ग्राहव्युत्थाने शक्तिदर्शनं ।
आश्चर्यं चाप्यनाश्चर्यं संज्ञा चैव चतुर्विधा ॥ ६८ ॥

सप्तप्रकारासद्ग्राहव्युत्थानशक्तिदर्शनमनस्कारः । सप्तविधोऽसद्ग्राहः । असति सद्ग्राहो दोषवति गुणवत्वग्राहो गुणवत्यगुणवत्वग्राहः । सर्वसंस्कारेषु च नित्यसुखासद्ग्राहौ । सर्वधर्मेषु चात्मासद्ग्राहः । निर्वाणे चाशान्तासद्ग्राहः । यस्य प्रतिपक्षेण शून्यतासमाधित्रयं धर्मोद्दानचतुष्टयं च देश्यते । आश्चर्ये चतुर्विधसंज्ञामनस्कारः । पारमितासूदारसंज्ञा आयतत्वसंज्ञा प्रतिकारनिरपेक्षसंज्ञा विपाकनिरपेक्षसंज्ञा च । अनाश्चर्येऽपि चतुर्विधमनस्कारः । चतुर्विधमनाश्चर्यमौदार्यं आयतत्वे च सति पारमितानां बुद्धत्वफलाभिनिवर्तनात् । अस्मिन्नेव च द्वये सति स्वपरसमचित्तावस्थापनात् तद्विशिष्टेभ्यश्च शरदिभ्यः[2]

[1] Pāda hypermètre.

[2] *Sic* ms. Peut-être faut-il rétablir : शरीरादिभ्यः. Cette lecture semble confirmée par le chinois qui porte : «Il ne désire pas les offrandes de tout le monde; il ne désire pas de corps spécial ni de trésor spécial qui dépasse le monde.»

पूजादिलाभे सति प्रतिकारनिरपेक्षता[1] . . . . . . . . . . . . . . . . . . . . . .
. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .
. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

प्रत्ययकाराशंसनमनस्कारो दानादिगुणप्रवृत्त्या परेभ्यः । आशास्तिमनस्कारः सत्वेषु त्रिस्थानाशंसनात् पारमितानां बोधिसत्वभूमिनिष्ठाया बुद्धभूमिनिष्ठायाः सत्वावरणाशंसनाच्च । निरन्तरमनस्कारो दानादिभिरवध्यकालकरणाभिसंस्करणात् ।

बुद्धप्रणीतानुष्ठानादर्वागस्थानचेतनात् ।
तद्धानिवृद्ध्या सत्वेषु अनामोदः प्रमोदना ॥ ७० ॥

सम्यक्प्रयोगमनस्कारो ऽविपरीतानुष्ठानादर्वागस्थानमनसिकरणात् । अनामोदमनस्कारो दानादिभिर्हीयमानेषु । प्रमोदमनस्कारो दानादिभिर्वर्धमानेषु सत्वेषु ।

प्रतिवर्णिकायां भूतायां[2] भावनायां च नारुचिः ।
नाधिवासमनस्कारो व्याकृतनियते स्पृहा ॥ ७१ ॥

अरुचिमनस्कारः पारमिताप्रतिवर्णिका भावनायां । रुचिमनस्कारो भूतायां । अनधिवासनामनस्कारो मात्सर्यादिविपक्षविनयनाभिसंस्कारणात् । स्पृहामनस्कारो द्विविधः पारमितापरिपूरिव्याकरणलाभस्पृहामनस्कारः पारमितानियतभूम्यवस्थालाभस्पृहामनस्कारश्च ।

आयत्यां दर्शनाद्वृत्तिचेतना समतेक्षणा ।
अग्रधर्मेषु वृत्त्या च अग्रत्वात्मावधारणात् ॥ ७२ ॥

आयत्यां दर्शनाद्वृत्तिमनस्कारो यात्वा गतिं गत्वा बोधिसत्वेन सता ऽवश्यकरणीयता ऽभिसंस्कारणात् । दानादीनां समतेक्षणामनस्कारस्तदन्यै-

(1) Lacune de deux ou trois lignes indiquée par le chinois, et qui comprend la fin du commentaire sur le vers 68, le vers 69 et le commencement du commentaire sur ce vers. En calquant la version chinoise, on peut rétablir hypothétiquement le vers ainsi :

अनन्ता च महार्था च सहदानपरिवृत्तिः ।
नैष्ठिकी निरन्तरा च तथा पञ्चविधा स्मृता ॥ ६९ ॥

(2) Pāda hypermètre.



र्बोधिसत्वैः सहात्मनः पारमितासातत्यकरणाधिमोक्षार्थं । अग्रत्वात्मावधारणमनस्कारः पारमिताग्रधर्मप्रवृत्त्या स्वात्मनः प्रधानभावसंदर्शनात् ।

एते शुभमनस्कारा दशपारमितान्वयाः ।
सर्वदा बोधिसत्वानां धातुपुष्टौ भवन्ति हि ॥ ७३ ॥

इति निगमनश्लोको गतार्थः । धर्मपर्येष्टिभेदे[1] द्वौ श्लोकौ ।

पुष्टेरध्याशयतो महती पर्येष्टिरिष्यते धीरे ।
सविवासा ह्यविवासा तथैव वैभुत्विकी[2] तेषां ॥ ७४ ॥[3]
असकाया लघुकाया प्रपूर्णकाया च बोधिसत्वानां ।
बहुमानसूक्ष्ममाना निर्माणा चैषणाभिमता ॥ ७५ ॥

त्रयोदशविधा पर्येष्टिः । पुष्टितः श्रुताधिमुक्तिपुष्ट्या । अध्याशयतो धर्ममुखस्रोतसा । महती चित्तत्वलाभिनां । सविप्रवासा प्रथमा । अविप्रवासा द्वितीया वैभुत्विकी तृतीया । अकाया श्रुतचिन्तामयी धर्मकायरहितत्वात् । सकाया भावनामयी अधिमुक्तिचर्याभूमौ । लघुकाया सप्तसु भूमिषु । परिपूर्णकाया शेषासु । बहुमानाधिमुक्तिचर्याभूमौ । सूक्ष्ममाना सप्तसु । निर्माणा शेषासु । धर्महेतुत्वपर्येष्टौ श्लोकः ।

रूपारूपे धर्मो लक्षणहेतुस्तथैव चारोग्यं ।
ऐश्वर्ये ऽभिज्ञाभिस्तदक्षयत्वे च धीराणां ॥ ७६ ॥

रूपे लक्षणहेतुर्धर्मः । अरूपे आरोग्यहेतुः क्लेशव्याधिप्रशमनात् । ऐश्वर्यहेतुरभिज्ञाभिस्तदक्षयत्वहेतुश्चानुपधिशेषनिर्वाणे ऽप्यनुपच्छेदात् । अत एवोक्तं ब्रह्मपरिपृच्छासूत्रे[4] । चतुर्भिर्धर्मैः समन्वागता बोधिसत्वा धर्मं पर्येषन्ते ।

(1) Ms. : शुभेदे.

(2) *Vaibhutvika*, mot nouveau, dérivé de *vibhutva*. Le chinois traduit par *cheng t'ong*, « pénétration surnaturelle ».

(3) Mètre āryā jusqu'au vers 76.

(4) Le sūtra désigné ici sous le nom de Brahma-paripṛcchā, et, dans la version chinoise, de : Fan t'ien wang wen king (= Brahma-deva-rāja-paripṛcchā-sūtra) est le Viçeṣa-cinta-brahma-paripṛcchā-sūtra, dont trois versions sont conservées dans la collection chinoise : 1° par Tchou Fa-hou, en 286 (Nanj. 197; éd. de Tōkyō, V, 1): 2° par Kumārajīva, en 402 (Nanj. 190; éd. de Tōkyō, V, 1); 3° par Bodhiruci, en 517 (Nanj. 189; éd. de Tōkyō, V, 1). Le passage corres-

रत्नसंज्ञया दुर्लभार्थेन भैषज्यसंज्ञया क्लेशव्याधिप्रशमनार्थेन अर्थसंज्ञया अविप्रणाशार्थेन निर्वाणसंज्ञया सर्वदुःखप्रशमनार्थेन। रत्नभूतानि हि लक्षणानि शोभाकरत्वादतस्तद्धेतुत्वाद्धर्मरत्नसंज्ञा । आरोग्यहेतुत्वाद्भैषज्यसंज्ञा अभिज्ञैश्वर्यहेतुत्वादर्थसंज्ञा । तद्क्षयहेतुत्वान्निर्वाणसंज्ञाक्षयनिर्भयतार्थेन । विकल्पपर्येष्टौ श्लोकः ।

अभावभावाध्यपवादकल्प एकत्वनानास्वविशेषकल्पाः ।
यथार्थनामाभिनिवेशकल्पाः जिनात्मजैः संपरिवर्जनीयाः ॥ ७७ ॥[1]

दशविधविकल्पो बोधिसत्वेन परिवर्जनीयः । अभावविकल्पो यस्य प्रतिपक्षेणाह। प्रज्ञापारमितायामिह बोधिसत्वो बोधिसत्व एव सन्निति[2]। भावविकल्पो यस्य प्रतिपक्षेणाह। बोधिसत्वं न समनुपश्यतीत्येवमादि। अध्यारोपविकल्पो यस्य प्रतिपक्षेणाह। रूपं शारिपुत्र स्वभावेन शून्यमिति। अपवादविकल्पो यस्य प्रतिपक्षेणाह । न शून्यतयेति । एकत्वविकल्पो यस्य प्रतिपक्षेणाह । या रूपस्य शून्यता न तद्रूपमिति। नानात्वविकल्पो यस्य प्रतिपक्षेणाह। न चान्यत्र शून्यताया रूपं रूपमेव शून्यता शून्यतैव रूपमिति । स्वलक्षणविकल्पो यस्य प्रतिपक्षेणाह। नाममात्रमिदं यदिदं रूपमिति। विशेषविकल्पो यस्य प्रतिपक्षेणाह। रूपस्य हि नोत्पादो न निरोधो न संक्लेशो न व्यवदानमिति । यथानामार्थाभिनिवेशविकल्पो यस्य प्रतिपक्षेणाह। कृत्रिमं नामेत्येवमादि । यथार्थनामाभिनिवेशविकल्पश्च यस्य प्रतिपक्षेणाह । तानि बोधिसत्वः सर्वनामानि न समनुपश्यत्यसमनुपश्यन्नाभिनिविशते यथार्थतयेत्यभिप्रायः ।

इति शुभमतिरेत्य यत्नमुग्रं द्वयपर्यैषितधर्मतास्वतत्वः ।
प्रतिशरणमतः सदा प्रजानां भवति गुणैः स समुद्रवत्प्रपूर्णः ॥ ७८ ॥[3]

अनेन निगमनश्लोकेन पर्यैष्टिमाहात्म्यं त्रिविधं दर्शयति । उपायमाहात्म्यमुग्रवीर्यतया संवृतिपरमार्थसत्यधर्मतापर्यैषणतश्च तत्वं सत्यमित्यर्थः । परार्थमाहात्म्यं प्रतिशरणीभावात् प्रजानां । स्वार्थमाहात्म्यं च गुणैः समुद्रवत् प्रपूर्णत्वात् ।

महायानसूत्रालंकारे धर्मपर्यैष्यधिकार एकादशः

pondant se retrouve dans les trois versions, au premier chapitre, section des Quatre Dharmas (V, 1, 3ª, col. 9-10; 26ª, col. 18-19; 52ª, col. 13-14).

(1) Mètre upajāti.

(2) Ms. : एदमन्निति.

(3) Mètre puṣpitāgrā, mais au deuxième pāda il faut scander ainsi : *părĭĕṣĭtă*.



# XII

धर्मदेशनायां मात्सर्यप्रतिषेधे श्लोकः ।

प्राणान्भोगांश्च धीराः प्रमुदितमनसः कृच्छ्रलब्धानसारान्
सत्वेभ्यो दुःखितेभ्यः सततमवसृजन्त्युच्चदानप्रकारैः ।
प्रागेवोदारधर्मं हितकरमसकृत्सर्वथैव प्रजानां
कृच्छ्रे नैवोपलब्धं भृशमवसृजतां वृद्धिगं चाव्ययं च ॥ १ ॥[1]

कृच्छ्रलब्धानप्यसारान् त्यक्त्वा प्राणान् भोगांश्च बोधिसत्वा दुःखितेभ्यः कारुण्यात् सततमुदारैर्विसर्गैरुत्सृजन्ति प्रागेव धर्मं यो नैव कृच्छ्रेण वा भृशमपि वावसृजतां वृद्धिं गच्छति न क्षयं। धर्मनैरर्थक्यसार्थक्ये श्लोकद्वयं ।

धर्मो नैव च देशितो भगवता प्रत्यात्मवेद्यो यत
आकृष्टा जनता च युक्तविहितैर्धर्मैः स्वकीं धर्मतां ।
स्वशान्त्यास्यपुटे विशुद्धिविपुले साधारणे ऽथाक्षये
लालेनेव कृपात्मभिस्त्वजगरप्रख्यैः समापादिता ॥ २ ॥[2]

तत्र बुद्धा अजगरोपमास्तेषां स्वशान्तिरास्यपुटं धर्मकायः । विशुद्धिविपुलं सवासनक्लेशज्ञेयावरणविशुद्धितः । साधारणं सर्वबुद्धैः अक्षयमात्यन्तिकत्वात्।

तस्मान्नैव निरर्थिका भवति सा या भावना योगिनां
तस्मान्नैव निरर्थिका भवति सा या देशना सौगती ।
दृष्टो ऽर्थः श्रुतमात्रकाद्यदि भवेत् स्याद्भावनापार्थिका
अश्रुत्वा यदि भावनामनुविशेत् स्याद्देशनापार्थिका ॥ ३ ॥

तस्मान्न निरर्थिका योगिनां भावना भवति प्रत्यात्मवेद्यस्य धर्मस्य तद्दर्शनाभिगमात् । न निरर्थिका देशना भवति युक्तिविहितैर्धर्मैः स्वधर्मतायां जनताकर्षणात् । यथा पुनर्भावना सार्थिका भवेद्देशना वा तत् श्लोकार्धेन दर्शयति। शेषं गतार्थं । देशनाविभागे श्लोकः ।

आगमतो अधिगमतो विभुत्वतो देशनाग्रसत्वानां ।
मुखतो रूपात्सर्वाकाशादुच्चरणता ऽपि . . . ॥ ४ ॥[3]

(1) Mètre sragdharā.

(2) Mètre çārdūlavikrīḍita jusqu'au vers 3.

(3) Mètre āryā jusqu'au vers 6. Il manque trois mores au second hémistiche du vers 4.

तत्र विभुत्वतो या महाभूमिप्रविष्टानां । सर्वतो रूपाद्या वृक्षवादित्रादिभ्यो ऽपि निश्चरति । शेषं गतार्थं । देशनासंपत्तौ श्लोकद्वयं ।

विषदा[1] संदेहजहा आदेया तत्वदर्शिका द्विविधा ।
संपन्नदेशनेयं विज्ञेयं बोधिसत्वानां ॥ ५ ॥

अयं चतुष्कार्थनिर्देशेन श्लोकः । यदुक्तं ब्रह्मपरिपृच्छायां[2] । चतुर्भिर्धर्मैः समन्वागता बोधिसत्वा महाधर्मदानं वितरन्ति सद्धर्मपरिग्रहणतया आत्मनः प्रश्नोत्तापनतया सत्पुरुषकर्मकरणतया संक्लेशव्यवदानसंदेशनतया च । एकेन हि बाहुश्रुत्याद्विषदा देशना भवति । द्वितीयेन महाप्राज्ञत्वात् संशयजहा परेषां संशयच्छेदात् । तृतीयेनानवद्यकर्मत्वादादेया । चतुर्थेन तत्वदर्शिका द्विविधा संक्लेशलक्षणस्य च तत्वस्य व्यवदानलक्षणस्य च द्वाभ्यां द्वाभ्यां सत्याभ्यां ।

मधुरा मदव्यपेता न च खिन्ना देशनाग्रसत्वानां ।
स्फुटचित्रयुक्तगमिका निरामिषा सर्वगा चैव ॥ ६ ॥

अस्मिन्द्वितीये श्लोके मधुरा परेणाक्षिप्तस्यापरुषवचनात् । मदव्यपेता स्तुतौ सिद्धौ वा मदाननुगमनात् । अखिन्ना अकिलासिकत्वात्[3] । स्फुटा निराचार्यमुष्टित्वात् कृत्स्नदेशनतः । चित्रा अपुनरुक्तत्वात् । युक्ता प्रमाणाविरुद्धत्वात् । गमिका प्रतीतपदव्यञ्जनत्वात् । निरामिषा प्रसन्नाधिकारानधिकत्वात् । सर्वत्रगा यानत्रयगतत्वात् । वाक्संपत्तौ श्लोकः ।

अदीना मधुरा सूक्ता प्रतीता विषदा तथा ।
. . . . . . . . . . . . . . . . . . . . . . ॥ ७ ॥[4]

[1] *Sic* ms., dans le vers et dans le commentaire. Le chinois traduit par *wou-wei*, «sans crainte», qui rend régulièrement le mot *vaiçāradya* (dérivé de *viçārada*). *Viṣada* n'est qu'une graphie altérée (et signalée comme telle dans le P.W.) du mot *viçada*.

[2] Le passage se retrouve dans le Viçeṣa-cinta-brahma-paripṛcchā-sūtra, environ cinq colonnes après le passage cité sur le vers XI, 76.

[3] *(A-)kilāsika(-tva)*, mot nouveau. Le chinois traduit par *hiai-tai*, «paresseux». Voir aussi XIII, 8, comm.

[4] Mètre anuṣṭubh; le second hémistiche manque. On peut à l'aide du chinois et du commentaire le rétablir ainsi :

यथार्हा निरामिषा च परिमितात्तया तथा ॥ ७ ॥



अदीना पौरी पर्षत्पूरणात् । मधुरा वल्गुः । सूक्ता विस्पष्टा सुनिरुक्ताक्षरत्वात् । प्रतीता विज्ञेया प्रतीताभिधानत्वात् । यथार्हा श्रवणीया विनेयानुरूपत्वात् । अनामिषा अनिःश्रितलाभसत्कारा लोके । प्रतता[1] अप्रतिकूला । परिमिता आयामखेदात् । विषदा[2] अपर्यात्ता । व्यञ्जनसंपत्तौ श्लोकद्वयं ।

उद्देशान्निर्देशात्तथैव यानानुलोमनात् श्लाक्ष्ण्यात् ।
प्रातीत्याद्याथार्हान्नैर्याण्यादानुकूल्यत्वात्[3] ॥ ८ ॥[4]

युक्तैः पदव्यञ्जनैरुद्देशात्प्रमाणाविरोधेन । सहितैर्निर्देशादुद्देशाविरोधेन । यानानुलोमनादानुलोमिकैर्यानत्रयाविरोधेन । श्लाक्ष्ण्यादनुच्छविकैरकष्टशब्दतया । प्रातीत्यादौपयिकैः प्रतीतार्थतया चार्थोपगमनात् । याथार्हात्प्रतिरूपैर्विनेयानुरूपतया । नैर्याण्यात्प्रदक्षिणैर्निर्वाणाधिकारतया । आनुकूल्यान्निपकस्याङ्गसंभारैः[5] शैक्षस्यार्याष्टाङ्गमार्गानुकूल्यात् ।

व्यञ्जनसंपच्चैषा विज्ञेया सर्वथाग्रसत्वानां ।
षष्ट्यङ्गी साचिन्त्या घोषो ऽनन्तस्तु सुगतानां ॥ ९ ॥

षष्ट्यङ्गी साचिन्त्या या गुह्यकाधिपतिनिर्देशे[6] बुद्धस्य षष्ट्याकारा वाग् निर्दिष्टा । पुनरपरं शान्तमते तथागतस्य षष्ट्याकारोपेता वाग् निश्चरति स्निग्धा च मृदुका च मनोज्ञा च मनोरमा च शुद्धा चेति विस्तरः । तत्र

[1] Ms. : प्रतिता.

[2] Le mot *viṣadā* a été certainement substitué par erreur au mot *akṣayā* que le chinois indique par la traduction *wou-tsin*.

[3] *Prātītya*, *yāthārha* (*yāthārhya?*), substantifs nouveaux, tirés de *pratīta* et *yathārha*.

[4] Mètre āryā jusqu'au vers 14.

[5] *Sic* ms. Le chinois ne fournit pas de correction probable.

[6] L'ouvrage cité sous ce titre de Guhyakādhipati-nirdeça est le Tathāgatācintyaguhya-nirdeça, dont le Tripiṭaka chinois possède deux traductions : l'une, incorporée dans le Ratnakūṭa, chap. 8-14, est due à Tchou Fa-hou et datée de 280 (Nanj. 23, 3; éd. de Tōkyō II, 1); l'autre est due à un autre moine du même nom, Fa-hou des Song, entre 1004 et 1058 (Nanj. 1043; éd. de Tōkyō II, 7). Le passage cité se retrouve dans l'une et dans l'autre (II, 1, 44b, col. 1 sq.; II, 7, 28a, col. 1 sq.).

स्निग्धा सत्वधातुकुशलमूलोपस्तम्भिकत्वात् । मृदुका दृष्ट एव धर्मे सुखसंस्पर्शत्वात् । मनोज्ञा स्वर्थत्वात् । मनोरमा सुव्यञ्जनत्वात् । शुद्धा निरुत्तरलोकोत्तरपृष्ठलब्धत्वात् । विमला सर्वक्लेशानुशयवासनाविसंयुक्तत्वात् । प्रभास्वरा प्रतीतपदव्यञ्जनत्वात् । वल्गुः सर्वतीर्थ्यकुमतिदृष्टिविघातबलगुणयुक्तत्वात् । श्रवणीया प्रतिपत्तिनैर्याणिकत्वात् । अनन्ता सर्वपरप्रवादिभिरनाक्षेद्यत्वात् । कला रञ्जिकत्वात् । विनीता रागादिप्रतिपक्षत्वात् । अकर्कशा शिक्षाप्रज्ञप्तिसुखोपायत्वात् । अपरुषा तद्व्यतिक्रमसंपन्निःसरणोपदेशकत्वात् । सुविनीता यानत्रयनयोपदेशिकत्वात् । कर्णसुखा विक्षेपप्रतिपक्षत्वात् । कायप्रह्लादनकरी समाध्यावाहकत्वात् । चित्तौद्बिल्यकरी विपश्यनाप्रामोद्यावाहफलकत्वात् । हृदयसंतुष्टिकरी संशयच्छेदिकत्वात् । प्रीतिसुखसंजननी मिथ्यानिश्चयापकर्षिकत्वात् । निःपरिदाहा प्रतिपत्तावविप्रतिसारत्वात् । आज्ञेया संपन्नश्रुतमयज्ञानाश्रयत्वात् । विज्ञेया संपन्नचिन्तामयज्ञानाश्रयत्वात् । विस्पष्टा अनाचार्यमुष्टिधर्मविहितत्वात् । प्रेमणीया ऽनुप्राप्तस्वकार्थानां प्रेमकरत्वात् । अभिनन्दनीया ऽननुप्राप्तस्वकार्थानां स्पृहणीयत्वात् । आज्ञापनीया अचिन्त्यधर्मसम्यग्दर्शिकत्वात् । विज्ञापनीया ऽचिन्त्यधर्मसम्यग्देशिकत्वात् । युक्ता प्रमाणाविरुद्धत्वात् । सहिता यथार्हविनेयदेशिकत्वात् । पुनरुक्तदोषजहा अवन्ध्यत्वात् । सिंहस्वरवेगा सर्वतीर्थ्यसंत्रासकत्वात् । नागस्वरशब्दा उदारत्वात् । मेघस्वरघोषा गम्भीरत्वात् । नागेन्द्ररुता आदेयत्वात् । किन्नरसंगीतिघोषा मधुरत्वात् । कलविङ्कस्वररुतरविता ऽभीक्ष्णभङ्गरत्वात् । ब्रह्मस्वररुतरविता दूरंगमत्वात् । जीवंजीवकस्वररुतरविता सर्वसिद्धिपूर्वंगममङ्गलत्वात् । देवेन्द्रमधुरनिर्घोषा अनतिक्रमणीयत्वात् । दुन्दुभिस्वरा सर्वमारप्रत्यर्थिकविजयपूर्वंगमत्वात् । अनुन्नता स्तुत्यसंक्लिष्टत्वात् । अनवनता निन्दाऽसंक्लिष्टत्वात् । सर्वशब्दानुप्रविष्टा सर्वव्याकरणसर्वाकारलक्षणानुप्रविष्टत्वात् । अपशब्दविगता स्मृतिसंप्रमोषे तदनिश्चरणत्वात् । अविकला विनेयकृत्यसर्वकालप्रत्युपस्थितत्वात् । अलीना लाभसत्कारानिश्रितत्वात् । अदीना सावद्यापगतत्वात् । प्रमुदिता अखेदित्वात् । प्रसृता सर्वविद्यास्थानकौशल्यानुगतत्वात् । अखिला सत्वानां तत्सकलार्थसंपादकत्वात् । सरिता[1] प्रबन्धानुपच्छिन्नत्वात् । ललिता विचित्राकारप्रत्युपस्थानत्वात् । सर्वस्वरपूरणी एकस्वरनैकशब्दविज्ञप्तिप्रत्युपस्थापनत्वात् । सर्वसत्वेन्द्रियसंतोषणी एकानेकार्थविज्ञप्तिप्रत्युपस्थानत्वात् । अनिन्दिता यथाप्रतिज्ञत्वात् । अचञ्चला आगमितकालप्रयुक्तत्वात् । अचपला अत्वरमाणविहितत्वात् । सर्वपर्षदनुरविता दूरान्तिकपर्षत्तुल्यश्रवणत्वात् ।

[1] *Saritā*, mot nouveau. La lecture est garantie par la version chinoise : *cheng lou*, «en constant écoulement».



सर्वाकारवरोपेता सर्वलौकिकार्थदृष्टान्तधर्मपरिणामिकत्वात् । देशनामाहात्म्ये चत्वारः श्लोकाः ।

वाचा पदैः सुयुक्तैरनुदेशविभागसंशयच्छेदैः ।
बहुलीकारानुगता ह्युद्घटितविपञ्चितज्ञेषु ॥ १० ॥

आख्याति वाचा । प्रज्ञापयति पदैः सुयुक्तैः । प्रस्थापयति विभाजयति विवृणोति यथाक्रममुद्देशविभागसंशयच्छेदैः । उत्तानीकरोति उत्तानीकरणं बहुलीकारानुगता देशना निश्चयबलाधानार्थं । देशयत्युद्घटितज्ञेषु । संप्रकाशयति विपञ्चितज्ञेषु ।

शुद्धा त्रिमण्डलेन हितेयं[1] देशना हि बुद्धानां ।
दोषैर्विवर्जिता पुनरष्टभिरेषैव विज्ञेया ॥ ११ ॥

शुद्धा त्रिमण्डलेनेति । येन च देशयति वाचा पदैश्च । यथा चोद्देशादिप्रकारैः । येषु चोद्घटितविपञ्चितज्ञेषु । एषैव च देशना पुनरष्टदोषविवर्जिता वेदितव्या यथाक्रमं ।

कौशीद्यमनवबोधो ह्यवकाशस्याकृतिर्ह्यनीतत्वं ।
संदेहस्याच्छेदस्तद्विगमस्यादृढीकरणं ॥ १२ ॥

ते पुनरष्टौ दोषाः । कौशीद्यमनवसंबोधः अवकाशस्याकरणं अनीतार्थत्वं संदेहस्याच्छेदना तद्विगमस्यादृढीकरणं निश्चयस्येत्यर्थः ।

खेदो ऽथ मत्सरित्वं दोषा ह्येते मता कथायां हि ।
तदभावाद्बुद्धानां निरुत्तरा देशना भवति ॥ १३ ॥

खेदो येनाभीक्ष्णं न देशयेत् । मत्सरित्वं चाकृत्स्नप्रकाशनात । अर्थसंपत्तौ श्लोकद्वयं ।

कल्याणो धर्मो ऽयं हेतुत्वाद्भक्तितुष्टिबुद्धीनां ।
द्विविधार्थः सुग्राह्यश्चतुर्गुणब्रह्मचर्यवदः ॥ १४ ॥
परैरसाधारणयोगकेवलं त्रिधातुकक्लेशविहानिपूरकं ।
स्वभावशुद्धं मलशुद्धितश्च तच्चतुर्गुणब्रह्मविचर्यमिष्यते ॥ १५ ॥[2]

[1] Il manque ici deux mores. — [2] Mètre vamçasthā.



IMPRIMERIE NATIONALE.

चतुर्गुणब्रह्मचर्यसंप्रकाशको धर्मः । आदिमध्यपर्यवसानकल्याणो यथाक्रमं श्रुतचिन्ताभावनाभिर्भक्तितुष्टिबुद्धिहेतुत्वात् । तत्र भक्तिरधिमुक्तिः संप्रत्ययः तुष्टिः प्रामोद्यं युक्तिनिध्यानाच्छक्यप्राप्तितां विदित्वा। बुद्धिः समाहितचित्तस्य यथाभूतज्ञानं। द्विविधार्थ इत्यतः स्वर्थः संवृतिपरमार्थसत्ययोगात्। सुग्राह्य इत्यतः सुव्यञ्जनः प्रतीतपदव्यञ्जनत्वात्। चतुर्गुणं ब्रह्मचर्यं। केवलं परैरसाधारणत्वात् परिपूर्णं त्रिधातुक्लेशप्रहाणपरिपूरणात्। परिशुद्धं स्वभावविशुद्धितो ऽनास्रवत्वात् । पर्यवदातं मलविशुद्धितः संतानविशुद्ध्या क्षीणास्रवाणां । अभिसंधिविभागे श्लोकद्वयं।

अवतारणसंधिश्च संधिर्लक्षणतो ऽपरः।
प्रतिपक्षाभिसंधिश्च संधिः परिणतावपि ॥ १६ ॥[1]
श्रावकेषु स्वभावेषु दोषाणां विनये तथा।
अभिधानस्य गाम्भीर्ये संधिरेष चतुर्विधः ॥ १७ ॥

चतुर्विधो ऽभिसंधिर्देशनायां बुद्धस्य वेदितव्यः । अवतारणाभिसंधिर्लक्षणाभिसंधिः प्रतिपक्षाभिसंधिः परिणामनाभिसंधिश्च । तत्रावतारणाभिसंधिः श्रावकेषु द्रष्टव्यः । शासनावतारणार्थमनुत्त्रासाय रूपाद्यस्तित्वदेशनात् । लक्षणाभिसंधिस्त्रिषु परिकल्पितादिस्वभावेषु द्रष्टव्यो निःस्वभावानुत्पन्नादिसर्वधर्मदेशनात्। प्रतिपक्षाभिसंधिर्दोषाणां विनये द्रष्टव्यो यथाष्टावरणप्रतिपक्षाग्रयानसंभाषासानुशंसे गाथाद्वयं वक्ष्यति। परिणामनाभिसंधिरभिधानगाम्भीर्ये द्रष्टव्यो यथाह।

असारे सारमतयो विपर्यासे च सुस्थिताः।
क्लेशेन च सुसंक्लिष्टा लभन्ते बोधिमुत्तमां ॥[2] इति।

अयमत्राभिसंधिः। असारे सारमतय इत्यविक्षेपे येषां सारबुद्धिः प्रधानबुद्धिर्विक्षेपो हि विसारश्चेतसः। विपर्यासे च सुस्थिता इति नित्यसुखशुच्यात्मग्राहविपर्ययेणानित्यादिके विपर्यासे सुस्थिता अपरिहाणितः। क्लेशेन च ससंक्लिष्टा इति दीर्घदुष्करव्यायामश्रमेणात्यर्थं परिक्लिष्टाः। अभिप्रायविभागे श्लोकः।

समताऽर्थान्तरे ज्ञेयस्तथा कालान्तरे पुनः।
पुद्गलस्याशये चैव अभिप्रायश्चतुर्विधः ॥ १८ ॥

(1) Mètre anuṣṭubh jusqu'au vers 18. — (2) J'ignore d'où est tiré ce çloka, dont le premier pāda est identique à celui du Dhammapada, I, 11.



चतुर्विधो ऽभिप्रायः । सतताभिप्रायो यदाह । अहमेव स तस्मिन्समये विपश्यी सम्यक्संबुद्धो ऽभूवमित्यविशिष्टधर्मकायत्वात् । अर्थान्तराभिप्रायो यदाह । निःस्वभावाः सर्वधर्मा अनुत्पन्ना इत्येवमादि अयथारुतार्थत्वात्। कालान्तराभिप्रायो यदाह । ये सुखावत्यां प्रणिधानं करिष्यन्ति ते तत्रोपपत्स्यन्त इति कालान्तरेणेत्यभिप्रायः । पुद्गलाशयाभिप्रायो यत्तदेव कुशलमूलं कस्यचित्प्रशंसते कस्यचिद्विगर्हते ऽल्पमात्रसंतुष्टस्य वैपुल्यसंग्रहात् महायानसूत्रान्तसानुशंसं गाथाद्वयमुपादायाह।

बुद्धे धर्मे ऽवज्ञा कौशीद्यं तुष्टिरल्पमात्रेण।
रागे माने चरितं कौकृत्यं चानियतभेदः ॥ १९ ॥[1]
सत्त्वानामावरणं तत्प्रतिपक्षो ऽग्रयानसंभाषा।
सर्वान्तरायदोषप्रहाणमेषां ततो भवति ॥ २० ॥
यो ग्रन्थतो ऽर्थतो वा गाथाद्वयधारणे प्रयुज्येत।
स हि दशविधमनुशंसं लभते सत्त्वोत्तमो धीमान् ॥ २१ ॥
कृत्स्नां च धातुपुष्टिं प्रामोद्यं चोत्तमं मरणकाले।
जन्म च यथाभिकामं जातिस्मरतां च सर्वत्र ॥ २२ ॥
बुद्धैश्च समवधानं तेभ्यः श्रवणं तथाग्रयानस्य।
अधिमुक्तिं सह बुद्ध्या द्वयमुखतामाशु बोधिं च ॥ २३ ॥

बुद्धे धर्मे ऽवज्ञेति पञ्च गाथाः। तत्रानियतभेदो बोधिसत्त्वानामनियतानां महायानाद्भेदः। अग्रयानसंभाषा या महायानदेशना । बुद्धे ऽवज्ञावरणस्य प्रतिपक्षसंभाषा । अहमेव स तेन कालेन विपश्यी सम्यक्संबुद्धो ऽभूवमिति। धर्मे ऽवज्ञावरणस्य प्रतिपक्षसंभाषा । इयतो गंगानदीवालिकासमानबुद्धान्पर्युपास्य महायाने ऽवबोध उत्पद्यत इति। कौशीद्यावरणस्य प्रतिपक्षसंभाषा। ये सुखावत्यां प्रणिधानं करिष्यन्ति ते तत्रोपपत्स्यन्त इति । विमलचन्द्रप्रभस्य च तथागतस्य नामधेयग्रहणमात्रेण नियतो भवत्यनुत्तरायां सम्यक्संबोधाविति। अल्पमात्रसंतुष्ट्यावरणस्य प्रतिपक्षसंभाषा। यत्र भगवान् क्वचिद्दानादि विवर्णयति[2] अन्यत्र वर्णितवान्। रागचरितस्य चावरणस्य प्रतिपक्षसंभाषा। यत्र भगवान् बुद्धक्षेत्रविभूतिं वर्णयति। मानचरितस्यावरणस्य प्रतिपक्षसंभाषा। यत्र भगवान् कस्यचिद् बुद्धस्याधिकां संपत्तिं वर्णयति । कौकृत्यावरणस्य

(1) Mètre āryā jusqu'au vers 23.
(2) *Vivarṇayati*, verbe nouveau. Le chinois traduit par *hoei tse*, «mal parler de, déprécier». Cf. Çikṣāsamuccaya, Index II, s.v. *vivarṇita*.

प्रतिपत्तसंभाषा । ये बुद्धबोधिसत्वेष्वकारं[1] करिष्यन्ति ते सर्वे स्वर्गोपगा भविष्यन्तीति। अनियतभेदस्यावरणस्य प्रतिपत्तसंभाषा। महाश्रावकाणां बुद्धत्वे व्याकरणदेशना एकयानदेशना च । कृत्स्नधातुपुष्टिः सर्वमहायानाधिष्ठानाय धातुपुष्टिस्तदावरणविगमात् सर्वत्र महायाने ऽधिमुक्तिलाभतः । द्वयमुखता समाधिमुखता धारणीमुखता च । दृष्टे धर्मे द्विविधो ऽनुशंसः सांपरायिके ऽष्टविधः क्रमेणोत्तरोत्तरविशेषलाभाद्वेदितव्यः । देशनानुशंसे श्लोकः ।

इति सुगतिरखेदवान् कृपालुः प्रथितयशाः सुविधिज्ञतामुपेतः ।
भवति सुकथिको हि बोधिसत्वस्तपति जने कथितैर्यथैव सूर्य : ॥ २४ ॥[2]

पञ्चभिः कारणैः सुकथिकत्वं । सूर्यवत्प्रतपनं चानुशंसः । लोकावर्जनतो बहुमतत्वात् । पञ्च कारणानि सुकथिकत्वस्य येनाविपरीतं दर्शयति अभीक्ष्णं निरामिषचित्त आदेयवाक्यविनेयानुरूपं च ।

महायानसूत्रालंकारे देशनाधिकारो द्वादशः

## XIII

प्रतिपत्तिविभागे षट् श्लोकाः ।

द्वेधा नैरात्म्यमाज्ञाय धीमान् पुद्गलधर्मयोः ।
द्वयमिथ्यात्वसम्यक्त्वं विवर्ज्येत त्रयेण हि ॥ १ ॥[3]

यथार्थमाज्ञाय धर्ममाज्ञाय धर्मानुधर्मप्रतिपन्नो[4] भवति सामीचीप्रतिपन्नो ऽनुधर्मचारी तत्संदर्शयति। तत्र द्विधा पुद्गलधर्मनैरात्म्यज्ञानं ग्राह्यग्राहकाभावतः । द्वयमिथ्यात्वसम्यक्त्वं विवर्ज्य त्रयं। अभावे च शून्यतासमाधिः परिकल्पितस्य स्वभावस्य। भावे चाप्रणिहितानिमित्तौ परतन्त्रनिष्पन्नयोः स्वभा-

(1) *Sic* ms. Le chinois traduit par *pou jao yi che*, «un acte sans intérêt». Cf. XIV, 38 : *kārakāṅkṣī*.

(2) Mètre puṣpitāgrā.

(3) Mètre anuṣṭubh jusqu'au v. 13.

(4) *Anudharma*, mot nouveau. Le chinois traduit littéralement par *soei fa*, «loi à la suite». Cf. pâli *anudhammo;* et : *sāmīciti anudhammatā*, dans Childers (s. v. *sāmīci*).



वयोः । एतत्समाधित्रयं लौकिकं न मिथ्यात्वं लोकोत्तरज्ञानावाहनात् । न सम्यक्त्वमलोकोत्तरत्वात् ।

अर्थज्ञः सर्वधर्माणां वेत्ति कोलसमानतां ।
श्रुततुष्टिप्रहाणाय धर्मज्ञस्तेन कथ्यते ॥ २ ॥

एवमर्थज्ञः सर्वधर्माणां सूत्रादीनां कोलोपमतां जानाति । श्रुतमात्रसंतुष्टिप्रहाणाय तेन धर्मज्ञो भवति ।

पार्थग्जनेन[1] ज्ञानेन प्रतिविध्य द्वयं तथा ।
तज्ज्ञानपरिनिष्पत्तावनुधर्मं प्रपद्यते ॥ ३ ॥

एतेन द्विविधेन पार्थग्जनेनार्थधर्मज्ञानेन द्वयं नैरात्म्यभावं[2] प्रतिविध्य यथाक्रमं तस्य ज्ञानस्य परिनिष्पत्त्यर्थं प्रतिपद्यते। एवमनुधर्मं प्रतिपद्यते।

ततो ज्ञानं स लभते लोकोत्तरमनुत्तरं ।
आदिभूमौ समं सर्वैर्बोधिसत्वैस्तदात्मभिः ॥ ४ ॥

ततो ज्ञानं स लभते लोकोत्तरमनुत्तरमिति । विशिष्टतरयानाभावात् । आदिभूमौ प्रमुदितायां भूमौ समं सर्वैर्बोधिसत्वैस्तदात्मभिरिति तद्भूमिकैरेवं सामीचीप्रतिपन्नो भवति तद्भूमिकबोधिसत्वसमतया ।

कृत्वा दर्शनहेयानां क्लेशानां सर्वसंचयं ।
ज्ञेयावरणज्ञानाय भावनायां प्रयुज्यते ॥ ५ ॥

श्लोको गतार्थः ।

व्यवस्थानाविकल्पेन ज्ञानेन सहचारिणा ।
अनुधर्मं चरत्येवं परिशिष्टासु भूमिषु ॥ ६ ॥

शेषेणानुधर्मचारित्वं दर्शयति । व्यवस्थानाविकल्पेनेति भूमिव्यवस्थानज्ञा-

(1) *Pārthagjana*, mot nouveau; adjectif régulièrement dérivé de *pṛthagjana*.

(2) Ms. : नैरात्म्येन्नवा. Le chinois dit : «Les deux impersonnalités, de l'homme et de la loi».

नेनाविकल्पेन च । सहचारिणेत्यनुसंबद्धचारिणा अन्योन्यनैरन्तर्येण । एतेन श्लोकद्वयेनानुधर्मचारित्वं दर्शितं। प्रतिपत्तावप्रमादक्रियायां चत्वारः श्लोकाः।

सुलाभो ऽथ स्वधिष्ठानः सुभूमिः सुसहायकः।
सुयोगो गुणवान् देशो यत्र धीमान् प्रपद्यते ॥ ७ ॥

चतुर्भिश्चक्रैरप्रमादक्रियां दर्शयति प्रतिरूपदेशवासादिभिः । तत्रानेन श्लोकेन प्रतिरूपदेशवासं दर्शयति । सुलाभश्चीवरपिण्डपातादीनां जीवितपरिष्काराणामकृच्छ्रेण लाभात् । स्वधिष्ठानो दुर्जनैर्दस्युप्रभृतिभिरनधिष्ठितत्वात् । सुभूमिरारोग्यभूमित्वात् । सुसहायकः सभागशीलदृष्टिसहायकत्वात् । सुयोगो दिवाल्पाकीर्णाभिलापकत्वात् रात्रौ चाल्पशब्दादिकत्वात् ।

बहुश्रुतो दृष्टसत्यो वाग्मी समनुकम्पकः।
अखिन्नो बोधिसत्त्वस्य ज्ञेयः सत्पुरुषो महान् ॥ ८ ॥

अनेन द्वितीयेन सत्पुरुषं दर्शयति । आगमाधिगमवाक्करणनिरामिषचित्ताकिलासित्वगुणयोगात्[1] ।

स्वालम्बना सुसंभारा सुभावनैव[2] देशिता।
सुनिर्याणप्रयोगा च आत्मसम्यक्प्रधानता ॥ ९ ॥

अनेन तृतीयेन योनिशोमनस्कारसंगृहीतामात्मनः सम्यक्प्रणिधानतां दर्शयति। सद्धर्मालम्बनतया सुसंभृतसंभारतया शमथादिनिमित्तानां कालेन कालं भावनातया अल्पमात्रासंतुष्टितया सत्युत्तरकरणीये सातत्यसत्कृत्यप्रयोगतया च ।

रतेः क्षणोपपत्तेश्च आरोग्यस्यापि कारणं।
समाधेर्विचयस्यापि पूर्वे हि कृतपुण्यता ॥ १० ॥

अनेन चतुर्थेन पूर्वकृतपुण्यतां पञ्चविधेन हेतुत्वेन दर्शयति। रतिहेतुत्वेन यतः प्रतिरूपदेशवासे ऽभिरमते । क्षणोपपत्तिहेतुत्वेन यतः सत्पुरुषायाश्रयं

[1] (*A-)kilāsi(-tva)*, mot nouveau. Le chinois traduit par *pou t'oei*, « sans recul ». Cf. note sur XII, 6, comm.

[2] Ms. : सुसंम्तब्धा भूपाया चैव. J'ai corrigé d'après le chinois, à l'aide du commentaire.



लभते। आरोग्यसमाधिप्रज्ञाहेतुत्वेन च यत आत्मनः सम्यक्प्रणिधानं संपद्यते। क्लेशत एव क्लेशनिःसरणे श्लोकास्त्रयः।

धर्मधातुविनिर्मुक्तो यस्माद्धर्मो न विद्यते।
तस्माद्रागादयस्तेषां बुद्धैर्निःसरणं मताः ॥ ११ ॥

यदुक्तं भगवता। नाहमन्यत्र रागाद्रागस्य निःसरणं वदाम्येवं द्वेषान्मोहादिति । तत्राभिसंधिं दर्शयति । यस्माद्धर्मधातुविनिर्मुक्तो धर्मो नास्ति धर्मताव्यतिरेकेण धर्माभावात् । तस्माद्रागादिधर्मतापि रागाद्याख्यां लभते स च निःसरणं रागादीनामित्येवं तत्राभिसंधिर्वेदितव्यः।

धर्मधातुविनिर्मुक्तो यस्माद्धर्मो न विद्यते।
तस्मात्संक्लेशनिर्देशे स संविद्धीमतां मतः ॥ १२ ॥

यदुक्तं। अविद्या च बोधिश्चैकमिति। तत्रापि सक्लेशनिर्देशे स एवाभिसंधिः। अविद्या बोधिधर्मता स्यात्तदुपचारात्।

यतस्तानेव रागादीन्योनिशः प्रतिपद्यते।
ततो विमुच्यते तेभ्यस्तेनैषां निःसृतिस्ततः ॥ १३ ॥

तानेव रागादीन्योनिशः प्रतिपद्यमानस्तेभ्यो विमुच्यते तस्मात्परिज्ञातास्त एव तेषां निःसरणं भवतीत्ययमत्राभिसंधिः । श्रावकप्रत्येकबुद्धमनसिकारपरिवर्जने श्लोकद्वयं।

न खलु जिनसुतानां बाधकं दुःखमुग्रं
नरकभवनवासैः सत्त्वहेतोः कथंचित्।
शमभवगुणदोषप्रेरिता हीनयाने
विविधशुभविकल्पा बाधका धीमतां तु ॥ १४ ॥[1]
न खलु नरकवासो धीमतां सर्वकालं
विमलविपुलबोधेरन्तरायं करोति।
स्वहितपरमशीतस्त्वन्ययाने विकल्पः
परमसुखविहारे ऽप्यन्तरायं करोति ॥ १५ ॥

[1] Mètre mālinī jusqu'au vers 15.

अनयोः श्लोकयोरेकस्य द्वितीयः साधकः । उभौ गतार्थौ । निःस्वभावताप्रकृतिपरिशुद्धित्रासप्रतिषेधे चत्वारः श्लोकाः ।

धर्माभावोपलब्धिश्च निःसंक्लेशविशुद्धिता ।
मायादिसदृशी ज्ञेया आकाशसदृशी तथा ॥ १६ ॥[1]
यथैव चित्रे विधिवद्विचित्रिते नतोन्नतं नास्ति च दृश्यते ऽथ च ।
अभूतकल्पे ऽपि तथैव सर्वथा द्वयं सदा नास्ति च दृश्यते ऽथ च ॥ १७ ॥[2]
यथैव तोये लुलिते प्रसादिते न जायते सा पुनरच्छतान्यतः ।
मलापकर्षस्तु स तत्र केवलः स्वचित्तशुद्धौ विधिरेष एव हि ॥ १८ ॥
मतं च चित्तं प्रकृतिप्रभास्वरं सदा तदागन्तुकदोषदूषितं ।
न धर्मताचित्तमृते ऽन्यचेतसः प्रभास्वरत्वं प्रकृतौ विधीयते ॥ १९ ॥

धर्माभावश्च धर्मोपलब्धिश्चेति त्रासस्थानं निःसंक्लेशता च धर्मधातोः प्रकृत्या विशुद्धता च पश्चादिति त्रासस्थानं बालानां । तद्यथाक्रमं मायादिसादृश्येनाकाशसादृश्येन च प्रसाधयंस्ततस्त्रासं प्रतिषेधयति । तथा चित्रे नतोन्नतसादृश्येन लुलितप्रसादिततोयसादृश्येन च यथाक्रमं । चतुर्थेन श्लोकेन तोयसाधर्म्यं चित्ते प्रतिपादयति । यथा तोयं प्रकृत्या प्रसन्नमागन्तुकेन तु कालुष्येण लुलितं भवत्येवं चित्तं प्रकृत्या प्रभास्वरं मतमागन्तुकैस्तु दोषैर्दूषितमिति । न च धर्मताचित्तादृते ऽन्यस्य चेतसः परतन्त्रलक्षणस्य प्रकृतिप्रभास्वरत्वं विधीयते । तस्माच्चित्ततथतैवात्र चित्तं वेदितव्यं । रागजापत्तिप्रतिषेधे चत्वारः श्लोकाः ।

बोधिसत्त्वस्य सत्त्वेषु प्रेम मज्जगतं महत् ।
यथैकपुत्रके तस्मात्सदा हितकरं मतं ॥ २० ॥[3]
सत्त्वेषु हितकारित्वान्नैत्यापत्तिं स रागजां ।
द्वेषो विरुध्यते त्वस्य सर्वसत्त्वेषु सत्पथा ॥ २१ ॥
यथा कपोती स्वसुतातिवत्सला स्वभावकांस्तानुपगुह्य तिष्ठति ।
तथाविधायां प्रतिघो विरुध्यते सुतेषु तद्वत्सकृपे ऽपि देहिषु ॥ २२ ॥[4]
मैत्री यतः प्रतिघचित्तमतो विरुद्धं
शान्तिर्यतो व्यसनचित्तमतो विरुद्धं ।

[1] Mètre anuṣṭubh.
[2] Mètre vaṃçasthā jusqu'au vers 19.
[3] Mètre anuṣṭubh jusqu'au vers 21.
[4] Mètre vaṃçasthā.



अर्थो यतो निकृतिचित्तमतो विरुद्धं
ह्लादो यतः प्रतिभयं न ततो विरुद्धं ॥ २३ ॥[1]

यत्सत्त्वेषु बोधिसत्त्वस्य प्रेम सो ऽत्र रागो ऽभिप्रेतस्तत्कृतामापत्तिं तेषां प्रतिषेधयति । सत्त्वहितक्रियाहेतुत्वात् । कपोतीमुदाहरति तद्गूढरागत्वात् अपत्यस्नेहाधिमात्रतया सकृपे बोधिसत्त्वे देहिषु सत्त्वेषु प्रतिघो विरुध्यते । बोधिसत्त्वानां सत्त्वेषु मैत्री भवति व्यसनशान्तिः अर्थदानं ह्लादश्च प्रीत्युत्पादात् । यत इमे मैत्र्यादयस्तत एव प्रतिघचित्तं विरुद्धं । तत्पूर्वकाणि च व्यसनचित्तादीनि । प्रतिपत्तिभेदे पञ्च श्लोकाः ।

यथातुरः सुभैषज्ये संसारे प्रतिपद्यते ।
आतुरे च यथा वैद्यः सत्त्वेषु प्रतिपद्यते ॥ २४ ॥[2]
अनिष्पन्ने यथा चेटे स्वात्मनि प्रतिपद्यते ।
वणिग्यथा पुनः पण्ये कामेषु प्रतिपद्यते ॥ २५ ॥
यथैव रजको वस्त्रे कर्मणे प्रतिपद्यते ।
पिता यथा सुते बाले सत्त्वाहेठे प्रपद्यते ॥ २६ ॥
अग्न्यर्थी वाधरारण्यां सातत्ये प्रतिपद्यते ।
वैश्वासिको वानिष्पन्ने अधिचित्ते प्रपद्यते ॥ २७ ॥
मायाकार इव ज्ञेये प्रज्ञया प्रतिपद्यते ।
प्रतिपत्तिर्यथा यस्मिन् बोधिसत्त्वस्य सा मता ॥ २८ ॥

यथा यस्मिन्प्रतिपद्यते तदभिद्योतयति । यथेति सुभैषज्यादिष्विवातुरादयः । यत्रेति संसारादिषु प्रतिसंख्याय संसारनिषेवणात् । कारुण्येन क्लेशातुरसत्त्वापरित्यागात् । स्वप्रणिहितत्वचित्तकरणात् । दानादिपारमिताभिश्च यथाक्रमं भोगवृद्धिनयनात् । कायादिकर्मपरिशोधनात् । सत्त्वापकाराकोपात् । कुशलभावनानिरन्तराभियोगात् । समाध्यनास्वादनात् । ज्ञेयाविपर्यासाच्च । प्रतिपत्तित्रिमण्डलपरिशुद्धौ श्लोकः ।

इति सततमुदारयुक्तवीर्यो द्वयपरिपाचनशोधने सुयुक्तः ।
परमविमलनिर्विकल्पबुद्ध्या व्रजति स सिद्धिमनुत्तमां क्रमेण ॥ २९ ॥[3]

[1] Mètre vasantatilakā. — [2] Mètre anuṣṭubh jusqu'au vers 28. — [3] Mètre puṣpitāgrā.

इति निर्विकल्पेन धर्मनैरात्म्यज्ञानेन प्रतिपत्तुः प्रतिपत्तव्यस्य प्रतिपत्तेश्चाविकल्पना त्रिमण्डलपरिशुद्धिर्वेदितव्या । द्वयपरिपाचनशोधनेषु युक्त इति सत्वानामात्मनश्च ।

महायानसूत्रालंकारे प्रतिपत्त्यधिकारस्त्रयोदशः

## XIV

अववादानुशासनीविभागे श्लोका एकपञ्चाशत् ।

कल्पासंख्येयनिर्यातो ह्यधिमुक्तिं विवर्धयन् ।
संपूर्णः कुशलैर्धर्मैः सागरो वारिभिर्यथा ॥ १ ॥[1]

अधिमुक्तिं विवर्धयन्नित्यधिमात्रावस्थानयनात् । शेषं गतार्थं ।

तथा संभृतसंभारो ह्यादिशुद्धो जिनात्मजः ।
सुविज्ञः कल्पचित्तश्च भावनायां प्रयुज्यते ॥ २ ॥

आदिशुद्धो बोधिसत्वसंवरपरिशोधनान्महायाने दृष्ट्यृजुकरणाच्चाविपरीतार्थग्रहणतः । सुविज्ञो बहुश्रुतत्वात् । कल्पचित्तो विनिवरणत्वात् ।

धर्मस्रोतसि बुद्धेभ्यो ऽववादं लभते तदा ।
विपुलं शमथज्ञानवैपुल्यगमनाय हि ॥ ३ ॥

श्लोको गतार्थः ।

ततः सूत्रादिके धर्मे सो ऽद्वयार्थविभावके ।
सूत्रादिनाम्नि बध्नीयाच्चित्तं प्रथमतो यतिः ॥ ४ ॥
ततः पदप्रभेदेषु विचरेदनुपूर्वशः ।
विचारयेत्तदर्थांश्च प्रत्यात्म योनिशश्च सः ॥ ५ ॥
अवधृत्य च तानर्थान्धर्मे संकलयेत्पुनः ।
ततः कुर्यात्समाशास्तिं[2] तदर्थाधिगमाय सः ॥ ६ ॥

[1] Mètre anuṣṭubh jusqu'au vers 36.

[2] *Samāçāsti*, mot nouveau. Le chinois traduit par *k'iou*, «désir».



सूत्रगेयादिके धर्मे यत्सूत्रादिनाम दशभूमिकमित्येवमादि तत्र चित्तं प्रथमतो बध्नीयात् । एभिस्त्रिभिः श्लोकैः षट् चित्तान्युपदिष्टानि । मूलचित्तमनुचरचित्तं विचारणाचित्तमवधारणाचित्तं संकलनचित्तमाशास्तिचित्तं च । तत्र मूलचित्तं यत्सूत्रादीनां धर्माणां नामालम्बनं । अववादं श्रुत्वा स्वयं वा कल्पयित्वा । तद्यथा ऽनित्यं दुःखं शून्यमनात्म्यं च योनिशो न चेत्यादि । अनुचरचित्तं येन सूत्रादीनां नामत आलम्बितानां पदप्रभेदमनुगच्छति । विचारणाचित्तं येनार्थं व्यञ्जनं च विचारयति । तत्रार्थं चतुर्भिराकारैर्विचारयति गणनया तुलनया मीमांसया प्रत्यवेक्षणया च । तत्र गणना संग्रहणं तद्यथा रूपं दशायतनान्येकस्य च प्रदेशो वेदना षड् वेदनाकाया इत्येवमादि । तुलना संख्यावतो धर्मस्य शमलक्षग्रहणमनाध्यारोपानपवादतः । मीमांसा प्रमाणपरीक्षा । प्रत्यवेक्षणा गणिततुलितमीमांसितस्यार्थस्यावलोकनं । व्यञ्जनं द्वाभ्यामाकाराभ्यां विचारयति । सार्थतया च समस्तानां व्यञ्जनानां निरर्थतया च व्यस्तानां । अवधारणाचित्तं येन यथानुचरितं विचारितं वा तन्निमित्तमवधारयति । संकलनचित्तं तद्यथा विचारितमर्थं मूलचित्ते संक्षिप्य परिपिण्डिताकारं वर्तते । आशास्तिचित्तं यदर्थं प्रयुक्तो भवति समा[1] तत्परिपूर्यर्थं वा श्रामण्यफलार्थं वा भूमिप्रवेशार्थं वा विशेषगमनार्थं वा तच्छन्दसहगतं वर्तते । चित्तमेव ह्यालम्बनप्रतिभासं वर्तते न चित्तादन्यदालम्बनमस्तीति जानतो वा चित्तमात्रमजानतो वा चित्तमेवालम्बनं नान्यत् । इति षड्विधं चित्तमालम्बनं व्यवस्थाप्यते ।

एषेत प्रत्यवेक्षेत मनोजल्पैः प्रबन्धतः ।
निर्जल्पैकरसैश्चापि मनस्कारैर्विचारयेत् ॥ ७ ॥
ज्ञेयः शमथमार्गो ऽस्य धर्मनाम च पिण्डितं ।
ज्ञेयो विपश्यनामार्गस्तदर्थानां विचारणा ॥ ८ ॥
युगनद्धश्च विज्ञेयो मार्गस्तत्पिण्डितं पुनः ।
लीनं चित्तस्य गृह्णीयादुद्धतं शमयेत्पुनः ॥ ९ ॥
शमप्राप्तमुपेक्षेत तस्मिन्नालम्बने पुनः ।
सातत्येनाथ सत्कृत्य सर्वस्मिन्योजयेत्पुनः ॥ १० ॥

एभिश्चतुर्भिः श्लोकैरेकादश मनस्कारा उपदिष्टाः । सवितर्कः सविचारः । अवितर्को विचारमात्रः । अवितर्को ऽविचारः । शमथमनस्कारः । विपश्यना-

[1] *Sic* ms. Le chinois ici est trop abrégé pour fournir la correction.

मनस्कारः । युगनद्धमनस्कारः । शमथनिमित्तमनस्कारः । उपेक्षानिमित्तमनस्कारः । सातत्यमनस्कारः । सत्कृत्यमनस्कारश्च ।

निबध्यालम्बने चित्तं तत्प्रवेधं न विक्षिपेत् ।
अवगम्याशु विक्षेपं तस्मिन् प्रतिहरेत्पुनः ॥ ११ ॥
प्रत्यात्मं संक्षिपेच्चित्तमुपर्युपरि बुद्धिमान् ।
ततश्च रमयेच्चित्तं समाधौ गुणदर्शनात् ॥ १२ ॥
अरतिं शमयेत्तस्मिन्विक्षेपदोषदर्शनात् ।
अभिध्यादौर्मनस्यादीन्व्युत्थितान् शमयेत्तथा ॥ १३ ॥
ततश्च साभिसंस्कारां चित्ते स्वरसवाहितां ।
लभेतानभिसंस्कारान् तदभ्यासात्पुनर्यतिः ॥ १४ ॥

एभिश्चतुर्भिः श्लोकैर्नवाकारया चित्तस्थित्या स्थित्युपाय उपदिष्टः । चित्तं स्थापयति संस्थापयति अवस्थापयति उपस्थापयति दमयति शमयति व्युपशमयत्येकोतीकरोति चित्तं समादधातीति नवाकाराः ।

ततः स तनुकां लब्ध्वा प्रश्रब्धिं कायचेतसोः ।
विज्ञेयः स मनस्कारः पुनस्तान्स विवर्धयन् ॥ १५ ॥
वृद्धिदूरंगमत्वेन मौलीं स लभते स्थितिं ।
तां शोधयन्नभिज्ञार्थमेति कर्मण्यतां परां ॥ १६ ॥
ध्याने ऽभिज्ञाभिनिर्हाराल्लोकधातून्स गच्छति ।
पूजार्थमप्रमेयाणां बुद्धानां श्रवणाय च ॥ १७ ॥
अप्रमेयानुपास्यासौ बुद्धान्कल्पैरमेयगैः ।
कर्मण्यतां परामेति चेतसस्तदुपासनात् ॥ १८ ॥

एति कर्मण्यतां परां ध्याने इति संबन्धनीयं । कल्पैरमेयगैरित्यप्रमेयसंख्यागतैः । शेषमेषां श्लोकानां गतार्थं ।

ततो ऽनुशंसान् लभते पञ्च शुद्धेः स पूर्वगान् ।
विशुद्धिभाजनत्वं च ततो याति निरुत्तरं ॥ १९ ॥
छत्नादौ स्वल्पकायो हि द्रवते ऽस्य प्रतिक्षणं ।
आपूर्यते च प्रश्रब्ध्या कायचित्तं समन्ततः ॥ २० ॥
अपरिच्छिन्नमाभासं धर्माणां वेत्ति सर्वतः ।
अकल्पितानि संशुद्धौ निमित्तानि प्रपश्यति ॥ २१ ॥
प्रपूरौ च विशुद्धौ च धर्मकायस्य सर्वथा ।
करोति सततं धीमानेवं हेतुपरिग्रहं ॥ २२ ॥



ततः शुद्धेः पूर्वंगमान्पञ्चानुशंसान् लभते । शुद्धेरिति शुद्ध्याशयभूमेः । तेषां च लाभाद्विशुद्धिभाजनत्वं प्राप्नोति । निरुत्तरं यानानन्तर्यात् । प्रपूरौ च विशुद्धौ च धर्मकायस्येति दशम्यां भूमौ परिपूरिर्बुद्धभूमौ विशुद्धिः । एतेषां पञ्चानामनुशंसानां त्रयः शमथपक्षा द्वौ विपश्यनापक्षौ वेदितव्यौ । अतो यावल्लौकिकः समुदागमः ।

ततश्चासौ तथाभूतो बोधिसत्वः समाहितः ।
मनोजल्पाद्विनिर्मुक्तान् सर्वार्थान्न प्रपश्यति ॥ २३ ॥
धर्मलोकस्य वृद्ध्यर्थं वीर्यमारभते दृढं ।
धर्मालोकविवृद्ध्या च चित्तमात्रे ऽवतिष्ठते ॥ २४ ॥
सर्वार्थप्रतिभासत्वं ततश्चित्ते प्रपश्यति ।
प्रहीनो ग्राह्यनिक्षेपस्तदा तस्य भवत्यसौ ॥ २५ ॥
ततो ग्राहकविक्षेपः केवलो ऽस्यावशिष्यते ।
आनन्तर्यसमाधिं च स्पृशत्याशु तदा पुनः ॥ २६ ॥

अत ऊर्ध्वं निर्वेधभागीयानि । तथाभूतो बोधिसत्वः समाहितचित्तो मनोजल्पाद्विनिर्मुक्तान् सर्वधर्मान्न पश्यति स्वलक्षणसामान्यलक्षणाख्यान्मनोजल्पमात्रमेव ख्याति । सास्योष्मगतावस्था । अयं स आलोको यमधिकृत्योक्तं क्षारनद्याम्[1] । आलोक इति धर्मनिध्यानक्षान्तेरेतदधिवचनमिति । स तस्यैव धर्मालोकस्य विवृद्ध्यर्थमास्थितक्रियया दृढं वीर्यमारभते । सास्य मूर्धावस्था । धर्मालोकविवृद्ध्या च चित्तमात्रे ऽवतिष्ठते । चित्तमेतदिति प्रतिवेधात् । ततश्चित्त एव सर्वार्थप्रतिभासत्वं पश्यति । न चित्तादन्यमर्थं । तदा चास्य ग्राह्यविक्षेपः प्रहीनो भवति । ग्राहकविक्षेपः केवलो ऽवशिष्यते । सास्य क्षान्त्यवस्था । तदा च क्षिप्रमानन्तर्यसमाधिं स्पृशति । सास्य लौकिकाग्रधर्मावस्था । केन कारणेन स आनन्तर्य उच्यते ।

यतो ग्राहकविक्षेपो हीयते तदनन्तरं ।
ज्ञेयान्युष्मगतादीनि एतानि हि यथाक्रमं ॥ २७ ॥

इत्येतान्युष्मगतादीनि निर्वेधभागीयानि ।

द्वयग्राहविसंयुक्तं लोकोत्तरमनुत्तरं ।
निर्विकल्पं मलापेतं ज्ञानं स लभते पुनः ॥ २८ ॥

(1) Titre d'un sūtra, puisque le chinois traduit *hoei ho king*, « le Sūtra du Fleuve de Cendres ». Mais je n'ai pas retrouvé de sūtra de ce nom.

अतः परेण दर्शनमार्गावस्था । द्वयग्राहविसंयुक्तं ग्राह्यग्राहग्राहकग्राहविसंयोगात् । अनुत्तरं यानानन्तर्येण । निर्विकल्पं ग्राह्यग्राहकविकल्पविसंयोगात् । मलापेतं दर्शनज्ञेयक्लेशप्रहाणात् । एतेन विरजो विगतमलमित्युक्तं भवति ।

सास्याश्रयपरावृत्तिः प्रथमा भूमिरिष्यते ।
अमेयैश्चास्य सा कल्पैः सुविशुद्धिं निगच्छति ॥ २९ ॥

श्लोको गतार्थः ।

धर्मधातोश्च समतां प्रतिविध्य पुनस्तदा ।
सर्वसत्वेषु लभते सदात्मसमचित्ततां ॥ ३० ॥
निरात्मतायां दुःखार्थे कृत्ये निःप्रतिकर्मणि ।
सत्वेषु समचित्तो ऽसौ यथान्ये ऽपि जिनात्मजाः ॥ ३१ ॥

धर्मनैरात्म्येन च धर्मसमतां प्रतिविध्य सर्वसत्वेषु सदा आत्मसमचित्ततां प्रतिलभते । पञ्चविधया समतया । नैरात्म्यसमतया दुःखसमतया स्वपरसंतानेषु नैरात्म्यदुःखतयोरविशेषात् । कृत्यसमतया स्वपरदुःखप्रहाणकामतासामान्यात् । निष्प्रतिकारसमतया । आत्मन इव परतः प्रतिकारानभिनन्दनात् । तदन्यबोधिसत्वसमतया च यथा तैरभिसमितं तथाभिसमयात् ।

त्रैधातुकात्मसंस्कारानभूतपरिकल्पतः ।
ज्ञानेन सुविशुद्धेन अद्वयार्थेन पश्यति ॥ ३२ ॥

स त्रैधातुकात्मसंस्कारानभूतपरिकल्पनामात्रान्पश्यति । सुविशुद्धेन ज्ञानेन लोकोत्तरत्वात् । अद्वयार्थेनेत्यग्राह्यग्राहकार्थेन ।

तदभावस्य भावं च विमुक्तं दृष्टिहायिभिः[1] ।
लब्ध्वा दर्शनमार्गो हि तदा तेन निरुच्यते ॥ ३३ ॥

तस्य ग्राह्यग्राहकाभावस्य भावं धर्मधातुन्दर्शनप्रहातव्यैः क्लेशैर्विमुक्तं पश्यति ।

अभावशून्यतां ज्ञात्वा तथाभावस्य शून्यतां ।
प्रकृत्या शून्यतां ज्ञात्वा शून्यज्ञ इति कथ्यते ॥ ३४ ॥

[1] *Hāyin*, mot nouveau, glosé dans le commentaire par *prahātavya*. Le chinois traduit de même par *kien cho mie*, «que la vue anéantit».



स च बोधिसत्वः शून्यज्ञ इत्युच्यते । त्रिविधशून्यताज्ञानात् । अभावशून्यता परिकल्पितः स्वभावः स्वेन लक्षणेनाभावात् । तथाभावस्य शून्यता परतन्त्रस्य स हि न तथाभावो यथा कल्प्यते स्वेन लक्षणेन भावः । प्रकृतिशून्यता परिनिष्पन्नः स्वभावः शून्यतास्वभावत्वात् ।

अनिमित्तपदं ज्ञेयं विकल्पानां च संक्षयः ।
अभूतपरिकल्पस्य तदप्रणिहितस्य हि ॥ ३५ ॥

अनिमित्तपदं ज्ञेयं विकल्पानां च संक्षयः । अभूतपरिकल्पस्तदप्रणिधानस्य पदमालम्बनमित्यर्थः ।

तेन दर्शनमार्गेण सह लाभः सदा मतः ।
सर्वेषां बोधिपक्षाणां विचित्राणां जिनात्मजे ॥ ३६ ॥

तेन दर्शनमार्गेण सह बोधिसत्वस्य सर्वेषां बोधिपक्षाणां धर्माणां लाभो वेदितव्यः स्मृत्युपस्थानादीनां ।

संस्कारमात्रं जगदेत्य बुद्ध्या निरात्मकं दुःखविरूढिमात्रं ।
विहाय यानर्थमयात्मदृष्टिः महात्मदृष्टिं श्रयते महार्थां ॥ ३७ ॥[1]
विनात्मदृष्ट्या य इहात्मदृष्टिर्विनापि दुःखेन सुदुःखितश्च ।
सर्वार्थकर्ता न च कारकाङ्क्षी यथात्मनः स्वात्महितानि कृत्वा ॥ ३८ ॥
यो मुक्तचित्तः परया विमुक्त्या बद्धश्च गाढायतबन्धनेन ।
दुःखस्य पर्यन्तमपश्यमानः प्रयुज्यते चैव करोति चैव ॥ ३९ ॥
स्वं दुःखमुद्वोढुमिहासमर्थो लोकः कुतः पिण्डितमन्यदुःखं ।
जन्मैकमालोकयते त्वचिन्तो विपर्ययात्तस्य तु बोधिसत्वः ॥ ४० ॥
यत्प्रेम या वत्सलता प्रयोगः सत्वेष्वखेदश्च जिनात्मजानां ।
आश्चर्यमेतत्परमं भवेषु न चैव सत्वात्मसमानभावात् ॥ ४१ ॥

एभिः पञ्चभिः श्लोकैर्दर्शनमार्गलाभिनो बोधिसत्वस्य माहात्म्योद्भावनं । अनर्थमयात्मदृष्टिर्या क्लिष्टा सत्कायदृष्टिः । महात्मदृष्टिरिति महार्था या सर्वसत्वेष्वात्मसमचित्तलाभात्मदृष्टिः । सा हि सर्वसत्वार्थक्रियाहेतुत्वात् महार्था । विनात्मदृष्ट्या अनर्थमय्यात्मदृष्टिर्महार्था या विनापि दुःखेन स्वसंतानजेन सुदुःखिता सर्वसत्वसंतानजेन । यो विमुक्तचित्तो दर्शनप्रहातव्येभ्यः परया विमुक्त्यानुत्तरेण यानेन । बद्धश्च गाढायतबन्धनेन सर्वसत्वसांतानिकेन

[1] Mètre upajāti jusqu'au vers 41.

दुःखस्य पर्यन्तं न पश्यति स्वधातोरनन्तत्वादाकाशवत् प्रयुज्यते च दुःखस्यान्तक्रियायै सत्त्वानां करोति चैव तामप्रमेयाणां सत्त्वानां । विपर्ययात्तस्य तु बोधिसत्त्वः स हि संपिण्डितसर्वसत्त्वदुःखं यावल्लोकगतमुद्वोढुं समर्थः । या सत्त्वेषु बोधिसत्त्वस्य प्रियता या च हितसुखैषिता यश्च तदर्थं प्रयोगो यश्चित्तप्रयुक्तस्याखेद एतत्सर्वमाश्चर्यं परमं लोकेषु। न चैवाश्चर्यं सत्त्वानामात्मसमानत्वात्।

ततोऽसौ भावनामार्गे परिशिष्टासु भूमिषु ।
ज्ञानस्य द्विविधस्येह भावनायै प्रयुज्यते ॥ ४२ ॥[1]
निर्विकल्पं च तज्ज्ञानं बुद्धधर्मविशोधकं ।
अन्यद्यथाव्यवस्थानं सत्त्वानां परिपाचकं ॥ ४३ ॥
भावनायाश्च निर्याणं द्व्यसंख्येयसमाप्तितः ।
पश्चिमां भावनामेत्य बोधिसत्त्वोऽभिषिक्तकः ॥ ४४ ॥
वज्रोपमं समाधानं विकल्पाभेद्यमेत्य च ।
निष्ठाश्रयपरावृत्तिं सर्वावरणनिर्मलां ॥ ४५ ॥
सर्वाकारज्ञतां चैव लभतेऽनुत्तरं पदं ।
यत्रस्थः सर्वसत्त्वानां हिताय प्रतिपद्यते ॥ ४६ ॥

एभिर्भावनामार्गः परिदीपितः। द्विविधं ज्ञानं । निर्विकल्पं च येनात्मनो बुद्धधर्मान् विशोधयति। यथाव्यवस्थानं च लोकोत्तरपृष्ठलब्धं लौकिकं येन सत्त्वान्परिपाचयति । असंख्येयद्वयस्य समाप्तौ पश्चिमां भावनामागम्यावसानगतामभिषिक्तो वज्रोपमं समाधिं लभते। विकल्पानुशयाभेद्यार्थेन वज्रोपमः। ततो निष्ठागतामाश्रयपरावृत्तिं लभते सर्वक्लेशज्ञेयावरणनिर्मलां। सर्वाकारज्ञतां चानुत्तरपदं यत्रस्थो यावत्संसारमभिसंबोधिनिर्वाणसंदर्शनादिभिः सत्त्वानां हिताय प्रतिपद्यते।

कथं तथा दुर्लभदर्शने मुनौ भवेन्महार्थं न हि नित्यदर्शनं।
भृशं समाप्यायितचेतसः सदा प्रसादवेगैरसमश्रवोद्भवैः ॥ ४७ ॥[2]
अचोद्यमानः सततं च संमुखं तथागतैर्धर्मसुखे व्यवस्थितः ।
निगृह्य केशेष्विव दोषगह्वरात् निकृष्य बोधौ स बलान्निवेश्यते ॥ ४८ ॥
स सर्वलोकं सुविशुद्धदर्शनैरकल्पबोधैरभिभूय सर्वथा ।
महान्धकारं विधमय्य भासते जगन्महादित्य इवात्युदारतः ॥ ४९ ॥

(1) Mètre anuṣṭubh jusqu'au vers 46.

(2) Mètre vaṃçasthā jusqu'au vers 49.



एभिस्त्रिभिः श्लोकैरववादमाहात्म्यं दर्शयति। यो हि धर्ममुखस्रोतस्यववादं लभते तस्य नित्यं बुद्धदर्शनं भवति । ततश्चासमं धर्मश्रवणं । यतोऽस्यात्यर्थं प्रसादः प्रसादवेगैराप्यायितचेतसस्तन्नित्यदर्शनं बुद्धानां महार्थं भवति । शेषं गतार्थं ।

बुद्धाः सम्यक्प्रशंसां विदधति सततं स्वार्थसम्यक्प्रयुक्ते
निन्दामीर्ष्याप्रयुक्ते स्थितिविचयपरे चान्तरायानुकूलान् ।
धर्मान् सर्वप्रकारान्विधिवदिह जिना दर्शयन्त्यग्रसत्त्वे
यान् वर्ज्यासेव्य योगे भवति विपुलता सौगते शासनेऽस्मिन् ॥ ५० ॥[1]

चतुर्विधामनुशासनीमेतेन श्लोकेन दर्शयति । अधिशीलमधिकृत्य सम्यक्स्वार्थप्रयुक्ते बोधिसत्त्वे प्रशंसाविधानतः । अधिचित्तमधिप्रज्ञं चाधिकृत्य स्थितिविचयपरे तदन्तरायाणां तदनुकूलानां च सर्वप्रकाराणां धर्माणां देशनतः। यान्वर्ज्यासेव्येत्यन्तरायाननुकूलांश्च यथाक्रमं। योग इति शमथविपश्यनाभावनायां।

इति सततशुभाचयप्रपूर्णः सुविपुलमेत्य स चेतसः समाधिं।
मुनिसततमहाववादलब्धो भवति गुणार्णवपारगोऽग्रसत्त्वः ॥ ५१ ॥[2]

निगमनश्लोको गतार्थः।

महायानसूत्रालंकारे अववादानुशासन्यधिकारश्चतुर्दशः

# XV

उद्दानं।

अधिमुक्तेर्बहुलता धर्मपर्येष्टिदेशने
प्रतिपत्तिस्तथा सम्यगववादानुशासनं ॥ १ ॥[3]

उपायसहितकर्मविभागे चत्वारः श्लोकाः।

यथा प्रतिष्ठा वनदेहिपर्वतप्रवाहिनीनां पृथिवी समन्ततः ।
तथैव दानादिशुभस्य सर्वतो बुधेषु कर्म त्रिविधं निरुच्यते ॥ २ ॥[4]

(1) Mètre sragdharā. — (2) Mètre puṣpitāgrā. — (3) Mètre anuṣṭubh. — (4) Mètre vaṃçasthā jusqu'au vers 5.

अनेन श्लोकेन समुत्थानोपायं दर्शयति । सर्वप्रकारस्य दानादिशुभस्य पारमिताबोधिपक्षादिकस्य कर्मत्रयसमुत्थितत्वात् । बुधेष्विति बोधिसत्त्वेषु । वनादिग्रहणमुपभोज्यास्थिरास्थिरवस्तुनिदर्शनार्थं ।

सुदुष्करैः कर्मभिरुद्यतात्मनां विचित्ररूपैर्बहुकल्पनिर्गतैः ।
न कायवाक्चित्तमयस्य कर्मणो जिनात्मजानां भवतीह संनतिः ॥ ३ ॥
यथा विषाच्छस्त्रमहाशनाद् रिपोर्निवारयेदात्महितः स्वमाश्रयं ।
निहीनयानाद्द्विविधाज्जिनात्मजो निवारयेत्कर्म तथा त्रयात्मकं ॥ ४ ॥

आभ्यां श्लोकाभ्यां व्युत्थानोपायं दर्शयति । महायानखेदान्ययानपातव्युत्थानाद्यथाक्रमं । संनतिः खेद इत्यर्थः । विषादिसाधर्म्यं हीनयानप्रतिसंयुक्तस्य कर्मणो हीनयानचित्तपरिणामनात् महायाने कुशलमूलसमुच्छेदनात् अनुत्पन्नकुशलमूलानुत्पादाय । उत्पन्नकुशलमूलस्य ध्वंसनात् । बुद्धत्वसंपत्प्राप्तिविबन्धनाच्च ।

न कर्मिणि कर्म न कर्मणः क्रियां सदाविकल्पः समुदीक्षते त्रिधा ।
ततो ऽस्य तत्कर्म विशुद्धिपारगं भवत्यनन्तं तदुपायसंग्रहात् ॥ ५ ॥

अनेन श्लोकेन चतुर्थेन विशुद्ध्युपायं कर्मणो दर्शयति । मण्डलपरिशुद्धितः कर्तृकर्मक्रियाणामनुपलम्भात् । अनन्तमित्यक्षयं ।

महायानसूत्रालंकार उपायसहितकर्माधिकारः पञ्चदशः

## XVI

पारमिताप्रभेदसंग्रहे उद्दानश्लोकः ।

संख्याथ तल्लक्षणमानुपूर्वी निरुक्तिरभ्यासगुणश्च तासां ।
प्रभेदनं संग्रहणं विपक्षो ज्ञेयो गुणो ऽन्योन्यविनिश्चयश्च ॥ १ ॥[1]

संख्याविभागे षट् श्लोकाः ।

भोगात्मभावसंपत्परिचारारम्भसंपदभ्युदयः ।
क्लेशावशगत्वमपि च कृत्येषु सदाविपर्यासः ॥ २ ॥[2]

[1] Mètre upajāti. — [2] Mètre āryā jusqu'au vers 15.



इति प्रथमः । तत्र चतसृभिः पारमिताभिश्चतुर्विधो ऽभ्युदयः । दानेन भोगसंपत् । शीलेनात्मभावसंपत् । क्षान्त्या परिचारसंपत् । तथा हि तदासेवनादायत्याद्[1] बहुजनसुप्रियो भवति । वीर्येणारम्भसंपत् सर्वकर्मान्तसंपत्तितः । पञ्चम्या क्लेशावशगत्वं ध्यानेन क्लेशविष्कम्भनात् । षष्ठ्या कृत्येष्वविपर्यासः सर्वकार्ययथाभूतपरिज्ञानात् । इत्यभ्युदयः तत्र चासंक्लेशमविपरीतकृत्यारम्भं चाधिकृत्य षट् पारमिता व्यवस्थिताः ।

सत्त्वार्थेषु सुयुक्तस्त्यागानुपघातमर्षणैः कुरुते ।
सनिदानस्थितिमुक्त्या आत्मार्थं सर्वथा चरति ॥ ३ ॥

इति द्वितीयः । सत्त्वार्थेषु सम्यक्प्रयुक्तो बोधिसत्त्वस्तिसृभिर्दानशीलक्षान्तिपारमिताभिर्यथाक्रमं त्यागेनानुपघातेनोपघातमर्षणेन च सत्त्वार्थं कुरुते । तिसृभिः सनिदानतया चित्तस्थित्या विमुक्त्या च सर्वप्रकारमात्मार्थं चरति । वीर्यं निश्रित्य यथाक्रमं ध्यानप्रज्ञाभ्याससमाहितस्य चित्तस्य समवधानात् समाहितस्य मोचनात् । इति परार्थमात्मार्थं चारभ्य षट् पारमिताः ।

अविघातैरविहेठैर्विहेठसंमर्षणैः क्रियाखेदैः ।
आवर्जनैः सुलपितैः परार्थं आत्मार्थ एतस्मात् ॥ ४ ॥

इति तृतीयः । दानादिभिर्बोधिसत्त्वस्य सकलः परार्थो भवति । यथाक्रम परेषामुपकरणाविघातैः । अविहेठैः विहेठनामर्षणैः । साहाय्यक्रियास्वखेदैः ऋद्ध्यादिप्रभावावर्जनैः सुभाषितसुलपितैश्च संशयच्छेदनात् । एतस्मात्परार्थात् बोधिसत्त्वस्यात्मार्थो भवति । परकार्यस्वकार्यत्वान्महाबोधिप्राप्तितश्च । इति सकलपरार्थाधिकारात् षट् पारमिताः ।

भोगेषु चानभिरतिस्तीव्रा गुरुता द्वये अखेदश्च ।
योगश्च निर्विकल्पः समस्तमिदमुत्तमं यानं ॥ ५ ॥

इति चतुर्थः । दानेन बोधिसत्त्वस्य भोगेष्वभिरतिर्निरपेक्षत्वात् । शीलसमादानेन बोधिसत्त्वशिक्षासु तीव्रा गुरुता । क्षान्त्या वीर्येण चाखेदो द्वये यथाक्रमं दुःखे च सत्त्वासत्त्वकृते कुशलप्रयोगे च । ध्यानप्रज्ञायां निर्विकल्पो

[1] Āyatya (?), mot nouveau, dérivé peut-être de āyata, «étendu».

योगः शमथविपश्यनासंगृहीतः । एतावच्च समस्तमहायानसंग्रहाधिकारात् षट् पारमिताः ।

विषयेष्वसक्तिमार्गस्तदाप्तिविक्षेपसंयमेष्वपरः ।
सत्त्वाविसृजनवर्धन आवरणविशोधनेष्वपरः ॥ ६ ॥

इति पञ्चमः । तत्र दानं विषयेष्वसक्तिमार्गस्त्यागाभ्यासेन तत्सक्तिविगमात् । शीलं तदाप्तिविक्षेपसंयमेषु भिक्षुसंवरस्थस्य विषयप्राप्तये सर्वकर्मान्तविक्षेपाणामप्रवृत्तेः । क्षान्तिः सत्त्वानुत्सर्गे सर्वोपकारदुःखानुद्वेगात् । वीर्यं कुशलविवर्धन आरब्धवीर्यस्य तद्वृद्धिगमनात् । ध्यानं प्रज्ञा चावरणविशोधनेषु मार्गस्ताभ्यां क्लेशज्ञेयावरणविशोधनात् । मार्ग इत्युपायः । एवं सर्वाकारमार्गाधिकारात् षट् पारमिताः ।

शिक्षात्रयमधिकृत्य च षट् पारमिता जिनैः समाख्याताः ।
आद्या तिस्रो द्वेधा अन्त्यद्वयतस्तिसृष्वेका ॥ ७ ॥

इति षष्ठः । तत्राद्या अधिशीलं शिक्षा तिस्रः पारमिताः ससंभारसपरिवारग्रहणात् । दानेन हि भोगनिरपेक्षः शीलं समादत्ते समात्तं च क्षान्त्या रक्षत्याक्रुष्टाप्रत्याक्रोशनादिभिः । द्विधेत्यधिचित्तमधिप्रज्ञं च शिक्षा सा अन्तेन द्वयेन संगृहीता यथाक्रमं ध्यानेन प्रज्ञया च । तिसृष्वपि शिक्षास्वेका वीर्यपारमिता वेदितव्या । सर्वासां वीर्यसहायत्वात् । लक्षणविभागे श्लोकाः षट् ।

दानं विपक्षहीनं ज्ञानेन गतं च निर्विकल्पेन ।
सर्वेच्छापरिपूरकमपि सत्त्वविपाचकं त्रेधा ॥ ८ ॥

बोधिसत्त्वानां दानं चतुर्विधलक्षणं । विपक्षहीनं तात्पर्यस्य प्रहीणत्वात् । निर्विकल्पज्ञानसहगतं धर्मनैरात्म्यप्रतिवेधयोगात् सर्वेच्छापरिपूरकं यो यदिच्छति तस्मै तस्य दानात् । सत्त्वपरिपाचकं त्रेधा दानेन सत्त्वान् संगृह्य त्रिषु यानेषु यथाभव्यनियोजनात् ।

शीलं विपक्षहीनं ज्ञानेन गतं च निर्विकल्पेन ।
सर्वेच्छापरिपूरकमपि सत्त्वविपाचकं त्रेधा ॥ ९ ॥
क्षान्तिर्विपक्षहीना ज्ञानेन गता च निर्विकल्पेन ।
सर्वेच्छापरिपूरा अपि सत्त्वविपाचिका त्रेधा ॥ १० ॥



वीर्यं विपक्षहीनं ज्ञानेन गतं च निर्विकल्पेन ।
सर्वेच्छापरिपूरकमपि सत्त्वविपाचकं त्रेधा ॥ ११ ॥
ध्यानं विपक्षहीनं ज्ञानेन गतं च निर्विकल्पेन ।
सर्वेच्छापरिपूरकमपि सत्त्वविपाचकं त्रेधा ॥ १२ ॥
प्रज्ञा विपक्षहीना ज्ञानेन गता च निर्विकल्पेन ।
सर्वेच्छापरिपूरा अपि सत्त्वविपाचिका त्रेधा ॥ १३ ॥

यथा दानलक्षणं चतुर्विधमेवं शीलादीनां वेदितव्यं । एषां तु विपक्षा दौःशील्यं क्रोधः कौशीद्यं विक्षेपो दौष्प्रज्ञ्यं[1] यथाक्रमं । सर्वेच्छापरिपूरकत्वं शीलादिभिः परेषां सर्वकायवाक्संयमापराधमर्षणसाहाय्यमनोरथसंशयच्छेदनेच्छापरिपूरणात् । सत्त्वपरिपाचकत्वं शीलादिभिरावर्ज्य त्रिषु यानेषु परिपाचनात् । अनुक्रमविभागे श्लोकः ।

पूर्वोत्तरविश्रयतश्चोत्पत्तेस्तत्क्रमेण निर्देशः ।
हीनोत्कर्षस्थानादौदारिकसूक्ष्मतश्चापि ॥ १४ ॥

त्रिभिः कारणैस्तेषां दानादीनां क्रमेण निर्देशः । पूर्वसंनिश्रयेणोत्तरस्योत्पत्तेः । भोगनिरपेक्षो हि शीलं समात्ते शीलवान् क्षमो भवति क्षमावान् वीर्यमारभते आरब्धवीर्यः समाधिमुत्पादयति समाहितचित्तो यथाभूतं प्रजानाति । पूर्वस्य च हीनत्वात् उत्तरस्योत्कर्षस्थानत्वात् । हीनं हि दानमुत्कृष्टं शीलमेवं यावद्धीनं ध्यानमुत्कृष्टा प्रज्ञेति । पूर्वस्य चौदारिकत्वादुत्तरस्य सूक्ष्मत्वात् । औदारिकं हि दानं सुप्रवेशत्वात् सुकरत्वाच्च । सूक्ष्मं शीलं ततो दुष्प्रवेशत्वाद् दुष्करत्वाच्च । एवं यावदौदारिकं ध्यानं सूक्ष्मा प्रज्ञेति । निर्वचनविभागे श्लोकः ।

दारिद्र्यस्यापनयाच्छैत्यस्य च लम्भनात् क्षयात् क्रुद्धेः ।
वरयोगमनोधारणपरमार्थज्ञानतश्चोक्तिः ॥ १५ ॥

दारिद्र्यमपनयतीति दानं । शैत्यं लम्भयतीति शीलं तद्वतो विषयनिमित्तक्लेशपरिदाहाभावात् । क्षयः क्रुद्धेरिति क्षान्तिस्तया क्रोधक्षयात् । वरेण योज-

[1] *Dauṣprajñya*, mot nouveau, dérivé de *dusprajñā*.

यतीति वीर्यं कुशलधर्मयोजनात्। धारयत्यध्यात्मं मन इति ध्यानं। परमार्थं जानात्यनयेति प्रज्ञा। भावनाविभागे श्लोकः।

भावनोपधिमाश्रित्य मनस्कारं तथाशयं।
उपायं च विभुत्वं च सर्वासामेव कथ्यते॥ १६॥[1]

पञ्चविधा पारमिताभावना। उपधिसंनिश्रिता। तत्रोपधिसंनिश्रिता चतुराकारा हेतुसंनिश्रिता यो गोत्रबलेन पारमितासु प्रतिपत्त्यभ्यासः। विपाकसंनिश्रिता य आत्मभावसंपत्तिबलेन। प्रणिधानसंनिश्रिता यः पूर्वप्रणिधानबलेन। प्रतिसंख्यानसंनिश्रिता यः प्रज्ञाबलेन पारमितासु प्रतिपत्त्यभ्यासः। मनसिकारसंनिश्रिता पारमिताभावना चतुराकारा। अधिमुक्तिमनस्कारेण सर्वपारमिताप्रतिसंयुक्तं सूत्रान्तमधिमुच्यमानस्य। आस्वादनामनस्कारेण लब्धाः पारमिता आस्वादयतो गुणसंदर्शयोगेन। अनुमोदनामनस्कारेण सर्वलोकधातुषु सर्वसत्त्वानां दानादिकमनुमोदमानस्य। अभिनन्दनामनस्कारेणात्मनः सत्त्वानां चानागतं पारमिताविशेषमभिनन्दमानस्य। आशयसंनिश्रिता पारमिताभावना षडाकारा। अतृप्ताशयेन विपुलाशयेन मुदिताशयेन उपकाराशयेन निर्लेपाशयेन कल्याणाशयेन च। तत्र बोधिसत्त्वस्य दाने ऽतृप्ताशयो यद्बोधिसत्त्व एकसत्त्वस्यैकक्षणे गंगानदीवालुकासमान् लोकधातून् सप्तरत्नपरिपूर्णान् कृत्वा प्रतिपादयेत्। गंगानदीवालिकासमांश्चात्मभावान्। एवं च प्रतिक्षणं गंगानदीवालिकासमान्कल्पान्प्रतिपादयेत्। यथा चैकस्य सत्त्वस्यैवं यावान् सत्त्वधातुरनुत्तरायां सम्यक्संबोधौ परिपाचयितव्यस्तमनेन पर्यायेण प्रतिपादयेत्। अतृप्त एव बोधिसत्त्वस्य दानाशय इति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य दाने ऽतृप्ताशयः। न च बोधिसत्त्व एवंरूपां दानपरंपरां क्षणमात्रमपि हापयति। न विच्छिनत्त्या बोधिमण्डनिषदनादिति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य दाने विपुलाशय इति। मुदिततरश्च बोधिसत्त्वो भवति तान्सत्त्वान्दानेन तथानुगृह्णन्। न त्वेव ते सत्त्वास्तेन दानेनानुगृह्यमाणा इति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य दाने मुदिताशयः। उपकारकतरांश्च स बोधिसत्त्वस्तान्सत्त्वानात्मनः समनुपश्यति। येषां तथा दानेनोपकरोति नात्मानं। तेषामनुत्तरसम्यक्संबोध्युपस्तम्भतामुपादाय इति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य दाने उपकाराशयः। न च बोधिसत्त्वः सत्त्वेषु तथा विपुलमपि दानमयं पुण्यमभिसंस्कृत्य प्रतिकारेण वा अर्थी भवति विपाकेन वा इति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य दानपारमिताभावनायां निर्लेपाशयः। यद्बोधिसत्त्वस्तथा विपुलस्यापि

[1] Mètre anuṣṭubh jusqu'au vers 28.



दानस्कन्धस्य विपाकं सत्त्वेष्वभिनन्दति नात्मनः। सर्वसत्त्वसाधारणं च कृत्वानुत्तरायां सम्यक्संबोधौ परिणामयति इति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य दानपारमिताभावनायां कल्याणाशयः। तत्र बोधिसत्त्वस्य शीलपारमिताभावनायां यावत्प्रज्ञापारमिताभावनायामतृप्ताशयः। यद्बोधिसत्त्वो गंगानदीवालिकासमेष्वात्मभावेषु गंगानदीवालिकासमकल्पायुष्प्रमाणेषु सर्वोपकरणनिरन्तरविघाती त्रिसाहस्रमहासाहस्रलोकधातावग्निप्रतिपूर्णे चतुर्विधमीर्यापथं कल्पयन्नेकं शीलपारमिताक्षणं यावत्प्रज्ञापारमिताक्षणं भावयेदेतेन पर्यायेण यावांश्छीलस्कन्धो यावान् च प्रज्ञास्कन्धो येनानुत्तरां सम्यक्संबोधिमभिसंबुध्यते शीलस्कन्धं यावत्प्रज्ञास्कन्धं भावयेदतृप्त एव बोधिसत्त्वस्य शीलपारमिताभावनायामाशयो यावत्प्रज्ञापारमिताभावनायामाशय इति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य शीलपारमिताभावनायामतृप्ताशयो यावत्प्रज्ञापारमिताभावनायामतृप्ताशयः। यद्बोधिसत्त्वस्तां शीलपारमिताभावनापरंपरां यावत्प्रज्ञापारमिताभावनापरंपरामा बोधिमण्डनिषदनान्न स्रंसयति न विच्छिनत्ति इति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य शीलपारमिताभावनायां यावत्प्रज्ञापारमिताभावनायां विपुलाशयः। मुदिततरश्च बोधिसत्त्वो भवति तया शीलपारमिताभावनया यावत्प्रज्ञापारमिताभावनया सत्त्वाननुगृह्णन्। न त्वेव ते सत्त्वा अनुगृह्यमाणा इति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य शीलपारमिताभावनायां यावत्प्रज्ञापारमिताभावनायां मुदिताशयः। उपकारकतरांश्च बोधिसत्त्वस्तान् सत्त्वानात्मनः समनुपश्यति। येषां तथा शीलपारमिताभावनया यावत्प्रज्ञापारमिताभावनया उपकरोति नात्मानं। तेषामनुत्तरसम्यक्संबोध्युपस्तम्भतामुपादाय इति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य शीलपारमिताभावनायां यावत्प्रज्ञापारमिताभावनायामुपकाराशयः। न च बोधिसत्त्वस्तथा विपुलमपि शीलपारमिताभावनामयं यावत्प्रज्ञापारमिताभावनामयं पुण्यमभिसंस्कृत्य प्रतिकारेण वार्थी भवति विपाकेन वा इति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य शीलपारमिताभावनायां यावत्प्रज्ञापारमिताभावनायां निर्लेपाशयः। तत्र यद्बोधिसत्त्व एवं शीलपारमिताभावनामयस्य यावत्प्रज्ञापारमिताभावनामयपुण्यस्कन्धस्य विपाकं सत्त्वेष्वेवाभिनन्दति नात्मनः। सर्वसत्त्वसाधारणं च कृत्वानुत्तरायां सम्यक्सम्बोधौ परिणामयतीति। य एवंरूप आशयो ऽयं बोधिसत्त्वस्य शीलपारमिताभावनायां यावत्प्रज्ञापारमिताभावनायां कल्याणाशयः। उपायसंनिश्रिता भावना त्र्याकारा। निर्विकल्पेन ज्ञानेन त्रिमण्डलपरिशुद्धिप्रत्यवेक्षणतामुपादाय। तथा हि स उपायः सर्वमनसिकाराणामभिनिष्पत्तये। विभुत्वसंनिश्रिता पारमिताभावना त्र्याकारा। कायविभुत्वतः। चर्याविभुत्वतः। देशनाविभुत्वतश्च। तत्र काय-

विभुत्वं तथागते द्वौ कायौ द्रष्टव्यौ स्वाभाविकः सांभोगिकश्च। तत्र चर्याविभुत्वं नैर्माणिकः कायो द्रष्टव्यः। येन सर्वाकारां सर्वसत्त्वानां सहधार्मिकचर्यां[1] दर्शयति। देशनाविभुत्वं षट्पारमितासर्वाकारदेशनायामव्याघातः। प्रभेद-संग्रहे द्वादश श्लोकाः। दानादीनां प्रत्येकं षडर्थप्रभेदतः। षडर्थाः स्वभाव-हेतुफलकर्मयोगवृत्त्यर्थाः। तत्र दानप्रभेदे द्वौ श्लोकौ।

प्रतिपादनमर्थस्य चेतना मूलनिश्रिता।
भोगात्मभावसंपत्ती द्वयानुग्रहपूरकं॥ १७॥
अमात्सर्ययुतं तच्च दृष्टधर्मामिषाभये।
दानमेव परिज्ञाय पण्डितः समुदानयेत्॥ १८॥

अर्थप्रतिपादनं प्रतिग्राहकेषु दानस्य स्वभावः। अलोभादिसहजा चेतना हेतुः। भोगसंपत्तिरात्मभावसंपत्तिश्चायुरादिसंगृहीता फलं पञ्चस्थानसूत्रवत्[2]। स्वपरानुग्रहो महाबोधिसंभारपरिपूरिश्च कर्म। अमात्सर्ययोगो अमत्सरिषु वर्तते। दृष्टधर्मामिषाभयप्रदानप्रभेदेन चेति वृत्तिः। शीलप्रभेदे द्वौ श्लोकौ।

षडङ्गशमभावान्तं सुगतिस्थितिदायकं।
प्रतिष्ठाशान्तनिर्भीतं पुण्यसंभारसंयुतं॥ १९॥
संकेतधर्मतालब्धं संवरस्थेषु विद्यते।
शीलमेवं परिज्ञाय पण्डितः समुदानयेत्॥ २०॥

षडङ्गमिति स्वभावः। षडङ्गीति[3] शीलवान् विहरति यावत्समादाय शिक्षते शिक्षापदेष्विति। शमभावान्तमिति हेतुः। निर्वाणाभिप्रायेण समा-दानात्। सुगतिस्थितिदायकमिति फलं। शीलेन सुगतिगमनात्। अविप्रति-सारादिक्रमेण चित्तस्थितिलाभाच्च। प्रतिष्ठाशान्तनिर्भीतमिति कर्म। शीलं हि सर्वगुणानां प्रतिष्ठा भवति। क्लेशपरिदाहशान्त्या च शान्तं। प्राणातिपाता-

(1) *Sahadhārmika*. Cf. Çikṣā-samuccaya, 194, 7, et la note. Le chinois traduit simplement par *chen*, «bon».

(2) *Pañca sthāna* est le titre du sūtra, car le chinois traduit par : «... l'ensemble des cinq choses, longévité, etc. Comme il est dit dans le sūtra des cinq choses» (*jou ou che king tchong chouo*). Il n'y a pas dans la collection chinoise de sūtra à part sous le titre de *Ou che king*.

(3) *Ṣaḍaṅgin*, expliqué par *çīlavant*, mot nouveau. Cf. Mahāvyutpatti, 19 : *ṣaḍaṅgasamanvāgata*, et le pâli *chaḷaṅgasamannāgata*.



दिप्रत्ययानां च भयावद्यवैराणामप्रसवान्निर्भीतं। पुण्यसंभारसंयुतमिति योगः सर्वकालं कायवाङ्मनस्कर्मसमावरणात्। संकेतधर्मतालब्धं संवरस्थेषु विद्यत इति वृत्तिस्तत्र संकेतलब्धं प्रातिमोक्षसंवरसंगृहीतं। धर्मताप्रतिलब्धं ध्यानाना-स्रवसंवरसंगृहीतमेषास्य प्रभेदवृत्तिः त्रिविधेन प्रभेदेन वर्तनात्। संवरस्थेषु विद्यत इत्याचारवृत्तिः। क्षान्तिप्रभेदे द्वौ श्लोकौ।

मर्षाधिवासनज्ञानं कारुण्याद्धर्मसंश्रयात्।
पञ्चानुशंसमाख्यातं द्वयोरर्थकरं च तत्॥ २१॥
तपःप्राबल्यसंयुक्तं तेषु तत्त्रिविधं मतं।
क्षान्तिमेवं परिज्ञाय पण्डितः समुदानयेत्॥ २२॥

मर्षाधिवासज्ञानमिति त्रिविधायाः क्षान्तेः स्वभावः। अपकारमर्षणक्षा-न्तेर्मर्षणं मर्ष इति कृत्वा। दुःखाधिवासक्षान्तेर्धर्मनिध्यानक्षान्तेश्च यथाक्रमं। कारुण्याद्धर्मसंश्रयादिति हेतुः। धर्मसंश्रयः पुनः। शीलसमादानं श्रुतपर्यवा-प्तिश्च। पञ्चानुशंसमाख्यातमिति फलं। यथोक्तं सूत्रे। पञ्चानुशंसाः क्षान्तौ। न वैरबहुलो भवति। न भेदबहुलो भवति। सुखसौमनस्यबहुलो भवति। अविप्रतिसारी कालं करोति। कायस्य च भेदात् सुगतौ स्वर्गलोके देवेषूप-पद्यते इति। द्वयोरर्थकरं च तदिति मर्षाधिवासनमित्यधिकृतं इदं कर्म। यथोक्तं।

द्वयोरर्थं स कुरुते आत्मनश्च परस्य च।
यः परं कुपितं ज्ञात्वा स्वयं तत्रोपशाम्यति॥ इति॥

तपःप्राबल्यसंयुक्तमिति योगः। यथोक्तं। क्षान्तिः परमं तप इति। तेषु तदित्याधारवृत्तिः क्षमिषु तद्वृत्तेः। त्रिविधं मतमिति प्रभेदवृत्तिस्त्रिविधक्षा-न्तिप्रभेदेन यथोक्तं प्राक्। वीर्यप्रभेदे द्वौ श्लोकौ।

उत्साहः कुशले सम्यक् श्रद्धाच्छन्दप्रतिष्ठितः।
स्मृत्यादिगुणवृद्धौ च संक्लेशप्रातिपक्षिकः॥ २३॥
अलोभादिगुणोपेतस्तेषु सप्तविधश्च सः।
वीर्यमेवं परिज्ञाय पण्डितः समुदानयेत्॥ २४॥

उत्साहः कुशले सम्यगिति स्वभावः। कुशल इति तदन्यकृत्योत्साहव्युदासार्थ सम्यगित्यन्यतीर्थिकमोक्षार्थोत्साहव्युदासार्थं। श्रद्धाच्छन्दप्रतिष्ठित इति हेतुः श्रद्दधानो ह्यतीव वीर्यमारभति। स्मृत्यादिगुणवृद्धाविति फलं। आरब्ध-

वीर्यस्य स्मृतिसमाध्यादिगुणोद्भवात् । संक्लेशप्रातिपक्षिक इति कर्म । यथोक्तं । आरब्धवीर्यस्तु सुखं विहरत्यव्यवकीर्णः पापकैरकुशलैर्धर्मैरिति । अलोभादिगुणोपेत इति योगः । तेष्वित्यारब्धवीर्येषु इयमाधारवृत्तिः । सप्तविध इति प्रभेदवृत्तिः । स पुनरधिशीलादिशिक्षात्रये कायिकं चैतसिकं च सातत्येन सत्कृत्य च यद्वीर्यं । ध्यानप्रभेदे द्वौ श्लोकौ ।

स्थितिश्चेतस अध्यात्मं स्मृतिवीर्यप्रतिष्ठितं ।
सुखोपपत्तये ऽभिज्ञाविहारवशवर्तकं ॥ २५ ॥
धर्माणां प्रमुखं तेषु विद्यते त्रिविधश्च सः ।
ध्यानमेवं परिज्ञाय पण्डितः समुदानयेत् ॥ २६ ॥

स्थितिश्चेतस अध्यात्ममिति स्वभावः । स्मृतिवीर्यप्रतिष्ठितमिति हेतुः । आलम्बनासंप्रमोषे सति वीर्यं निश्रित्य समापत्त्यभिनिर्हारात् । सुखोपपत्तये इति फलं ध्यानस्याव्याबाधोपपत्तिफलत्वात् । अभिज्ञाविहारवशवर्तकमिति कर्म । ध्यानेनाभिज्ञावशवर्तनात् । आर्यदिव्यब्राह्मविहारवशवर्तनाच्च । धर्माणां प्रमुखमिति प्रामुख्येन योगः । यथोक्तं । समाधिप्रमुखाः सर्वधर्मा इति । तेषु विद्यत इति ध्यायिष्वियमाधारवृत्तिः । त्रिविधश्च स इति सवितर्कः सविचारः अवितर्को विचारमात्रः । अवितर्को अविचारः । पुनः प्रीतिसहगतः । सातसहगतः । उपेक्षासहगतश्च । इयं प्रभेदवृत्तिः । प्रज्ञाप्रभेदे द्वौ श्लोकौ ।

सम्यक्प्रविचयो ज्ञेयः शमाधानप्रतिष्ठितः ।
सुविमोक्षाय संक्लेशात्प्रज्ञाजीवसुदेशनः ॥ २७ ॥
धर्माणामुत्तरस्तेषु विद्यते त्रिविधश्च सः ।
प्रज्ञामेवं परिज्ञाय पण्डितः समुदानयेत् ॥ २८ ॥

सम्यक् प्रविचयो ज्ञेय इति स्वभावः । सम्यगिति न मिथ्या ज्ञेय इति लौकिककृत्स्नसम्यक्प्रविचयव्युदासार्थं । समाधानप्रतिष्ठित इति हेतुः । समाहितचित्तो यथाभूतं प्रजानाति । यस्मात्सुविमोक्षाय संक्लेशादिति फलं । तेन हि संक्लेशात्सुविमोक्षो भवति । लौकिकहीनलोकोत्तरमहालोकोत्तरेण प्रविचयेन । प्रज्ञाजीवसुदेशन इति प्रज्ञाजीवः सुदेशना चास्य कर्म । तेन ह्यनुत्तरप्रज्ञा जीवकानां जीवति । सम्यग् धर्मं देशयतीति । धर्माणामुत्तर इत्युत्तरत्वेन योगः । यथोक्तं । प्रज्ञोत्तराः सर्वधर्मा इति । तेषु विद्यते त्रिविधश्च स इति वृत्तिः । प्राज्ञेषु वर्तनात् त्रिविधेन च प्रभेदेन । लौकिको हीनलोकोत्तरो



महालोकोत्तरश्च । उक्तः प्रत्येकं दानादीनां षडर्थप्रभेदेन प्रभेदः । संग्रहविभागे श्लोकः ।

सर्वे शुक्ला धर्मा विक्षिप्तसमाहितोभया ज्ञेयाः ।
द्वाभ्यां द्वाभ्यां द्वाभ्यां पारमिताभ्यां परिगृहीताः ॥ २९ ॥[1]

सर्वे शुक्ला धर्मा दानादिधर्माः । तत्र विक्षिप्ता द्वाभ्यां पारमिताभ्यां संगृहीताः प्रथमाभ्यां दानसमादानशीलयोरसमाहितत्वात् । समाहिता द्वाभ्यां पश्चिमाभ्यां ध्यानयथाभूतप्रज्ञयोः समाहितत्वात् । उभये द्वाभ्यां क्षान्तिवीर्याभ्यां । तयोः समाहितासमाहितत्वात् । विपक्षविभागे श्लोकाः षट् ।

न च सक्तं न च सक्तं न च सक्तं सक्तमेव न च दानं ।
न च सक्तं न च सक्तं न च सक्तं बोधिसत्वानां ॥ ३० ॥

सप्तविधा सक्तिर्दानस्य विपक्षः । भोगसक्तिः विलम्बनसक्तिः तन्मात्रसंतुष्टिसक्तिः पक्षपातसक्तिः प्रतिकारसक्तिः विपाकसक्तिः । विपक्षसक्तिस्तु तद्विपक्षलाभानुशयासमुद्घातात्[2] । विक्षेपसक्तिश्च । स पुनर्विक्षेपो द्विविधः । मनसिकारविक्षेपश्च हीनयानस्पृहणात् । विकल्पविक्षेपश्च दायकप्रतिग्राहकदानविकल्पनात् । अतः सप्तविधसक्तिमुक्तत्वात् सप्तकृत्वो दानस्यासक्तत्वमुक्तं ।

न च सक्तं न च सक्तं न च सक्तं सक्तमेव न च शीलं ।
न च सक्तं न च सक्तं न च सक्तं बोधिसत्वानां ॥ ३१ ॥
न च सक्ता न च सक्ता न च सक्ता सक्तिका न क्षान्तिः ।
न च सक्ता न च सक्ता न च सक्ता बोधिसत्वानां ॥ ३२ ॥
न च सक्तं न च सक्तं न च सक्तं सक्तमेव च न वीर्यं ।
न च सक्तं न च सक्तं न च सक्तं बोधिसत्वानां ॥ ३३ ॥
न च सक्तं न च सक्तं न च सक्तं सक्तमेव न च ध्यानं ।
न च सक्तं न च सक्तं न च सक्तं बोधिसत्वानां ॥ ३४ ॥
न च सक्ता न च सक्ता न च सक्ता सक्तिका न च प्रज्ञा ।
न च सक्ता न च सक्ता न च सक्ता बोधिसत्वानां ॥ ३५ ॥

(1) Mètre āryā jusqu'au vers 35.

(2) *Samudghāta*. Cf. Çikṣā-samuccaya, 232, 15, et note. Le chinois traduit par *toan*, « retranchement, suppression ». De même XX, 54, comm.

यथा दानासक्तिरुक्ता एवं शीले यावत्प्रज्ञायां वेदितव्या । अत्र तु विशेष-भोगसक्तिपरिवर्तेन दौःशील्याद्यासक्तिर्वेदितव्या विपक्षसक्तिस्तद्विपक्षानुशयासमुद्घातनात्[1] । विकल्पविक्षेपश्च यथायोगं त्रिमण्डलपरिकल्पनात् । गुणविभागे त्रयोविंशतिः श्लोकाः ।

त्यक्तं बुद्धसुतैः स्वजीवितमपि प्राप्यार्थिनं सर्वदा
कारुण्यात्परतो न च प्रतिकृतिर्नेष्टं फलं प्रार्थितं ।
दानेनैव च तेन सर्वजनता बोधित्रये रोपिता
दानं ज्ञानपरिग्रहेण च पुनर्लोके ऽक्षयं स्थापितं ॥ ३६ ॥[2]

इति सुबोधः पदार्थः ।

आत्तं बुद्धसुतैर्यमोद्यममयं शीलत्रयं सर्वदा
स्वर्गो नाभिमतः समेत्य च पुनः सक्तिर्न तत्राहिता ।
शीलेनैव च तेन सर्वजनता बोधित्रये रोपिता
शीलं ज्ञानपरिग्रहेण च पुनर्लोके ऽक्षयं स्थापितं ॥ ३७ ॥

त्रिविधं शीलं । संवरशीलं । कुशलधर्मसंग्राहकशीलं । सत्वार्थक्रियाशीलं च । एकात्मकं यमस्वभावं । द्वे उद्यमस्वभावे ।

क्षान्तं बुद्धसुतैः सुदुष्करमथो सर्वापकारं नृणां
न स्वर्गार्थमसक्तितो न च भयान्नैवोपकारेक्षणात् ।
क्षान्त्यानुत्तरया च सर्वजनता बोधित्रये रोपिता
क्षान्तिर्ज्ञानपरिग्रहेण च पुनर्लोके ऽक्षया स्थापिता ॥ ३८ ॥

इति । क्षान्त्यानुत्तरया चेति दुःखाधिवासनक्षान्त्या च परापकारमर्षणक्षान्त्या च यथाक्रमं ।

वीर्यं बुद्धसुतैः कृतं निरुपमं संनाहयोगात्मकं
हन्तुं क्लेशगणं स्वतो ऽपि परतः प्राप्तुं च बोधिं परां ।
वीर्येणैव च तेन सर्वजनता बोधित्रये रोपिता
वीर्यं ज्ञानपरिग्रहेण च पुनर्लोके ऽक्षयं स्थापितं ॥ ३९ ॥

(1) *Samudghātana*, mot nouveau, équivalent à *samudghāta;* cf. supra.

(2) Mètre çārdūlavikrīḍita jusqu'au vers 41.



इति । संनाहवीर्यं प्रयोगवीर्यं च ।

ध्यानं बुद्धसुतैः समाधिबहुलं संपादितं सर्वथा
श्रेष्ठैर्ध्यानसुखैर्विहृत्य कृपया हीनोपपत्तिः श्रिता ।
ध्यानेनैव च तेन सर्वजनता बोधित्रये रोपिता
ध्यानं ज्ञानपरिग्रहेण च पुनर्लोके ऽक्षयं स्थापितं ॥ ४० ॥

इति । समाधिबहुलमिति अनन्तबोधिसत्वसमाधिसंगृहीतं ।

ज्ञातं बुद्धसुतैः सतत्वमखिलं ज्ञेयं च यत्सर्वथा
सक्तिर्नैव च निर्वृतौ प्रजनिता बुद्धैः कुतः संवृतौ ।
ज्ञानेनैव च तेन सर्वजनता बोधित्रये रोपिता
ज्ञानं सत्वपरिग्रहेण पुनर्लोके ऽक्षयं स्थापितं ॥ ४१ ॥

इति । सतत्वं परमार्थसंगृहीतं सामान्यलक्षणं पुद्गलधर्मनैरात्म्यं । ज्ञेयं च यत्सर्वथेत्यनन्तस्वसंकेतादिलक्षणभेदभिन्नं यद्ज्ञेयं । दानादीनां निर्विकल्पज्ञानपरिग्रहेणाक्षयत्वं निरुपधिशेषनिर्वाणे ऽपि तदक्षयात् । ज्ञानस्य पुनः सत्वपरिग्रहेण करुणया सत्वानामपरित्यागात् । एषां पुनः षण्णां श्लोकानां पिण्डार्थः सप्तमेन श्लोकेन निर्दिष्टः ।

औदार्यानामिषत्वं च महार्थाक्षयतापि च ।
दानादीनां समस्तं हि ज्ञेयं गुणचतुष्टयं ॥ ४२ ॥[1]

इति । तत्र दानादीनां प्रथमेन पादेनोदारता परिदीपिता । द्वितीयेन निरामिषता । तृतीयेन महार्थता महतः सत्वार्थस्य संपादनात् । चतुर्थेनाक्षयता इत्येषां गुणचतुष्टयमेभिः श्लोकैर्वेदितव्यं ।

दर्शनपूरणतुष्टिं याचनके ऽतुष्टिमपि समाशास्तिं ।
अभिभवति स तां दाता कृपालुराधिक्ययोगेन ॥ ४३ ॥[2]

याचनके हि जने दायकदर्शनात्ततश्च यथेप्सितं लब्ध्वा मनोरथपरिपूरणाद्या तुष्टिरुत्पद्यते । अतुष्टिश्चादर्शनादपरिपूरणाच्च । आशास्तिश्च या तद्दर्शने मनोरथपरिपूरणे च । सा बोधिसत्वस्याधिकोत्पद्यते सर्वकालं याचनकदर्श-

(1) Mètre anuṣṭubh. — (2) Mètre āryā jusqu'au vers 51.

नात्तमनोरथपरिपूरणाच्च । अदर्शनादपरिपूरणाच्चातुष्टिः । अतो दाता कृपालुस्तां सर्वमभिभवत्याधिक्ययोगात् ।

प्राणभोगान्दारान्सत्वेषु सदान्यजनकृपालुत्वात् ।
आमोदते निकामं तद्विरतिं पालयेन्न कथं ॥ ४४ ॥

तेभ्यो विरतिं तद्विरतिं परकीयेभ्यः प्राणभोगदारेभ्यः । एतेन त्रिविधात्कायदुश्चरिताद्विरतिशीलगुणं दर्शयति ।

निरपेक्षः समचित्तो निर्भीः सर्वप्रदः कृपाहेतोः ।
मिथ्यावादं ब्रूयात्परोपघाताय कथमार्यः ॥ ४५ ॥

एतेन मृषावादाद्विरतिगुणं दर्शयति । आत्महेतोर्मृषावाद उच्येत कायजीवितापेक्षया । परहेतोर्वा प्रियजनप्रेम्णा । भयेन वा राजादिभयात् । आमिषकिंचित्कहेतोर्वा लाभार्थं । बोधिसत्वस्य स्वकायजीवितनिरपेक्षः । समचित्तस्य सर्वसत्वेष्वात्मसमचित्ततया । निर्भयस्य पञ्चभयसमतिक्रान्तत्वात् । सर्वप्रदस्यार्थिभ्यः सर्वस्वपरित्यागात् । स केन हेतुना मृषावादं ब्रूयात् ।

समहितकामः सकृपः परदुःखोत्पादने ऽतिभीरुश्च ।
सत्वविनये सुयुक्तः सुविदूरे त्रिविधवाग्दोषात् ॥ ४६ ॥

बोधिसत्वः सर्वसत्वेषु समं हितकामः स कथं परेषां मित्रभेदार्थं पैशुन्यं करिष्यतीति । सकृपस्य परदुःखापनयाभिप्रायात् । परदुःखोत्पादने चात्यर्थं भीरुः स कथं परेषां दुःखोत्पादनार्थं परुषं वक्ष्यति । सत्वानां विनये सम्यक्प्रयुक्तः स कथं संभिन्नप्रलापं करिष्यति तस्मादसौ सुविदूरे त्रिविधवाग्दोषात् पैशुन्यात्पारुष्यात्संभिन्नप्रलापाच्च ।

सर्वप्रदः कृपालुः प्रतीत्यधर्मोदये सुकुशलश्च ।
अधिवासयेत्कथमसौ सर्वाकारं मनःक्लेशं ॥ ४७ ॥

अभिध्या व्यापादो मिथ्यादृष्टिर्वा यथाक्रमं । एष दौःशील्यप्रतिपक्षधर्मविशेषयोगाच्छीलविशुद्धिगुणो बोधिसत्वानां वेदितव्यः ।

उपकरसंज्ञामोदं ह्यपकारिणि परहितसक्तां दुःखे ।
लभते यदा कृपालुः क्षमितव्यं[1] . . . . . . . . . ॥ ४८ ॥

[1] Āryā incomplète; il manque au second hémistiche les neuf mores finales. On peut rétablir par conjecture :

लभते यदा कृपालुः क्षमितव्यं तस्य किं न स्यात् ॥



यस्य नापकारिसंज्ञा प्रवर्तते न दुःखसंज्ञा ।

परपरसंज्ञापगमात्स्वतो ऽधिकतरात्सदा परस्नेहात् ।
दुष्करचरणात्सकृपे ह्यदुष्करं वीर्यं[1] ॥ ४९ ॥

सकृपो बोधिसत्वः । तत्र सकृपे यत्परार्थं दुष्करचरणाद्वीर्यं तददुष्करं च सुदुष्करं च । कथमदुष्करं । परत्र परसंज्ञापगमात् । स्वतोऽधिकतराच्च सर्वदा परेषु स्नेहात् । कथं सुदुष्करं । यदेवं परसंज्ञापगतं च स्वतोधिकतरस्नेहं च तद्वीर्यं ।

अल्पसुखं ह्यात्मसुखं लीनं परिहाणिकं[2] क्षयि समोहं ।
ध्यानं मतं त्रयाणां विपर्ययाद्बोधिसत्वानां ॥ ५० ॥

अल्पसुखं ध्यानं लौकिकानामात्मसुखं श्रावकप्रत्येकबुद्धानां । लीनं लौकिकानां सत्काये श्रावकप्रत्येकबुद्धानां च निर्वाणे । परिहाणिकं लौकिकानां क्षयि श्रावकप्रत्येकबुद्धानां निरुपधिशेषनिर्वाणे तत्क्षयात् । समोहं सर्वेषां यथायोगक्लिष्टाक्लिष्टेन मोहेन । बोधिसत्वानां पुनर्ध्यानं बहुसुखमात्मपरसुखमलीनमपरिहाणिकमक्षय्यसमोहं च ।

आमोषैस्तमसि यथा दीपैर्नुन्नं तथा त्रयज्ञानं ।
दिनकरकिरणैरिव तु ज्ञानमतुल्यं कृपालूनां ॥ ५१ ॥

यथा हस्तामोषैस्तमसि ज्ञानं परीत्तविषयमप्रत्यक्षमव्यक्तं च तथा पृथग्जनानां । यथावचरके दीपैर्ज्ञानं प्रादेशिकं प्रत्यक्षं नातिनिर्मलं तथा श्रावकाणां प्रत्येकबुद्धानां च । यथा दिनकरकिरणैर्ज्ञानं समन्तात्प्रत्यक्षं सुनिर्मलं च तथा बोधिसत्वानां । अत एव तदतुल्यं ।

आश्रयाद्वस्तुतो दानं निमित्तात्परिणामनात् ।
हेतुतो ज्ञानतः क्षेत्रान्निश्रयाच्च परं मतं ॥ ५२ ॥[3]

तत्राश्रयो बोधिसत्वः । वस्तु आमिषदानस्याध्यात्मिकं वस्तु परमं । अभय-

[1] La fin de cette āryā est également défectueuse. On peut toutefois, presque avec assurance, rétablir le vers comme il suit :

दुष्करचरणात्सकृपे ह्यदुष्करसुदुष्करं वीर्यं ॥

[2] *Parihāṇika*, mot nouveau. Le chinois traduit par *t'oei*, «reculer».

[3] Mètre anuṣṭubh jusqu'au vers 57.

दानस्यापायसंसारभीतेभ्यस्तु तदभयं । धर्मदानस्य महायानं । निमित्तं करुणा । परिणामना तेन महाबोधिफलप्रार्थना । हेतुः पूर्वदानपारमिताभ्यासवासना । ज्ञानं निर्विकल्पं येन त्रिमण्डलपरिशुद्धं दानं ददाति दातृदेयप्रतिग्राहकाविकल्पनात् । क्षेत्रं पञ्चविधं । अर्थी दुःखितो निःप्रतिसरणो दुश्चरितचारी गुणवांश्च । चतुर्णामुत्तरं क्षेत्रं परं । तदभावे पञ्चमं । निश्रयस्त्रिविधो यं निश्रित्य ददाति । अधिमुक्तिर्मनसिकारः समाधिश्च । अधिमुक्तिर्यथा भावनाविभागे ऽधिमुक्तिमनस्कार उक्तः । मनस्कारो यथा तत्रैवास्वादनाभिनन्दनमनस्कार उक्तः । समाधिर्गगनगञ्जादिर्यथा तत्रैव विभुत्वमुक्तं । एवमाश्रयादिपरसमयो दानं परमं । सोऽयं चापदेशो वेदितव्यः । यश्च ददाति यच्च येन च यस्मै च यतश्च यस्य च परिग्रहेण यत्र च यावत्प्रकारं तद्दानं ।

आश्रयाद्वस्तुतः शीलं निमित्तात्परिणामनात् ।
हेतुतो ज्ञानतः क्षेत्रान्निश्रयाच्च परं मतं ॥ ५३ ॥
आश्रयाद्वस्तुतो वीर्यं निमित्तात्परिणामनात् ।
हेतुतो ज्ञानतः क्षेत्रान्निश्रयाच्च परं मतं ॥ ५४ ॥
आश्रयाद्वस्तुतो ध्यानं निमित्तात्परिणामनात् ।
हेतुतो ज्ञानतः क्षेत्रान्निश्रयाच्च परं मतं ॥ ५५ ॥
आश्रयाद्वस्तुतः प्रज्ञा निमित्तात्परिणामनात् ।
हेतुतो ज्ञानतः क्षेत्रान्निश्रयाच्च परा मता ॥ ५६ ॥

शीलस्य परमं वस्तु बोधिसत्वसंवरः । क्षान्तेः प्राणापहारिणौ हीनदुर्बलौ । वीर्यस्य पारमिताभावना तद्विपक्षप्रहाणं च । ध्यानस्य बोधिसत्वसमाधयः । प्रज्ञायास्तथता । सर्वेषां शीलादीनां क्षेत्रं महायानं । शेषं पूर्ववद्वेदितव्यं ।

एकसत्वसुखं दानं बहुकल्पविघातकृत् ।
प्रियं स्याद्बोधिसत्वानां प्रागेव तद्विपर्ययात् ॥ ५७ ॥

यदि बोधिसत्वानां दानमेकस्यैव सत्वस्य सुखदं स्यादात्मनश्च बहुकल्पविघातकृत् । तथापि तत्तेषां प्रियं स्यात्करुणाविशेषात्किं पुनर्यदनेकसत्वसुखं च भवत्यात्मनश्च बहुकल्पानुग्रहकृत् ।

यदर्थमिच्छन्ति धनानि देहिनस्तदेव धीरा विसृजन्ति देहिषु ।
शरीरहेतोर्धनमिष्यते जनैस्तदेव धीरैः शतशो विसृज्यते ॥ ५८ ॥[1]

(1) Mètre indravajrā (et variété upajāti) jusqu'au vers 61.



अत्र पूर्वार्धमुत्तरार्धे व्याख्यातं ।

शरीरमेवोत्सृजतो न दुःख्यते यदा मनः का द्रविणे ऽवरे कथा ।
तदस्य लोकोत्तरमेति यन्मुदं स तेन तत्तस्य तदुत्तरं पुनः ॥ ५९ ॥

अत्र शरीरमेवोत्सृजतो यदा मनो न दुःख्यते तदस्य लोकोत्तरमिति संदर्शितं । एति यन्मुदं स तेन दुःखेन तत्तस्य तदुत्तरमिति तस्माल्लोकोत्तरादुत्तरं ।

प्रतिग्रहैरिष्टनिकामलब्धैर्न तुष्टिमायाति तथार्थिको ऽपि ।
सर्वास्तिदानेन यथेह धीमान् तुष्टिं व्रजत्यर्थिजनस्य तुष्ट्या ॥ ६० ॥

इष्टनिकामलब्धैरित्यभिप्रेतपर्याप्तलब्धैः । सर्वास्तिदानेनेति यावत्स्वजीवितदानेन ।

संपूर्णभोगो न तथास्तिमन्तमात्मानमन्वीक्षति याचको ऽपि ।
सर्वास्तिदानादधनो ऽपि धीमानात्मानमन्वेति यथास्तिमन्तं ॥ ६१ ॥
सुविपुलमपि वित्तं प्राप्य नैवोपकारं
विगणयति तथार्थी दायकाल्लाभहेतोः ।
विधिवदिह सुदानैरर्थिनस्तर्पयित्वा
महदुपकरसंज्ञां तेषु धीमान्यथैति ॥ ६२ ॥[1]

करुणाविशेषाद् । गतार्थौ श्लोकौ ।

स्वयमपगतशोका देहिनः स्वस्थरूपा
विपुलमपि गृहीत्वा भुञ्जते यस्य वित्तं ।
पथि परमफलाढ्याद्भोगवृक्षाद्यथैव
प्रविसृतिरतिभोगी बोधिसत्वान्न सोऽन्यः ॥ ६३ ॥

प्रविसृतिरतिभोगस्यास्येति प्रविसृतिरतिभोगी स च नान्यो बोधिसत्वाद्वेदितव्यः । शेषं गतार्थं ।

प्राधान्यतत्कारणकर्मभेदात् प्रकारभेदाश्रयभेदतश्च ।
चतुर्विबन्धप्रतिपक्षभेदात् वीर्यं परिज्ञेयमिति प्रदिष्टं ॥ ६४ ॥[2]

(1) Mètre mālinī jusqu'au vers 63. — (2) Mètre upajāti jusqu'au vers 70.



IMPRIMERIE NATIONALE.

षड्विधेन प्रभेदेन वीर्यं परिज्ञेयं। प्राधान्यभेदेन। तत्कारणभेदेन। प्रकारभेदेन । आश्रयभेदेन । चतुर्विबन्धप्रतिपक्षभेदेन च । अस्योद्देशस्योत्तरैः श्लोकैर्निर्देशः।

वीर्यं परं शुक्लगणस्य मध्ये तन्निश्रितस्तस्य यतोऽनुलाभः ।
वीर्येण सद्यः सुसुखो विहारो लोकोत्तरा लोकगता च सिद्धिः ॥ ६५ ॥

वीर्यं परं शुक्लगणस्य मध्ये इति सर्वशुक्लगणस्य मध्ये इति सर्वकुशलधर्मप्राधान्यं वीर्यस्य निर्दिष्टं। तन्निश्रितस्तस्य यतोऽनुलाभ इति प्राधान्यकारणं निर्दिष्टं। यस्माद्वीर्याश्रितः सर्वकुशलधर्मलाभः। वीर्येण सद्यः सुसुखो विहारो लोकोत्तरा लोकगता च सिद्धिरिति कर्म निर्दिष्टं। वीर्येण हि दृष्टधर्मे परमः सुखविहारः। सर्वा च लोकोत्तरा सिद्धिर्लौकिकी च क्रियते।

वीर्यादवाप्तं भवभोगमिष्टं वीर्येण शुद्धिं प्रबलामुपेताः ।
वीर्येण सत्कायमतीत्य मुक्ता वीर्येण बोधिं परमां विबुद्धाः ॥ ६६ ॥

इति। पर्यायद्वारेण[1] वीर्यस्य कर्म निर्दिष्टं। लौकिकलोकोत्तरसिद्धिभेदात्। तत्र प्रबला लौकिकी सिद्धिरनात्यन्तिकत्वात्।

पुनर्मतं हानिविवृद्धिवीर्यं मोक्षाधिपं पक्षविपक्षमन्यत्।
तत्त्वे प्रविष्टं परिवर्तकं च वीर्यं महार्थं च निरुक्तमन्यत् ॥ ६७ ॥
संनाहवीर्यं प्रथमं ततश्च प्रयोगवीर्यं विधिवत्प्रहितं ।
अलीनमक्षोभ्यमतुष्टिवीर्यं सर्वप्रकारं प्रवदन्ति बुद्धाः ॥ ६८ ॥

इत्येष प्रकारभेदः । तत्र हानिविवृद्धिवीर्यं सम्यक्प्रहाणेषु च द्वयोः कुशलधर्माभिवृद्धये । मोक्षाधिपं वीर्यमिन्द्रियेषु । मोक्षाधिपत्यार्थेन यस्मादिन्द्रियाणि। पक्षविपक्षं बलेषु विपक्षानवमृद्यार्थेन यस्माद्बलानि। तत्त्वे प्रविष्टं बोध्यङ्गेषु दर्शनमार्गे तद्व्यवस्थापनात् । परिवर्तकं मार्गाङ्गेषु भावनामार्गेऽन्तस्याश्रयपरिवृत्तिहेतुत्वात् । महार्थं वीर्यं पारमितास्वभावं स्वपरार्थाधिकारात् । संनाहवीर्यं प्रयोगाय संनह्यतः । प्रयोगवीर्यं तथा प्रयोगतः । अलीनवीर्यमुदारेऽप्यधिगन्तव्ये लयाभावतः । अक्षोभ्यवीर्यं शीतलोष्णादिभिर्दुःखैरविकोपनतः[2] । असंतुष्टिवीर्यमल्पेनाधिगमेनासंतुष्टितः । एभिरेव

(1) Ex conj. Ms. : पर्यायन्दन्द्रेण.
(2) *Vikopana*, mot nouveau. Le chinois traduit par *toung*, «agiter, mettre en émoi».



संनाहवीर्यादिभिः सूत्रे। स्थामवान् वीर्यवानुत्साही दृढपराक्रमो अनिक्षिप्तधुरः कुशलेषु धर्मेष्वित्युच्यते यथाक्रमं।

निकृष्टमध्योत्तमवीर्यमन्यत् यानत्रये युक्तजनाश्रयेण।
लीनात्युदाराशयबुद्धियोगात् वीर्यं तदल्पार्थमहार्थमिष्टं ॥ ६९ ॥

अत्राश्रयप्रभेदेन वीर्यभेदो निर्दिष्टः। यानत्रये प्रयुक्तो यो जनस्तदाश्रयेण यथाक्रमं निकृष्टमध्योत्तमं वीर्यं वेदितव्यं। किं कारणं। लीनात्युदाराशयबुद्धियोगात्। लीनो हि बुद्ध्याशयो यानद्वये प्रयुक्तानां केवलात्मार्थाधिकारात्। अत्युदारो महायाने प्रयुक्तानां परार्थाधिकारात्। अत एव यथाक्रमं वीर्यं तदल्पार्थं महार्थमिव स्वार्थाधिकाराच्च।

न वीर्यवान्भोगपराजितोऽस्ति नो वीर्यवान् क्लेशपराजितोऽस्ति।
न वीर्यवान् खेदपराजितोऽस्ति नो वीर्यवान् प्राप्तिपराजितोऽस्ति ॥ ७० ॥

इत्ययं चतुर्विबन्धप्रतिपक्षभेदः । चतुर्विधो दानादीनां विबन्धो येन दानादिषु न प्रवर्तते। भोगसक्तिस्तदाग्रहतः। क्लेशसक्तिस्तत्परिभोगाध्यवसानतः। खेदो दानादिषु प्रयोगाभियोगपरिखेदतः। प्राप्तिरल्पमात्रदानादिसंतुष्टितः। तत्प्रतिपक्षभेदेनैतच्चतुर्विधं वीर्यमुक्तं। अन्योन्यविनिश्चयविभागे श्लोकः।

अन्योन्यं संग्रहतः प्रभेदतो धर्मतो निमित्ताच्च।
षण्णां पारमितानां विनिश्चयः सर्वथा ज्ञेयः ॥ ७१ ॥[1]

अन्योन्यसंग्रहतो विनिश्चयः। अभयप्रदानेन शीलक्षान्तिसंग्रहो यस्मात्ताभ्यामभयं ददाति । धर्मदानेन ध्यानप्रज्ञयोर्यस्मात्ताभ्यां धर्मं ददाति । उभाभ्यां वीर्यस्य यस्मात्तेनोभयं ददाति। कुशलधर्मसंग्राहकेण शीलेन सर्वेषां दानादीनां संग्रहः । एवं क्षान्त्यादिभिरन्योन्यसंग्रहो यथायोगं योज्यः । प्रभेदतो विनिश्चयः । दानं षड्विधं दानदानं शीलदानं यावत्प्रज्ञादानं । परसंतानेषु शीलादिनिवेशनात् । धर्मतो विनिश्चयः । ये सूत्रादयो येषु दानादिष्वर्थेषु संदृश्यन्ते । ये च दानादयो येषु सूत्रादिषु धर्मेषु संदृश्यन्ते। तेषां परस्परं संग्रहो वेदितव्यः । निमित्ततो विनिश्चयः । दानं शीलादीनां निमित्तं भवति। भोगनिरपेक्षस्य शीलादिषु प्रवृत्तेः। शीलमपि दानादीनां। भिक्षुसंवरसमादानं सर्वस्वपरिग्रहत्यागाच्छीलप्रतिष्ठितस्य च क्षान्त्यादियोगात्। कुशलधर्मसंग्राहकशीलसमादानं च सर्वेषां दानादीनां निमित्तं। एवं

(1) Mètre āryā.

क्षान्त्यादीनामन्योन्यनिमित्तभावो यथा योज्यः । संग्रहवस्तुविभागे सप्त श्लोकाः । चत्वारि संग्रहवस्तूनि । दानं प्रियवादिता अर्थचर्या समानार्थता । तत्र ।

दानं समं प्रियाख्यानमर्थचर्या समार्थता ।
तद्देशना समादाय स्वानुवृत्तिभिरिष्यते ॥ ७२ ॥[1]

दानं सममिष्यते यथा पारमितासु प्रियाख्यानं तद्देशना । अर्थचर्या तत्समादापना[2] । तच्छब्देन पारमितानां ग्रहणात्पारमितादेशना पारमितासमादापनेत्यर्थः । समानार्थता यत्र परं समादापयति तत्र स्वयमनुवृत्तिः । किमर्थं पुनरेतानि चत्वारि संग्रहवस्तूनीष्यन्ते । एष हि परेषां ।

उपायो ऽनुग्रहकरो ग्राहको ऽथ प्रवर्तकः ।
तथानुवर्तको ज्ञेयश्चतुःसंग्रहवस्तुतः ॥ ७३ ॥

दानमनुग्राहक उपायः । आमिषदानेन कायिकानुग्रहोत्पादनात् । प्रियवादिता ग्राहकः । अव्युत्पन्नसंदिग्धार्थग्राहणात् । अर्थचर्या प्रवर्तकः । कुशले प्रवर्तनात् । समानार्थता ऽनुवर्तकः । यथावादितथाकारिणं हि समादापकं विदित्वा यत्र कुशले तेन प्रवर्तिताः परे भवन्ति तदनुवर्तन्ते ।

आद्येन भाजनीभावो[3] द्वितीयेनाधिमुच्यना ।
प्रतिपत्तिस्तृतीयेन चतुर्थेन विशोधना ॥ ७४ ॥

आमिषदानेन भाजनीभवति धर्मस्य विधेयतापत्तेः । प्रियवादितया तं धर्ममधिमुच्यते तदर्थव्युत्पादनसंशयच्छेदनतः । अर्थचर्यया प्रतिपद्यते यथाधर्मं । समानार्थतया तां प्रतिपत्तिं विशोधयति दीर्घकालानुष्ठानाद् । इदं संग्रहवस्तूनां कर्म ।

चतुःसंग्रहवस्तुत्वं संग्रहद्वयतो मतं ।
आमिषेणापि धर्मेण धर्मेणालम्बनादपि ॥ ७५ ॥

यदप्यन्यत्संग्रहवस्तुद्वयमुक्तं भगवता आमिषसंग्रहो धर्मसंग्रहश्च । ताभ्यामे-

(1) Mètre anuṣṭubh jusqu'au vers 78.

(2) *Samādāpanā*, forme nouvelle équivalente de *samādāpana*. Cf. aussi *samādāpanatā* dans Çikṣā-samuccaya, 309, 15-16.

(3) *Bhājanībhāva*, mot nouveau, dérivé régulièrement de *bhājanībhū*.



तान्येव चत्वारि संग्रहवस्तूनि संगृहीतानि । आमिषसंग्रहेण प्रथमे । धर्मसंग्रहेणावशिष्टानि । तानि पुनस्त्रिविधेन धर्मेण । आलम्बनधर्मेण प्रतिपत्तिधर्मेण तद्विशुद्धिधर्मेण च यथाक्रमं ।

हीनमध्योत्तमः प्रायो वन्ध्यो ऽवन्ध्यश्च संग्रहः ।
अवन्ध्यः सर्वथा चैव ज्ञेयो ह्याकारभेदतः ॥ ७६ ॥

एष संग्रहस्य प्रकारभेदः । तत्र हीनमध्योत्तमः संग्रहो बोधिसत्वानां यानत्रयप्रयुक्तेषु वेदितव्यो यथाक्रमं । प्रायेण वन्ध्यो ऽधिमुक्तिचर्याभूमौ । प्रायेणावन्ध्यो भूमिप्रविष्टानां । अवन्ध्यः सर्वथा अष्टम्यादिषु भूमिषु सत्वार्थस्यावश्यं संपादनात् ।

पर्षत्कर्षणप्रयुक्तैर्विधिरेष समाश्रितः ।
सर्वार्थसिद्धौ सर्वेषां सुखोपायश्च शस्यते ॥ ७७ ॥

ये केचित्पर्षत्कर्षणे प्रयुक्ताः सर्वैस्तैरयमेवोपायः समाश्रितो यदुत चत्वारि संग्रहवस्तूनि । तथा हि सर्वार्थसिद्धये सर्वेषां सुखश्चैष उपायः प्रशस्यते बुद्धैः ।

संगृहीता ग्रहीष्यन्ते संगृह्यन्ते च ये ऽधुना ।
सर्वे त एवं तस्माच्च वर्त्म तत्सत्वपाचने ॥ ७८ ॥

एतेन लोकत्रये ऽपि सर्वसत्वानां परिपाचने चतुर्णां संग्रहवस्तूनामेकायनमार्गत्वं दर्शयति । अन्यमार्गाभावात् ।

इति सततमसक्तभोगबुद्धिः शमयमनोद्यमपारगः स्थितात्मा ।
भवविषयनिमित्तनिर्विकल्पो भवति स सत्वगणस्य संगृहीता ॥ ७९ ॥[1]

एतेन यथोक्तासु षट्सु पारमितासु स्थितस्य बोधिसत्वस्य संग्रहवस्तुप्रयोग दर्शयति स्वपरार्थसंपादनात् पारमिताभिः संग्रहवस्तुभिश्च यथाक्रमं ।

महायानसूत्रालंकारे पारमिताधिकारः समाप्तः

(1) Mètre puṣpitāgrā.

# XVII

बुद्धपूजाविभागे सप्त श्लोकाः

संमुखं विमुखं पूजा बुद्धानां चीवरादिभिः ।
गाढप्रसन्नचित्तस्य संभारद्वयपूरये ॥ १ ॥[1]
अबन्ध्यबुद्धजन्मत्वे प्रणिधानवतः सतः ।
त्रयस्यानुपलम्भस्तु निष्पन्ना बुद्धपूजना ॥ २ ॥
सत्वानामप्रमेयानां परिपाकाय चापरा ।
उपधेश्चित्ततश्चान्या अधिमुक्तेर्निधानतः ॥ ३ ॥
अनुकम्पाक्षमाभ्यां च समुदाचारतोऽपरा ।
वस्त्वाभोगावबोधाच्च विमुक्तेश्च तथात्वतः ॥ ४ ॥

इत्येभिश्चतुर्भिः श्लोकैः ।

आश्रयाद्वस्तुतः पूजा निमित्तात्परिणामनात् ।
हेतुतो ज्ञानतः क्षेत्रान्निश्रयाच्च प्रदर्शिता ॥ ५ ॥

वेदितव्या । तत्राश्रयः समक्षपरोक्षा बुद्धाः । वस्तु चीवरादयः । निमित्तं प्रगाढप्रसादसहगतं चित्तं । परिणामना पुण्यज्ञानसंभारपरिपूरये । हेतुरबन्ध्यो मे बुद्धोत्पादः स्यादिति पूर्वप्रणिधानं । ज्ञानं निर्विकल्पं पूजकपूज्यपूजानुपलम्भतः । क्षेत्रमप्रमेयाः सत्वाः । तत्परिपाचनाय तैस्तत्प्रयोजततात् तेषु तद्रोपणतः । निश्रय उपधिश्चित्तं च । तत्रोपधिं निश्रित्य पूजा चीवरादिभिश्चित्तं निश्रित्यास्वादनानुमोदनाभिनन्दनमनस्कारैः । तथोक्तैश्चाधिमुक्त्यादिभिर्यदुत महायानधर्माधिमुक्तितः बोधिचित्तोत्पादतः । प्रणिधानमेव हि निधानमत्रोक्तं श्लोकवक्त्वानुरोधात् । सत्वानुकम्पनतः । दुष्करचर्यादुःखक्षमणतः । पारमितासमुदाचारतः । योनिशो धर्ममनसिकारतः । स ह्यविपर्ययसत्वाद्वस्त्वाभोगः । सम्यग्दृष्टितो दर्शनमार्गे । स हि यथाभूतावबोधाद्वस्त्ववबोधः । विमुक्तितः क्लेशविमोक्षाच्छ्रावकाणां । तथात्वतो महाबोधिप्राप्तेरित्ययं पूजायाः प्रकारभेदः ।

हेतुतः फलतश्चैव आत्मना च परैरपि ।
लाभसत्कारतश्चैव प्रतिपत्तेर्द्विधा च सा ॥ ६ ॥

(1) Mètre anuṣṭubh jusqu'au vers 7.



परीत्ता महती पूजा समानामानिका च सा ।
प्रयोगाद्गतितश्चैव प्रणिधानाच्च सा मता ॥ ७ ॥

इत्ययमर्थादिभेदेनापरः प्रकारभेदः । तत्रातीता हेतुः प्रत्युत्पन्ना फलं प्रत्युत्पन्ना हेतुरनागता फलमित्येवं हेतुफलतोऽतीतानागतप्रत्युत्पन्ना वेदितव्या । आत्मनेत्याध्यात्मिकी परैरिति बाह्या । लाभसत्कारतो औदारिकी । प्रतिपत्तितः सूक्ष्मा । परीत्ता हीना महती प्रणीता । पुनः समाना हीना निर्माना प्रणीता त्रिमण्डलाविकल्पनात् । कालान्तरप्रयोज्या दूरे । तत्कालप्रयोज्यान्तिके । पुनर्विच्छिन्नायां गतौ दूरे । समनन्तरायामन्तिके । पुनर्यां पूजामायत्यां प्रयोजयितुं प्रणिदधाति सा दूरे यां प्रणिहितः कर्तुं सान्तिके । कतमा पुनर्बुद्धपूजा परमा वेदितव्येत्याह ।

बुद्धेषु पूजा परमा स्वचित्तात् धर्माधिमुक्त्याशयतो विभुत्वात् ।
अकल्पनोपायपरिग्रहेण सर्वैककार्यत्वनिवेशतश्च ॥ ८ ॥[1]

इत्येभिः पञ्चभिराकारैः स्वचित्तपूजा बुद्धेषु परमा वेदितव्या । यदुत पूजोपसंहितमहायानधर्माधिमुक्तितः । आशयतो नवभिराशयैः । आस्वादनानुमोदनाभिनन्दनाशयैः । अतृप्तविपुलमुदितोपकरनिर्लेपकल्याणाशयैश्च ये पारमिताभावनायां निर्दिष्टाः । विभुत्वतो गगनगञ्जादिसमाधिभिः । निर्विकल्पज्ञानोपायपरिग्रहतः । सर्वमहाबोधिसत्वैककार्यत्वप्रवेशतश्च मिश्रोपमिश्रकार्यत्वात्[2] । कल्याणमित्रसेवाविभागे सप्त श्लोकाः । तत्रार्धपञ्चमैः श्लोकैः ।

आश्रयाद्वस्तुतः सेवा निमित्तात्परिणामनात् ।
हेतुतो ज्ञानतः क्षेत्रान्निश्रयाच्च प्रदर्शिता ॥ ९ ॥[3]
मित्रं श्रयेद्दान्तशमोपशान्तं गुणाधिकं सोद्यममागमाढ्यं ।
प्रबुद्धतत्वं वचसाभ्युपेतं कृपात्मकं खेदविवर्जितं च ॥ १० ॥[4]

इत्येवंगुणमित्रं सेवाया आश्रयः । दान्तं शीलयोगादिन्द्रियदमेन । शान्तं समाधियोगादध्यात्मं चेतःशमथेन । उपशान्तं प्रयोगादुपस्थितक्लेशोपशमनतः । गुणैरधिकं न समं वा न्यूनं वा । सोद्यमं नोदासीनं परार्थे । आगमाढ्यं

(1) Mètre upajāti.

(2) *Upamiçra*, mot nouveau (*miçropamiçra*). Cf. aussi XVIII, 44, comm., et XX, 14 et 16, comm.

(3) Mètre anuṣṭubh.

(4) Mètre upajāti jusqu'au vers 16.

नाल्पश्रुतं। प्रबुद्धतत्त्वं तत्त्वाधिगमात्। वचसाभ्युपेतं वाक्करणेनोपेतं। कृपात्मकं निरामिषचित्तत्वात्। खेदविवर्जितं सातत्यसत्कृत्यधर्मदेशनात्।

सत्कारलाभैः परिचर्यया च सेवेत मित्रं प्रतिपत्तितश्च।

इति। सेवायास्तु।

धर्मे तथाज्ञाशय एव धीमान् मित्रं प्रगच्छेत्समये नतश्च॥ ११॥

इति त्रिविधं निमित्तं। आज्ञातुकामता। कालज्ञता। निर्मानता च।

सत्कारलाभेषु गतस्पृहो ऽसौ प्रपत्तये तं परिणामयेच्च।

इति परिणामना प्रतिपत्त्यर्थं सेवनान्न लाभसत्कारार्थं।

यथानुशिष्टप्रतिपत्तितश्च संराधयेच्चित्तमतो ऽस्य धीरः॥ १२॥

इति। यथानुशिष्टप्रतिपत्तिः सेवाहेतुः। तया तच्चित्ताराधनात्।

यानत्रये कौशलमेत्य बुद्ध्या स्वस्यैव यानस्य यतेत सिद्धौ।

इति यानत्रयकौशलात् ज्ञानं।

सत्त्वानमेयान्परिपाचनाय क्षेत्रस्य शुद्धस्य च साधनाय॥ १३॥

इति द्विविधं क्षेत्रं तत्सेवायाः। अप्रमेयाश्च सत्त्वाः परिशुद्धं च बुद्धक्षेत्रं। धर्मं श्रुत्वा येषु प्रतिष्ठापनात्। यत्र च स्थितेन।

धर्मेषु दायादगुणेन युक्तो नैवामिषेण प्रवसेत्स मित्रम्।

इति निश्रयः सेवायाः। धर्मदायादतां निश्रित्य कल्याणमित्रं सेवेत। नामिषदायादतां। अत ऊर्ध्वमध्यर्धेन श्लोकेन प्रकारभेदः सेवाया वेदितव्यः।

हेतोः फलाद्धर्ममुखानुयानात्सेवेत मित्रं बहितश्च[1] धीमान्॥ १४॥
श्रुतश्रवाच्चेतसि योगतश्च समाननिर्माणमनो ऽनुयोगात्।

इतोः फलादित्यतीतादिभेदतः पूर्ववत् धर्ममुखानुयानात्सेवेत मित्रं

[1] *Bahitas*, mot nouveau, glosé dans le commentaire par *bahirdhā*.



बहितश्च धीमानित्याध्यात्मिकबाह्यभेदः। धर्ममुखस्रोतो हि धर्ममुखानुयानं बहिर्धा बहितः श्रुतश्रवाच्चेतसि योगतश्चेत्यौदारिकसूक्ष्मभेदः। श्रवणं ह्यौदारिकं चिन्तनभावनं सूक्ष्मं। तदेव चेतसि योगः। समाननिर्मानमनो ऽनुयोगादिति हीनप्रणीतभेदः।

गतिप्रयोगप्रणिधानतश्च कल्याणमित्रं हि भजेत धीमान्॥ १५॥

इति दूरान्तिकभेदः पुर्ववद्योजयितव्यः। कतमा पुनः परमा सेवेति सप्तमः श्लोकः।

सन्मित्रसेवा परमा स्वचित्ताद् धर्माधिमुक्त्याशयतो विभुत्वैः।
अकल्पनोपायपरिग्रहेण सर्वैककार्यत्वनिवेशतश्च॥ १६॥

इति पूर्ववत्। अप्रमाणविभागे द्वादश श्लोकाः।

ब्राह्म्या विपक्षहीना ज्ञानेन गताश्च निर्विकल्पेन।
त्रिविधालम्बनवृत्ताः सत्त्वानां पाचका धीरे॥ १७॥[1]

ब्राह्म्या विहाराश्चत्वार्यप्रमाणानि। मैत्री करुणा मुदितोपेक्षा च। ते पुनर्बोधिसत्त्वे चतुर्लक्षणा वेदितव्याः। विपक्षहानितः। प्रतिपक्षविशेषयोगतः। वृत्तिविशेषतस्त्रिविधालम्बनवृत्तित्वात्। तथा हि ते सत्त्वालम्बना धर्मालम्बनाश्च। कर्मविशेषतश्च। सत्त्वपरिपाचकत्वात्। सत्त्वधर्मालम्बनात्। पुनः कतमस्मिन् सत्त्वनिकाये धर्मे वा प्रवर्तन्ते। अनालम्बनाश्च कतमस्मिन्नालम्बने।

सौख्यार्थिनि दुःखार्ते सुखिते क्लिष्टे च ते प्रवर्तन्ते।
तद्देशिते च धर्मे तत्तथतायां च धीराणां॥ १८॥

सत्त्वालम्बनाः सुखार्थिनि यावत् क्लिष्टे सत्त्वनिकाये प्रवर्तन्ते। तथा हि मैत्री सत्त्वेषु सुखसंयोगाकारा। करुणा दुःखवियोगाकारा। मुदिता सुखावियोगाकारा। उपेक्षासु वेदनासु तेषां सत्त्वानां निःक्लेशतोपसंहाराकारा। धर्मालम्बनास्तद्देशिते धर्मे। यत्र ते विहारा देशिताः। अनालम्बनास्तत्तथतायां। ते ह्यविकल्पत्वादनालम्बना इवेत्यनालम्बनाः। अपि खलु।

तस्याश्च तथतार्थत्वात् क्षान्तिलाभाद्विशुद्धितः।
कर्मद्वयादनालम्बा मैत्री क्लेशक्षयादपि॥ १९॥[2]

[1] Mètre āryā jusqu'au vers 18. — [2] Mètre anuṣṭubh.

एभिश्चतुर्भिः कारणैरनालम्बना मैत्री वेदितव्या । तथतालम्बनत्वात् । अनुत्पत्तिकधर्मक्षान्तिलाभेनाष्टम्यां भूमौ । धातुपुष्ट्या तद्विशुद्धितः । कर्मद्वयतश्च । या मैत्री निष्यन्देन कायकर्मणा संगृहीता । क्लेशक्षयतश्च । तथा हि क्लेश आलम्बनमुक्तं । मनोमयानां ग्रन्थानां प्रहाणादुच्छिद्यते आलम्बनमिति वचनात् ।

ते निश्चलाश्च चलाश्च कृपणैरास्वादिता न च ज्ञेयाः[1] ।

ते च ब्राह्म्या विहाराश्चतुर्विधा वेदितव्याः । तत्र चला हानभागीयाः परिहाणीयत्वात् । अचलाः स्थितिविशेषभागीया अपरिहाणीयत्वात् । आस्वादिताः क्लिष्टाः अनास्वादिता अक्लिष्टाः । कृपणैरिति सुखलोलैरनुदारचित्तैः । एष ब्राह्म्यविहाराणां हानभागीयादिप्रकारभेदः । तेषु पुनः ।

अचलेषु बोधिसत्वाः प्रतिष्ठिताः सक्तिविगतेषु ॥ २० ॥[2]

न चलेषु नाप्यास्वादितेषु ।

असमाहितस्वभावा मृदुमध्या हीनभूमिका ये ऽपि ।
हीनाशयाः समाना हीनास्ते ह्यन्यथा त्वधिकाः ॥ २१ ॥

एष मृद्वधिमात्रताभेदः । तत्र षड्विधा मृदुका असमाहितस्वभावाः । सर्वे समाहिता अपि । ये मृदुमध्याः । हीनभूमिका ये ऽपि उत्तरां बोधिसत्वभूमिमपेक्ष्य । हीनाशया अपि । श्रावकादीनां समाना अपि । ये ऽनुत्पत्तिकधर्मक्षान्तिरहिता हीनास्ते मृदुका इत्यर्थः । अन्यथा त्वधिका इति यथोक्तविपर्ययेणाधिमात्रता वेदितव्या ।

ब्राह्म्यैर्विहृतविहारः कामिषु संजायते यदा धीमान् ।
संभारान्पूरयते सत्वांश्च विपाचयति तेन ॥ २२ ॥
सर्वत्र चाविरहितो ब्राह्म्यै रहितश्च तद्विपक्षेण ।
तत्प्रत्ययैरपि भृशैर्न याति विकृतिं प्रमत्तो ऽपि ॥ २३ ॥

हेतुफललिङ्गभेदः । तत्र ब्राह्म्यैर्विहृतो विहारैरिति हेतुः । कामिषु सत्वेषु

[1] Le manuscrit marque une lacune d'une syllabe entre च et याः à la fin de l'hémistiche. La restauration ज्ञेयाः paraît très vraisemblable.

[2] Mètre āryā jusqu'au vers 28.



संजायत इति विपाकफलं । संभारान्पूरयत्यधिपतिफलं । सत्वान्परिपाचयतीति पुरुषकारफलं । सर्वत्र चाविरहितो ब्राह्म्यैर्विहारैर्जायत इति निष्यन्दफलं । रहितश्च तद्विपक्षेणेति विसंयोगफलं । भृशैरपि तत्प्रत्ययैरविकृतिगमनं लिङ्गं । प्रमत्तो ऽपीत्यसंमुखीभूते ऽपि प्रतिपक्षे । अन्यैश्चतुर्भिः श्लोकैर्गुणदोषभेदः ।

व्यापादविहिंसाभ्यामरतिव्यापादकामरागैश्च ।
युक्तो हि बोधिसत्वो बहुविधमादीनवं स्पृशति ॥ २४ ॥

इति दोषः । ब्राह्म्यविहाराभावे तद्विपक्षयोगात् । तत्र व्यापादादयो मैत्र्यादीनां यथाक्रमं विपक्षाः । व्यापादकामरागावुपेक्षायाः । कथं बहुविधादीनवं स्पृशतीत्याह ।

क्लेशैर्हन्त्यात्मानं सत्वानुपहन्ति शीलमुपहन्ति ।
सविलेखलाभहीनो रक्षाहीनस्तथा शास्त्रा ॥ २५ ॥
साधिकरणो ऽयशस्वी परत्र संजायते ऽक्षणेषु स च ।
प्राप्ताप्राप्तविहीनो मनसि महद्दुःखमाप्नोति ॥ २६ ॥

तत्र प्रथमैस्त्रिभिः पदैरात्मव्याबाधाय चेतयते परव्याबाधायोभयव्याबाधायेत्येतमादीनवं दर्शयति । सविलेखादिभिः षड्भिः पदैर्दृष्टधार्मिकमवद्यं प्रसवतीति दर्शयति । कथं च प्रसवति । आत्माप्यात्मानमुपवदते । परे ऽपि देवता अपि । शास्ताप्यन्ये ऽपि विज्ञाः सब्रह्मचारिणो धर्मतया विगर्हन्ते । दिग्विदिक्षु चास्य पापको ऽवर्णशब्दश्लोको निश्चरतीत्येवं सविलेखो यावदयशस्वीत्यनेन यथाक्रमं दर्शयति । शेषैस्त्रिभिः पदैर्यथाक्रमं सांपरायिकं दृष्टधर्मसांपरायिकमवद्यं प्रसवति । तज्जं चैतसिकं दुःखदौर्मनस्यं प्रतिसंवेदयत इत्येतदादीनवं दर्शयति ।

एते सर्वे दोषा मैत्र्यादिषु सुस्थितस्य न भवन्ति ।
अक्लिष्टः संसारं सत्वार्थं नो च संत्यजति ॥ २७ ॥

इति । ब्राह्मविहारयोगे त्रिविधं गुणं दर्शयति । यथोक्तदोषाभावं अक्लिष्टस्य सत्वहेतोः संसारापरित्यागं ।

न तथैकपुत्रकेष्वपि गुणवत्स्वपि भवति सर्वसत्वानां ।
मैत्र्यादिचेतनेयं सत्वेषु यथा जिनसुतानां ॥ २८ ॥

इत्येते च बोधिसत्वमैत्र्यादीनां तीव्रतां दर्शयति । करुणाविभागे तदालम्बनप्रभेदमारभ्य द्वौ श्लोकौ।

प्रदीप्तान् शत्रुवशगान् दुःखाक्रान्तांस्तमोवृतान् ।
दुर्गमार्गसमारूढान्महाबन्धनसंयुतान् ॥ २९ ॥[1]
महाशनविषाक्रान्तलोलान्मार्गप्रनष्टकान् ।
उत्पथप्रस्थितान् सत्वान्दुर्बलान् करुणायते ॥ ३० ॥

तत्र प्रदीप्ताः कामरागेण कामसुखभक्ताः । शत्रुवशगा मारकृतान्तरायाः कुशले ऽप्रयुक्ताः दुःखाक्रान्ताः दुःखाभूता नरकादिषु। तमोवृता औरभ्रिकादयो दुश्चरितैकान्तिकाः । कर्मविपाकसंमूढत्वात् । दुर्गमार्गसमारूढा अपरिनिर्वाणधर्माणः संसारवर्त्मात्यन्तानुपच्छेदात् । महाबन्धनसंयुता अन्यतीर्थ्याः । मोक्षसंप्रस्थिता नानाकुदृष्टिगाढबन्धनबद्धत्वात् । महाशनविषाक्रान्तलोलाः समापत्तिसुखसक्ताः । तेषां हि तत् क्लिष्टं समापत्तिसुखं । यथा मृष्टमशनं विषाक्रान्तं । ततः प्रच्यावनात् । मार्गप्रणष्टका अभिमानिका मोक्षमार्गभ्रान्तत्वात् । उत्पथप्रस्थिता हीनयानप्रयुक्ता अनियताः । दुर्बला अपरिपूर्णसंभारा बोधिसत्वाः । इत्येते दशविधाः सत्वा बोधिसत्वकरुणाया आलम्बनं । पञ्चफलसंदर्शने करुणायाः श्लोकः ।

हेठापहं ह्युत्तमबोधिबीजं सुखावहं तायकमिष्टहेतुं[2] ।
स्वभावदं धर्ममुपाश्रितस्य बोधिर्न दूरे जिनात्मजस्य ॥ ३१ ॥[3]

ततः हेठापहत्वेन तद्विपक्षविहिंसाप्रहाणाद्विसंयोगफलं दर्शयति । उत्तमबोधिबीजत्वेनाधिपतिफलं । परात्मनोर्यथाक्रमं सुखावहतायकत्वेन पुरुषकारफलं। इष्टहेतुत्वेन विपाकफलं। स्वभावदत्वेन निष्पन्दफलमायत्यां विशिष्टकरुणाफलदानात् । एवं पञ्चविधां करुणामाश्रित्य बुद्धत्वमदूरे वेदितव्यं । अप्रतिष्ठितसंसारनिर्वाणत्वे श्लोकः ।

विज्ञाय संसारगतं समग्रं दुःखात्मकं चैव निरात्मकं च।
नोद्वेगमायाति न चापि दोषैः प्रबाध्यते कारुणिको ऽग्रबुद्धिः ॥ ३२ ॥

सर्वं संसारं यथाभूतं परिज्ञाय बोधिसत्वो नोद्वेगमायाति कारुणिकत्वात्।

(1) Mètre anuṣṭubh jusqu'au vers 3o.

(2) *Tāyaka*, mot nouveau, probablement apparenté à *tāyin*. Le chinois omet le mot dans le vers et dans le commentaire.

(3) Mètre upajāti jusqu'au vers 35.



न दोषैर्बाध्यते ऽग्रबुद्धित्वात् । एवं निर्वाणे प्रतिष्ठितो भवति न संसारे यथाक्रमं। संसारपरिज्ञाने श्लोकः ।

दुःखात्मकं लोकमवेक्षमाणो दुःखायते वेत्ति च तद्यथावत् ।
तस्याभ्युपायं परिवर्जने च न खेदमायात्यपि वा कृपालुः ॥ ३३ ॥

दुःखायत इति करुणायते । वेत्ति च तद्यथावदिति दुःखं यथाभूतं तस्य च दुःखस्य परिवर्जने ऽभ्युपायं । वेत्ति येनास्य दुःखं निरुध्यते । एतेन जानन्नपि संसारदुःखं यथाभूतं तत्परित्यागोपायं च न खेदमापद्यते बोधिसत्वः करुणाविशेषादिति प्रदर्शयति। करुणाप्रभेदे द्वौ श्लोकौ ।

कृपा प्रकृत्या प्रतिसंख्यया च पूर्वं तदभ्यासविधानयोगात् ।
विपक्षहीना च विशुद्धिलाभात् चतुर्विधेयं करुणात्मकानां ॥ ३४ ॥

सेयं यथाक्रमं गोत्रविशेषतः। गुणदोषपरीक्षणतः। जन्मान्तरपरिभावनतः। वैराग्यलाभतश्च वेदितव्या । तद्विपक्षविहिंसाप्रहाणे सति विशुद्धिलाभत इति वैराग्यलाभतः ।

न सा कृपा या न समा सदा वा नाध्याशयाद्वा प्रतिपत्तितो वा।
वैराग्यतो नानुपलम्भतो वा न बोधिसत्वो ह्यकृपस्तथा यः ॥ ३५ ॥

तत्र समा सुखितादिषु यत्किंचिद्वेदितमिदमत्र दुःखस्येति विदित्वा । सदा निरुपधिशेषनिर्वाणे तदक्षयात् । अध्याशयाद्भूमिप्रविष्टानामात्मपरसमताशयलाभात् । प्रतिपत्तितो दुःखपरित्राणक्रियया । वैराग्यतस्तद्विपक्षविहिंसाप्रहाणात् । अनुपलम्भतो ऽनुत्पत्तिकधर्मक्षान्तिलाभात् । करुणावृक्षप्रतिबिम्बके पञ्च श्लोकाः ।

करुणा क्षान्तिश्चिन्ता प्रणिधानं जन्म सत्वपरिपाकः ।
करुणातरुरेष महान्मूलादिः पुष्पपत्रफलः[1] ॥ ३६ ॥[2]

इत्येष मूलस्कन्धशाखापत्रपुष्पफलावस्थः करुणावृक्षो वेदितव्यः । एतस्य करुणा मूलं । क्षान्तिः स्कन्धः । सत्वार्थचिन्ता शाखा । प्रणिधानं शोभनेषु जन्मसु पत्राणि। शोभनं जन्म पुष्पं। सत्वपरिपाकः फलं ।

मूलं करुणा न भवेद्दुष्करचर्या सहिष्णुता न भवेत् ।
दुःखाक्षमश्च धीमान् सत्वार्थं चिन्तयेन्नैव ॥ ३७ ॥

(1) Ms. : पश्चिमात्रफलः. — (2) Mètre āryā jusqu'au vers 62.

चिन्ताविहीनबुद्धिः प्रणिधानं शुक्लजन्मसु न कुर्यात् ।
शुभजन्माननुगच्छन्सत्वान्परिपाचयेन्नैव ॥ ३८ ॥

आभ्यां श्लोकाभ्यां पूर्वोत्तरप्रसवसाधर्म्यात्करुणादीनां मूलादिभावं साधयति ।

करुणासेको मैत्री तद्दुःखे सौख्यतो विपुलपुष्टिः ।
शाखावृद्धिर्विशदा योनिमनस्कारतो ज्ञेया ॥ ३९ ॥
पर्णत्यागादानं प्रणिधीनां संततेरनुच्छेदात् ।
द्विविधप्रत्ययसिद्धेः पुष्पमबन्ध्यं फलं चास्मात् ॥ ४० ॥

एताभ्यां श्लोकाभ्यां वृक्षमूलसेकादिसाधर्म्यं करुणावृक्षस्य दर्शयति । करुणा हि मूलवृक्षा । तस्याः सेको मैत्री तया तदाप्यायनात् । मैत्रचित्तो हि परदुःखेन दुःखायते । ततश्च करुणोद्भवदुःखमुत्पद्यते[1] बोधिसत्वस्य स्वार्थप्रयुक्तस्य तत्र सौख्योत्पादाद्विपुलपुष्टिः क्षान्तिपुष्टिरित्यर्थः । सा हि स्कन्ध इत्युक्ता । स्कन्धश्च विपुलः । योनिशोमनस्काराद् बहुविधा महायाने शाखावृद्धिः । चिन्ता हि शाखेत्युक्ता । पूर्वापरनिरोधोत्पादक्रमेण प्रणिधानसंतानस्यानुच्छेदात् । पर्णत्यागादानसाधर्म्यं प्रणिधानानां वेदितव्यं । आध्यात्मिकप्रत्ययसिद्धितः स्वसंतानपरिपाकात्पुष्पमिव जन्माबन्ध्यं वेदितव्यं । बाह्यप्रत्ययसिद्धितः परसंतानपरिपाकात् फलभूतः सत्वपरिपाको वेदितव्यः । करुणानुशंसे श्लोकः ।

कः कुर्वीत न करुणां सत्वेषु महाकृपागुणकरेषु ।
दुःखेऽपि सौख्यमतुलं भवति यदेषां कृपाजनितं ॥ ४१ ॥

अत्र महाकरुणागुण उत्तरार्धेन संदर्शितः । शेषो गतार्थः । करुणानिःसङ्गतायां श्लोकः ।

आविष्टानां कृपया न तिष्ठति मनः शमे कृपालूनां ।
कुत एव लोकसौख्ये स्वजीविते वा भवेत्स्नेहः ॥ ४२ ॥

सर्वस्य हि लोकस्य लौकिके सौख्ये स्वजीविते च स्नेहः । तत्रापि च निःस्नेहानां श्रावकप्रत्येकबुद्धानां सर्वदुःखोपशमे निर्वाणे प्रतिष्ठितं मनः । बोधि-

(1) Ms. : करुणात्तये°.



सत्वानां तु करुणाविष्टत्वान्निर्वाणेऽपि मनो न प्रतिष्ठितं । कुत एव तयोः स्नेहो भविष्यति । करुणास्नेहवैशेष्ये त्रयः श्लोकाः ।

स्नेहो न विद्यतेऽसौ योऽनिरवद्यो न लौकिको यश्च ।
धीमत्सु कृपास्नेहो निरवद्यो लोकसमतीतः ॥ ४३ ॥

मातापितृप्रभृतीनां हि तृष्णामयः स्नेहः सावद्यः । लौकिककरुणाविहारिणां निरवद्योऽपि लौकिकः । बोधिसत्वानां तु करुणामयः स्नेहो निरवद्यश्च लौकिकातिक्रान्तश्च । कथं च पुनर्निरवद्य इत्याह ।

दुःखाज्ञानमहौघे महान्धकारे च निश्रितं लोकं ।
उद्धर्तुं य उपायः कथमिव न स्यात्स निरवद्यः ॥ ४४ ॥

दुःखमहौघ अज्ञानमहान्धकारे चेति योज्यं । शेषं गतार्थं । कथं लोकातिक्रान्त इत्याह ।

स्नेहो न सोऽस्त्यरिहतां[1] लोके प्रत्येकबोधिबुद्धानां ।
प्रागेव तदन्येषां कथमिव लोकोत्तरो न स्यात् ॥ ४५ ॥

प्रत्येकां बोधिं बुद्धाः । शेषं गतार्थं । त्रासाभिनन्दननिमित्तत्वे श्लोकः ।

दुःखाभावे दुःखं यत्कृपया भवति बोधिसत्वानां ।
संत्रासयति तदादौ स्पृष्टं त्वभिनन्दयति गाढं ॥ ४६ ॥

दुःखाभावे इति दुःखाभावो निमित्तं । सत्वेषु करुणया बोधिसत्वानां यद् दुःखमुत्पद्यते तदादौ संत्रासयति अधिमुक्तिचर्याभूमौ । आत्मपरसमतया दुःखस्य यथाभूतमस्पृष्टत्वात् । स्पृष्टं तु शुद्धाध्याशयभूमावभिनन्दयत्येवेत्यर्थः । करुणादुःखेन सुखाभिभवे श्लोकः ।

किमतः परमाश्चर्यं यद् दुःखं सौख्यमभिभवति सर्वं ।
कृपया जनितं लौक्यं येन विमुक्ता अपि कृतार्थः ॥ ४७ ॥

नास्त्यत आश्चर्यतरं यद् दुःखमेव करुणाजनितं बोधिसत्वानां तथा सुखं

(1) *Arihat*, mot nouveau, déformation scolastique par étymologie fantaisiste du mot *arhat*.

भवति । यत्सर्वं लौकिकं सुखमभिभवति । येन सुखेन विमुक्ता अर्हन्तो ऽपि कृतार्थाः प्रागेवान्ये । कृपाकृतदानानुशंसे श्लोकः ।

कृपया सहितं दानं यद्दानसुखं करोति धीराणां ।
त्रैधातुकमुपभोगैर्न तत्सुखं तत्कलां स्पृशति ॥ ४८ ॥

यच्च त्रैधातुकं सुखमुपभोगैः कृतं न तत्सुखं तस्य सुखस्य कलां स्पृशतीत्ययमुत्तरार्धस्यार्थः । शेषं गतार्थं । कृपया दुःखाभ्युपगमे श्लोकः ।

दुःखमयं संसारं यत्कृपया न त्यजति सत्वार्थं ।
परहितहेतोर्दुःखं किं कारुणिकैर्न समुपेतं ॥ ४९ ॥

सर्वं हि दुःखं संसारदुःखे ऽन्तर्भूतं । तस्याभ्युपगमात् सर्वं दुःखमभ्युपगतं भवति । तत्र तत्फलवृद्धौ श्लोकः ।

करुणा दानं भोगाः सदा कृपालोर्विवृद्धिमुपयान्ति ।
स्नेहानुग्रहजनितं तच्छक्तिकृतं सुखं चास्मात् ॥ ५० ॥

त्रयं बोधिसत्वानां सर्वजन्मसु वर्धते करुणायोगात् । करुणा तदभ्यासात् । दानं करुणावशात् । भोगाश्च दानवशात् । तस्माच्च त्रयात्फलं त्रिविधं सुखं भवति । स्नेहजनितं करुणातः । सत्वानुग्रहजनितं दानात् । तदनुग्रहक्रियाशक्तिकृतं भोगेभ्यः । दानप्रोत्साहनायां श्लोकः ।

वर्धे च वर्धयामि च दाने परिपाचयामि सुखयामि ।
आकर्षामि नयामि च करुणा सन्नान्प्रवदतीव ॥ ५१ ॥

दाने सन्नानिति संबन्धनीयं । षड्भिर्गुणैर्दाने ऽवसन्नान् बोधिसत्वान्करुणा प्रोत्सहयतीव । स्वभाववृद्ध्या । भोगैस्तद्वर्धनया[1] । दानेन सत्वपरिपाचनया । दातुश्च सुखोत्पादनात् । महाबोधिसंभारस्यान्यस्याकर्षणात् । महाबोधिसमीपनयनाच्च । परसौख्येन सुखाभवे श्लोकः ।

दुःखे दुःखी कृपया सुखान्यनाधाय केन सुखितः स्यात् ।
सुखयत्यात्मानमतः कृपालुराधाय परसौख्यं ॥ ५२ ॥

करुणया बोधिसत्वः परदुःखैर्दुःखितः सत्वेष्वनाधाय सुखं कथं सुखितः

(1) *Vardhanā*, mot nouveau, équivalent de *vardhanam*.



स्यात् । तस्मात्परेषु सुखमाधाय बोधिसत्व आत्मानमेव सुखयतीति वेदितव्यं । कृपया दानसमनुशास्तौ षट् श्लोकाः ।

स्वं दानं कारुणिकः शास्तीव सदैव निःस्वसुखकामः ।
भोगैः सुखय परं वा मामप्ययुतसौख्यं ॥ ५३ ॥[1]

न हि कारुणिकस्य विना परसुखेनास्ति सुखं । तस्यायुतसौख्यत्वाद्बोधिसत्वस्तेन विना नो दानस्य फलं सुखं नेच्छति ।

सफलं दानं दत्तं तन्मे सत्वेषु तत्सुखसुखेन ।
फल तेष्वेव निकामं यदि मे कर्तव्यता ते ऽस्ति ॥ ५४ ॥

दानं ददता दानं च दानफलं च तन्मया सत्वेषु दत्तं । तत्सुखमेव मे सुखं यस्मात् । अतस्तेष्वेव यावत्फलितव्यं तावत्फलेति लोट् । बोधिसत्वः करुणया दानमनुशास्ति ।

भोगद्वेष्टुर्दातुर्भोगा बहुशुभतरोपसर्पन्ति ।
न हि तत्सुखं मतं मे दाने पारंपरो ऽस्मि यतः ॥ ५५ ॥

भोगविमुखस्य दातुर्भोगा बहुतराश्चोपतिष्ठन्ते । शोभनतराश्च । धर्मतैवेयं चित्तस्योदारतरत्वात् । न हि तत्सुखं मतं मे यद् भोगास्तथोपतिष्ठन्ते । यस्मादहं दाने पारंपरस्तत्प्रबन्धकामत्वान्न सुखे ।

सर्वास्तिपरित्यागे यत्कृपया मां निरीक्षसे सततं ।
ननु ते तेन ज्ञेयं न मत्फलेनार्थिता ऽस्येति ॥ ५६ ॥

यो ऽहं दानफलं सर्वमेव करुणया नित्यं परित्यजामि नन्वत एव वेदितव्यं नास्ति मे दानफलेनार्थित्वमिति बोधिसत्वो दानं समनुशास्ति ।

दानाभिरतो न स्यां प्राप्तं चेत्तत्फलं न विसृजेयं ।

तथा हि ।

क्षणमपि दानेन विना दानाभिरतो भवति नैव ॥ ५७ ॥

इति गतार्थः श्लोकः ।

अकृतं न फलसि यस्मात्प्रतिकारापेक्षया न मे तुल्यं ।

(1) Āryā défective. Il manque quatre mores à la seconde moitié.



IMPRIMERIE NATIONALE.

यस्त्वा करोति तस्य त्वं फलसि । तस्मात्त्वं प्रतिकारापेक्षया न मत्तुल्यं । तथा ह्यहं ।

प्रतिकारनिर्व्यपेक्षः परत्र फलदो ऽस्य कामं ते ॥ ५८ ॥

गतार्थमेतत् । कृपादाने द्वौ श्लोकौ ।

निरवद्यं शुद्धपदं हितावहं चैव सानुरक्षं[1] च ।
निर्मृग्यं[2] निर्लेपं जिनात्मजानां कृपादानं ॥ ५९ ॥

तत्र निरवद्यं परमनुपहत्य दानात् । शुद्धपदं कल्पिकवस्तुदानात् । विषशस्त्रमद्यादिविवर्जनतः । हितावहं दानेन संगृह्य कुशले नियोजनात् । सानुरक्षं परिजनस्याविघातं कृत्वा अन्यस्मै दानात् । निर्मृग्यमयाचमाने ऽप्यर्थित्वं विघातं वावगम्य स्वयमेव दानात् दक्षिणीयापरिमार्गणाच्च । निर्लेपं प्रतिकारविपाकनिःस्पृहत्वात् । अपरः प्रकारः ।

सकलं विपुलं श्रेष्ठं सततं मुदितं निरामिषं शुद्धं ।
बोधिनतं कुशलनतं जिनात्मजानां कृपादानं ॥ ६० ॥

तत्र सकलमाध्यात्मिकबाह्यवस्तुदानात् । विपुलं प्रभूतवस्तुदानात् । श्रेष्ठं प्रणीतवस्तुदानात् । सततमभीक्ष्णदानात् । मुदितमप्रतिसंख्याय प्रहृष्टदानात् । निरामिषं यथा निर्लेपं । शुद्धं यथा शुद्धपदं । बोधिनतं महाबोधिपरिणामनात् । कुशलनतं यथा हितावहं । उपभोगविशेषे श्लोकः ।

न तथोपभोगतुष्टिं लभते भोगी यथा परित्यागात् ।
तुष्टिमुपैति कृपालुः सुखत्रयाप्यायितमनस्कः ॥ ६१ ॥

तत्र सुखत्रयं दानप्रीतिः परानुग्रहप्रीतिः बोधिसंभारसंभरणप्रीतिश्च । शेषं गतार्थं । पारमिताभिनिर्हारकरुणायां श्लोकः ।

कृपणकृपा रौद्रकृपा संक्षुब्धकृपा कृपा प्रमत्तेषु ।
विषयपरतन्त्रकरुणा मिथ्याभिनिविष्टकरुणा च ॥ ६२ ॥

तत्र कृपणा मत्सरिणः । रौद्रा दुःशीलाः परोपतापिनः । संक्षुब्धाः

[1] *Sānurakṣa*, mot nouveau. Le chinois dit : *tse liang*, «à sa mesure».

[2] *Nirmṛgya*, mot nouveau. Le chinois dit : *wou-k'iu*, «sans désir».



क्रोधनाः । प्रमत्ताः कुशीदाः । विषयपरतन्त्राः कामेषु विक्षिप्तचित्ताः । मिथ्याभिनिविष्टाः दुःप्रज्ञाः तीर्थिकादयः । एषु पारमिताविपक्षधर्मावस्थितेषु या करुणा सा कृपणादिकरुणा । सा च तद्विपक्षविदूषणात्पारमिताभिनिर्हाराय संपद्यते । तस्मात्पारमिताभिनिर्हारकरुणेत्युच्यते । करुणाप्रत्ययसंदर्शने श्लोकः ।

करुणा बोधिसत्वानां सुखाद् दुःखात्तदन्वयात् ।
करुणा बोधिसत्वानां हेतोर्मित्रात्स्वभावतः ॥ ६३ ॥[1]

तत्र पूर्वार्धेनालम्बनप्रत्ययं करुणायाः संदर्शयति । त्रिविधां वेदनामालम्ब्य तिसृभिर्दुःखताभिः करुणायनात् । अदुःखासुखा हि वेदना सुखदुःखयोरन्वयः पुनस्तदावाहनात् । उत्तरार्धेन यथाक्रमं हेतुमित्रस्वभावैः करुणाया हेत्वधिपतिसमनन्तरप्रत्ययान्संदर्शयति । महाकरुणत्वे श्लोकः ।

करुणा बोधिसत्वानां समा ज्ञेया तदाशयात् ।
प्रतिपत्तेर्विरागाच्च नोपलम्भाद्विशुद्धितः ॥ ६४ ॥

तत्र समा त्रिविधवेदनावस्थेषु यत्किंचिद्वेदितमिदमत्र दुःखस्येति विदित्वा । सा पुनराशयतो ऽपि चित्तेन करुणायनात् । प्रतिपत्तितो ऽपि तत्परित्राणात् । विरागतो ऽपि तद्विपक्षविहिंसाप्रहाणात् । अनुपलम्भतो ऽप्यात्मपरकरुणानुपलम्भात् । विशुद्धितो ऽप्यष्टम्यां भूमावनुत्पत्तिकधर्मक्षान्तिलाभात् ।

मैत्रादिभावनाग्रा स्वचित्ततो धर्मतो ऽधिमोक्षाच्च ।
आशयतो ऽपि विभुत्वादविकल्पादैक्यतश्चापि ॥ ६५ ॥[2]

इति । पूर्वनिर्देशानुसारेणार्थो ऽनुगन्तव्यः ।

इति भगवति जातसुप्रसादो महदुपधिध्रुवसत्क्रियाभिपूजी ।
बहुगुणहितमित्रनित्यसेवो जगदनुकम्पक एति सर्वसिद्धिं ॥ ६६ ॥[3]

एतेन यथोक्तानां पूजासेवाऽप्रमाणानामनुक्रमं गुणं च समासेन संदर्शयति । महोपधिभिर्ध्रुवं सत्क्रिया चात्यर्थं पूजनान्महदुपधिध्रुवसत्क्रियाभिपूजी वेदितव्यः । सत्क्रिया पुनः सम्यक्प्रतिपत्तिर्वेदितव्या । एवं सत्कारप्रतिपत्तिपूजी

[1] Mètre anuṣṭubh jusqu'au vers 64.

[2] Mètre āryā.

[3] Mètre puṣpitāgrā.

भवति। बहुगुणं मित्रं तदन्यैर्गुणैः । हितमनुकम्पकत्वेन वेदितव्यं । एति सर्वसिद्धिमिति स्वपरार्थसिद्धिं प्राप्नोतीति ।

महायानसूत्रालंकारे पूजासेवाऽप्रमाणाधिकारः समाप्तः

# XVIII

लज्जाविभागे षोडश श्लोकाः ।

लज्जा विपक्षहीना ज्ञानेन गता च निर्विकल्पेन ।
हीनानवद्यविषया सत्वानां पाचिका धीरे ॥ १ ॥[1]

एतेन स्वभावसहायालम्बनकर्मसंपदा चतुर्विधं लक्षणं बोधिसत्वलज्जायाः संदर्शितं। हीनानवद्यविषया। श्रावकप्रत्येकबुद्धानां। तद्विहीनं च महायानादनवद्यं च । तेन च बोधिसत्वो लज्जते । कथं सत्वानां पाचिका । तस्यामेव लज्जापारमिताविपक्षवृद्ध्या तत्प्रतिपक्षपरिहाण्या चात्यर्थं लज्जोत्पादनात्।

षण्णां पारमितानां निषेवणालस्यतो भवति लज्जा ।
क्लेशानुकूलधर्मप्रयोगतश्चैव धीराणां ॥ २ ॥

इयमप्रयोगलज्जा पारमिताभावनायामप्रयोगेन । क्लेशानुकूलेषु धर्मेष्विन्द्रियागुप्तद्वारत्वादिषु च प्रयोगेन लज्जोत्पादनात्।

असमाहितस्वभावा मृदुमध्या हीनभूमिका लज्जा ।
हीनाश्रया समाना हीना हि तदन्यथा त्वधिका ॥ ३ ॥

इयं मृद्वधिमात्रा लज्जा। पूर्वनिर्देशानुसारेणास्य श्लोकस्यार्थो ऽनुगन्तव्यः। अतः परं चतुर्भिस्त्रिभिश्च श्लोकैर्यथाक्रमं लज्जाविपक्षे लज्जायां च दोषगुणभेदं दर्शयति।

लज्जारहितो धीमान् क्लेशानधिवासयत्ययोनिशतः[2] ।
प्रतिघोपेक्षामानः सत्वानुपहन्ति शीलं च ॥ ४ ॥

[1] Mètre āryā jusqu'au vers 15. — [2] *Ayoniçatas*, mot nouveau; formation incorrecte glosée dans le commentaire par *ayoniçomanaskāreṇa*.



इत्यत्र आत्मव्याबाधाय चेतयते परव्याबाधायोभयव्याबाधाय चेति संदर्शितं । अयोनिशत इत्ययोनिशो मनस्कारेण । कथमुपेक्षया सत्वानुपहन्ति । सत्वार्थप्रमादतः ।

कौकृत्यात्सविलेखो भवति स संमानहानिमाप्नोति ।
आद्यात्मानुषसंघाच्छास्त्रा चोपेक्ष्यते तस्मात् ॥ ५ ॥
सहधार्मिकैर्जिनसुतैर्विनिन्द्यते लोकतो ऽयशो लभते ।
दृष्टे धर्मे

इत्यनेन दृष्टधार्मिकमवद्यं प्रसवतीति दर्शितं । यथाक्रममात्मपरदेवताशास्तृभिरपवदनात्। विज्ञैः सब्रह्मचारिभिर्धर्मतया विगर्हणात्। दिग्विदिक्षु च पापकावर्णनिश्चरणात्।

ऽन्यत्र क्षणरहितो जायते भूयः ॥ ६ ॥

इत्यनेन सांपरायिकमवद्यं प्रसवतीति संदर्शितमक्षणेषूपपत्तेः।

प्राप्ताप्राप्तविहानिं शुक्लैर्धर्मैः समाप्नुते तेन।

इत्यनेन दृष्टधर्मसांपरायिकमवद्यं प्रसवतीति संदर्शितं । प्राप्तकुशलधर्मपरिहाणितः। अप्राप्तपरिहाणितश्च यथाक्रमं।

दुःखं विहरति तस्मान्मनसो ऽप्यस्वस्थतामेति ॥ ७ ॥

इत्यनेन तज्जं चैतसिकं दुःखं दौर्मनस्यं प्रतिसंवेदयत इति संदर्शितं।

एते सर्वे दोषा ह्रीमत्सु भवन्ति नो जिनसुतेषु।

इत्यत उपादाय लज्जागुणो वेदितव्यः। यदेते च दोषा न भवन्ति।

देवेषु च मनुजेषु च नित्यं संजायते च बुधः ॥ ८ ॥

इत्येतदस्य विपाकफलं भवति।

संभारांश्च स बोधेः क्षिप्रं पूरयति लज्जया धीमान्।

इत्येतदधिपतिफलं।

सत्वानां पाचनया न खिद्यते चैव जिनपुत्रः ॥ ९ ॥

इत्येतत्पुरुषकारफलं ।

स विपक्षप्रतिपक्षै रहितो ऽरहितश्च जायते सततं ।

इत्येते विसंयोगनिष्यन्दफले । यदुत विपक्षरहितत्वं प्रतिपक्षारहितत्वं च ।

इत्येतमानुशंसं[1] ह्रीमानाप्नोति जिनपुत्रः ॥ १० ॥

इति यथोक्तदोषाभावं गुणयोगं च प्राप्नोतीति संदर्शितं ।

दोषमलिनो हि बालो ह्रीविरहात्सुवसनैः सुगुप्तो ऽपि ।
निर्वसनो ऽपि जिनसुतो ह्रीवसनो मुक्तदोषमलः ॥ ११ ॥

एतेन वस्त्रविशेषणं ह्रियः । तदन्यवस्त्रप्रावृतस्यापि ह्रीरहितस्य दोषमलिनत्वात् । नग्नस्यापि च ह्रीमतो निर्मलत्वात् ।

आकाशमिव न लिप्तो ह्रीयुक्तो जिनसुतो भवति धर्मैः ।

धर्मैरिति लोकधर्मैः ।

ह्रीभूषितश्च शोभति संपर्कगतो जिनसुतानां ॥ १२ ॥

एतेन श्लोकेन ह्रिय आकाशभूषणसमतां दर्शयति ।

मातुरिव वत्सलत्वं ह्रियो विनेयेषु बोधिसत्वानां ।

त्रातव्यसत्वोपेक्षाया लज्जनात् ।

आरक्षा चापि ह्रीः संसरतां सर्वदोषेभ्यः ॥ १३ ॥

हस्त्यश्वकायादिभूतत्वात् । एभिर्वस्त्रादिदृष्टान्तैर्विहारे क्लेशप्रतिपक्षतां चारे लोकधर्मप्रतिपक्षतां । सहधार्मिकसंवासानुकूलतां । सत्वपरिपाकानुकूलतां । अक्लिष्टसंसारानुकूलतां च ह्रियो दर्शयति ।

सर्वेषु नाधिवासा सर्वेष्वधिवासनाप्रवृत्तिश्च ।
सर्वेषु च प्रवृत्तिर्ह्रीविहितं ह्रीमतो लिङ्गं ॥ १४ ॥

(1) *Ānuçaṃsa*. Cf. Çikṣā-samuccaya, Index II, s. v.



एतेन चतुर्विधं ह्रीकृतं लिङ्गं ह्रीमतो दर्शयति । यदुत सर्वदोषेष्वनधिवासना चाप्रवृत्तिश्च । सर्वगुणेष्वधिवासना च प्रवृत्तिश्च ।

ह्रीभावना प्रधाना स्वचित्ततो धर्मतो ऽधिमोक्षाच्च ।
आशयतो ऽपि विभुत्वादकल्पनादैक्यतश्चापि ॥ १५ ॥

इत्यस्य निर्देशो यथापूर्वं । धृतिविभागे सप्त श्लोकाः ।

धृतिश्च बोधिसत्वानां लक्षणेन प्रभेदतः ।
दृढत्वेन च सर्वेभ्यस्तदन्येभ्यो विशिष्यते ॥ १६ ॥[1]
वीर्यं समाधिः प्रज्ञा च सत्वं धैर्यं धृतिर्मता ।
निर्भीतो बोधिसत्वो हि त्रयाद्यस्मात्प्रवर्तते ॥ १७ ॥

एतेन धृतिलक्षणं सपर्यायं ससाधनं चोक्तं । वीर्यादिकं लक्षणं सत्वादिकं पर्यायः । शेषं साधनं । कतमस्मात्त्रयान्निर्भीतः प्रवर्तत इत्याह ।

लीनत्वाच्च चलत्वाच्च मोहाच्चोत्पद्यते भयं ।
कृत्येषु तस्माद्विज्ञेया धृतिसंज्ञा निजे त्रये ॥ १८ ॥

सर्वकार्येषु हि लीनचित्ततया वा भयमुत्पद्यते तदनुत्साहतः । चलचित्ततया वा चित्तानवस्थानतः । संमोहतो वा तदुपायाज्ञानतः । तत्प्रतिपक्षाश्च यथाक्रमं वीर्यादयः । तस्मान्निजवीर्यादित्रये धृतिसंज्ञा वेदितव्या निज इत्यप्रतिसंख्यानकरणीये ।

प्रकृत्या प्रणिधाने च निरपेक्षत्व एव च ।
सत्वविप्रतिपत्तौ च गम्भीर्यौदार्यसंश्रवे ॥ १९ ॥
विनेयदुर्विनयत्वे कायाचिन्त्ये जिनस्य च ।
दुष्करेषु विचित्रेषु संसारात्याग एव च ॥ २० ॥
निःसंक्लेशे च तत्रैव धृतिर्धीरस्य जायते ।
असमा च तदन्येभ्यः सो ऽग्रे धृतिमतां यतः ॥ २१ ॥

एभिस्त्रिभिः श्लोकैर्धृतिप्रभेदं दर्शयति । यथाक्रमं गोत्रतः । चित्तोत्पादतः । स्वार्थतः । सत्वार्थतः । प्रभावतः । सत्वपरिपाचनतः । परमबोधितश्च । तत्र

(1) Mètre anuṣṭubh jusqu'au vers 104.

निरपेचत्वं स्वार्थप्रयुक्तस्य कायजीवितनिरपेचत्वाद्वेदितव्यं। पुनर्दुष्करचर्यातः। संचिन्त्यभवोपपत्तितः। तदसंक्लेशतो ऽपि प्रभेदः।

कुमित्रदुःखगम्भीरश्रवाद्धीरो न कम्पते।
शलभैः पचवातैश्च समुद्रैश्च सुमेरुवत्॥ २२॥

एतेन बोधिसत्वधृतेर्दृढत्वं दर्शयति। उपमात्रयं त्रयेणाकम्पने यथाक्रमं वेदितव्यं। अखेदविभागे द्वौ श्लोकौ।

अखेदो बोधिसत्वानामसमस्त्रिषु वस्तुषु।
श्रुतातृप्तिमहावीर्यदुःखे ह्रीधृतिनिश्रितः॥ २३॥
तीव्रच्छन्दो महाबोधावखेदो धीमतां मतः।
अनिष्पन्नश्च निष्पन्नः सुनिष्पन्नश्च भूमिषु॥ २४॥

आभ्यां वस्तुतो निश्रयतः स्वभावतः प्रभेदतश्चाखेदो निर्दिष्टः। त्रिषु वस्तुषु। श्रुतातृप्तौ। दीर्घकालवीर्यारम्भे। संसारदुःखे च। ह्रियं धृतिं च निश्रित्य। ताभ्यां हि खेदोत्पत्तितो लज्जयते न चोत्पादयति। तीव्रच्छन्दो महाबोधाविति स्वभावः। छन्दे हि व्यावृत्ते खिन्नो भवति। अनिष्पन्नो ऽधिमुक्तिचर्याभूमौ। निष्पन्नः सप्तभूमिषु। सुनिष्पन्नः परेण इत्येष प्रभेदः। शास्त्रज्ञतायां द्वौ श्लोकौ।

वस्तुना चाधिकारेण कर्मणा च विशिष्यते।
लक्षणेनाक्षयत्वेन फलस्योदागमेन च॥ २५॥
शास्त्रज्ञता हि धीराणां समाधिमुखधारणी।
गृहीता सत्वपाकाय सद्धर्मस्य च धारणे॥ २६॥

तत्र शास्त्रज्ञतायाः पञ्च विद्यास्थानानि वस्तु। अध्यात्मविद्या हेतुविद्या शब्दविद्या चिकित्साविद्या शिल्पकर्मस्थानविद्या च। स्वपरार्थक्रिया अधिकारः। कर्म प्रथमवस्तुनि स्वयं प्रतिपत्तिः परेभ्यश्च तत्समाख्यानं। द्वितीये तद्दोषपरिज्ञानं परवादिनिग्रहश्च। तृतीये स्वयं सुनिरुक्ताभिधानं परसंप्रत्ययश्च। चतुर्थे परेषां व्याधिशमनं। पञ्चमे परेभ्यस्तत्संविभागः। लक्षणं शास्त्रज्ञताया एतान्येव पञ्च वस्तूनि श्रुतानि भवन्ति। धृतानि। वचसा परिजितानि। मनसा अन्वीक्षितानि। दृष्ट्या सुप्रतिविद्धानि। श्रुत्वा यथाक्रमं तदुद्ग्रहणतः। स्वाध्यायतः। प्रसन्नेन मनसार्थचिन्तनतो यथायोगं तद्दोषगुणावगमात् स्वाख्यातदुराख्यातावधारणतश्च। अक्षयत्वं निरुपधिशेषनिर्वाणे ऽप्यक्षयात्।



फलसमुदागमः सर्वधर्मसर्वाकारज्ञता। सा पुनरेषा शास्त्रज्ञता बोधिसत्वानां समाधिमुखैर्धारणीमुखैश्च संगृहीता। सत्वपरिपाकाय च भवति। समाधिमुखैस्तत्कृत्यानुष्ठानात्। सद्धर्मपारणाय च धारणीभिस्तद्धारणात्। लोकज्ञतायां चत्वारः श्लोकाः।

कायेन वचसा चैव सत्यज्ञानेन चासमा।
लोकज्ञता हि धीराणां तदन्येभ्यो विशिष्यते॥ २७॥

कथं कायेनेत्याह।

कृतस्मितमुखा नित्यं।

कथं वाचेत्याह।

धीराः पूर्वाभिभाषिणः।

सा पुनः किमर्थमित्याह।

सत्वानां भाजनत्वाय।

कस्मिन्नर्थे भाजनत्वाय।

सद्धर्मप्रतिपत्तये॥ २८॥

कथं सत्यज्ञानेनेत्याह।

सत्यद्वयाद्यतश्चेष्टो लोकानामुदयो ऽसकृत्।
द्वयादस्तंगमस्तस्मात् तज्ज्ञो लोकज्ञ उच्यते॥ २९॥

द्वाभ्यां सत्याभ्यां लोकस्योदयः पुनः पुनः संसारो यश्चोदयो येन चेति कृत्वा। द्वाभ्यामस्तंगमो निरोधमार्गसत्याभ्यां। यश्चास्तंगमो येन चेति कृत्वा। तस्मात्तज्ज्ञो लोकज्ञ उच्यते। लोकस्योदयास्तंगामिन्या प्रज्ञया समन्वागतत्वात्।

शमाय प्राप्तये तेषां धीमान् सत्येषु युज्यते।
सत्यज्ञानाद्यतो धीमान् लोकज्ञो हि निरुच्यते॥ ३०॥

अनेन लोकज्ञतायाः कर्म निर्दिष्टं । तत्र शमाय दुःखसमुदयसत्ययोः प्राप्तये निरोधमार्गसत्ययोः । प्रतिसरणविभागे त्रयः श्लोकाः ।

आर्षस्य देशनाधर्मो अर्थो ऽभिप्रायिको[(1)] ऽस्य च ।
प्रामाणिकस्य नीतार्थो निर्जल्पा[(2)] प्राप्तिरस्य च ॥ ३१ ॥

इदं प्रतिसरणानां लक्षणं । तत्र प्रामाणिको ऽर्थो यः प्रमाणभूतेन नीतो विभक्तः शास्त्रा वा तत्प्रमाणीकृतेन वा । निर्जल्पा प्राप्तिरधिगमज्ञानं लोकोत्तरं । तस्यानभिलाप्यत्वात् । शेषं गतार्थं ।

प्रतिक्षेप्तुर्यथोक्तस्य मिथ्यासंतीरितस्य[(3)] च ।
साभिलाषस्य च प्राप्तेः प्रतिषेधोऽत्र देशितः ॥ ३२ ॥

प्रथमे प्रतिसरणे आर्षधर्मप्रतिक्षेप्तुः पुद्गलस्य प्रतिषेधो देशितः । द्वितीये यथारुतार्थस्य व्यञ्जनस्य नाभिप्रायिकार्थेन । तृतीये मिथ्या चिन्तितार्थस्य विपरीतं नीयमानस्य । चतुर्थे साभिलाषस्य ज्ञानस्य । प्रत्यात्मवेदनीयस्य ।

अधिमुक्तेर्विचाराच्च यथावत्परतः श्रवात् ।
निर्जल्पादपि च ज्ञानादप्रणाशो हि धीमतां ॥ ३३ ॥

अयं प्रतिसरणानुशंसः । प्रथमेन प्रतिसरणेनार्षधर्माधिमुक्तितो न प्रणश्यति । द्वितीयेन स्वयमाभिप्रायिकार्थविचारणात् । तृतीयेन परतस्तदविपरीतार्थनयश्रवात् । चतुर्थेन लोकोत्तरज्ञानात् । प्रतिसंविद्विभागे चत्वारः श्लोकाः ।

असमा बोधिसत्वानां चतस्रः प्रतिसंविदः ।
पर्याये लक्षणे वाक्ये ज्ञाने ज्ञानाच्च ता मताः ॥ ३४ ॥

प्रथमा पर्याये ज्ञानमेकैकस्यार्थस्य यावन्तो नामपर्यायाः । द्वितीया

(1) *Abhiprāyika* se trouve déjà I, 15, commentaire; mais cette forme nouvelle est garantie ici par le mètre. Le commentaire sur le vers 33 rétablit la forme régulière *ābhiprāyika*.

(2) *Nirjalpa*, mot nouveau; le chinois dit : *wou yen*, «sans parole».

(3) *Saṃtīrita* (la lecture n'est pas douteuse), mot nouveau; tiré peut-être de *tīray°*, «mener à bout» (?). Le chinois donne, dans le vers comme dans le commentaire, le mot *se* = *cintita*.



लक्षणे यस्यार्थस्य तन्नाम । तृतीया वाक्ये प्रत्येकं जनपदेषु या भाषाः । चतुर्था ज्ञाने स्वयं यत्प्रतिभानं । इदं प्रतिसंविदां लक्षणं ।

देशनायां प्रयुक्तस्य यस्य येन च देशना ।
धर्मार्थयोर्द्वयोर्वाचा ज्ञानेनैव च देशना ॥ ३५ ॥
धर्मस्योद्देशनिर्देशात्सर्वथा प्रापणाद् द्वयोः ।
परिज्ञानाच्च चोद्यानां प्रतिसंविच्चतुष्टयं ॥ ३६ ॥

इति चतुष्टे कारणं । देशनायां हि प्रयुक्तस्य यस्य च देशना येन च । तत्र ज्ञानेन प्रयोजनं । कस्य पुनर्देशना । धर्मस्यार्थस्य । केन देशना वचनेन ज्ञानेन च । तत्र धर्मार्थयोर्देशना । धर्मस्योद्देशनिर्देशात् । वाक्येन देशना तयोरेव द्वयोः सर्वथा प्रापणात् । ज्ञानेन देशना चोद्यानां परिहरणात् । अतो यच्च येन च देश्यते तज्ज्ञानात् चतस्रः प्रतिसंविदो व्यवस्थापिताः ।

प्रत्यात्मं समतामेत्य योत्तरत्र प्रवेदना[(1)] ।
सर्वसंशयनाशाय प्रतिसंविन्निरुच्यते ॥ ३७ ॥

एतेन प्रतिसंविदां निर्वचनं कर्म च दर्शितं । प्रत्यात्मं लोकोत्तरेण ज्ञानेन सर्वधर्मसमतां तथतामवेत्य उत्तरकालं तत्पृष्ठलब्धेन ज्ञानेन प्रवेदना पर्यायादीनां प्रतिसंविदिति निर्वचनं । सर्वसंशयनाशाय परेषामिति कर्म । संभारविभागे चत्वारः श्लोकाः ।

संभारो बोधिसत्वानां पुण्यज्ञानमयो ऽसमः ।
संसारेऽभ्युदयायैकः अन्यो ऽसंक्लिष्टसंसृतौ ॥ ३८ ॥

यश्च संभारो यदर्थं च तत्संदर्शितं । द्विविधः संभारः । तत्र पुण्यसंभारः संसारेऽभ्युदयाय संवर्तते । ज्ञानसंभारो ऽसंक्लिष्टसंसरणाय ।

दानं शीलं च पुण्यस्य प्रज्ञा ज्ञानस्य संभृतिः ।
त्रयं चान्यद्द्वयस्यापि पञ्चापि ज्ञानसंभृतिः ॥ ३९ ॥

एतेन पारमिताभिस्तदुभयसंभारसंग्रहं दर्शयति । क्षान्तिवीर्यध्यानबलेन

(1) *Pravedanā*. Cf. supra XI, 10, comm. Le chinois traduit ici par *wei kio*, «faire connaître au dehors».

ह्युभयं क्रियते। तस्माद्द्वयसंभारस्त्रयं भवति। पुनः प्रज्ञायां परिणामनात्सर्वाः पञ्च पारमिता ज्ञानसंभारो वेदितव्यः।

संतत्या भावनामेत्य भूयो भूयः शुभस्य हि।
आहारो यः स संभारो वीरे सर्वार्थसाधकः ॥ ४० ॥

एतत्संभारनिर्वचनं कर्म च। समिति संतत्या। भा इति भावनामागम्य। र इति भूयो भूय आहारः। सर्वार्थसाधक इति कर्म। स्वपरार्थयोः साधनात्।

प्रवेशायानिमित्ताय अनाभोगाय संभृतिः।
अभिषेकाय निष्ठायै धीराणामुपचीयते ॥ ४१ ॥

अयं संभारप्रभेदः। तत्राधिमुक्तिचर्याभूमौ संभारो भूमिप्रवेशाय। षट्सु भूमिष्वनिमित्ताय सप्तमीभूमिसंगृहीताय। तस्यां निमित्तसमुदाचारात्। सप्तम्यां भूमावनाभोगाय तदन्यभूमिद्वयसंगृहीताय। तयोः संभाराभिषेकाय दशमीभूमिसंगृहीताय। तस्यां संभारो निष्ठागमनाय बुद्धभूमिसंगृहीताय। स्मृत्युपस्थानविभागे त्रयः श्लोकाः।

चतुर्दशभिराकारैः स्मृत्युपस्थानभावना।
धीमतामसमत्वात्सा तदन्येभ्यो विशिष्यते ॥ ४२ ॥

कतमैश्चतुर्दशभिः।

निश्रयात्प्रतिपक्षाच्च अवतारात्तथैव च।
आलम्बनमनस्कारप्राप्तितश्च विशिष्यते ॥ ४३ ॥
आनुकूल्यानुवृत्तिभ्यां परिज्ञोत्पत्तितोऽपरा।
मात्रया परमत्वेन भावनासमुदागमात् ॥ ४४ ॥

इत्येभिश्चतुर्दशभिराकारैर्बोधिसत्त्वानां स्मृत्युपस्थानभावना विशिष्यते। कथमाश्रयतो महायाने श्रुतचिन्ताभावनामयीं प्रज्ञामाश्रित्य। कथं प्रतिपक्षतः चतुर्विपर्यासप्रतिपक्षाणामप्यशुचिदुःखानित्यानात्मसंज्ञानां प्रतिपक्षत्वात्कायादिधर्मनैरात्म्यप्रवेशतः। कथमवतारतः। चतुर्भिः स्मृत्युपस्थानैर्यथाक्रमं दुःखसमुदयनिरोधमार्गसत्यावतारात्स्वयं परेषां चावतारणात्। यथोक्तं



मध्यान्तविभागे[1]। कथमालम्बनतः सर्वसत्त्वकायाद्यालम्बनात्। कथं मनस्कारतः कायाद्यनुपलम्भात्। कथं प्राप्तितः कायादीनां न विसंयोगाय नाविसंयोगाय। कथमानुकूल्यतः पारमितानुकूल्येन तद्विपक्षप्रतिपक्षत्वात्। कथमनुवृत्तितः लौकिकानां श्रावकप्रत्येकबुद्धानां चानुवृत्त्या तदुपसंहितस्मृत्युपस्थानभावनात्तेभ्यस्तदुपदेशार्थं। कथं परिज्ञातः कायस्य मायोपमत्वपरिज्ञया तथैवाभूतरूपसंप्रख्यानात्। वेदनायाः स्वप्नोपमत्वपरिज्ञया तथैव मिथ्यानुभवात्। चित्तस्य प्रकृतिप्रभास्वरत्वपरिज्ञया आकाशवत्। धर्माणामागन्तुकत्वपरिज्ञया आकाशागन्तुरजोधूमाभ्रनीहारोपक्लेशवत्। कथमुत्पत्तितः संचित्यभवोपपत्तौ चक्रवर्त्यादिभूतस्य विशिष्टकायवेदनादिसंपत्तौ तदसंक्लेशतः। कथं मात्रातः मृद्वा अपि स्मृत्युपस्थानभावनायास्तदन्येभ्योऽधिमात्रत्वात्। प्रकृतितीक्ष्णेन्द्रियतया। कथं परमत्वेन परिनिष्पन्नानामनाभोगमिश्रोपमिश्रभावनात्। कथं भावनातः अत्यन्तं तद्भावनात् निरुपधिशेषनिर्वाणेऽपि तदक्षयात्। कथं समुदागमतः। दशसु भूमिषु बुद्धत्वे च समुदागमात्। सम्यक्प्रहाणविभागे पञ्च श्लोकाः।

सम्यक्प्रहाणं धीराणामसमं सर्वदेहिभिः।
स्मृत्युपस्थानदोषाणां प्रतिपक्षेण भाव्यते ॥ ४५ ॥

यावत्यः स्मृत्युपस्थानभावना उक्ताः तद्विपक्षाणां दोषाणां प्रतिपक्षेण सम्यक्प्रहाणभावनेति समस्तं सम्यक्प्रहाणलक्षणं। प्रभेदेन पुनः।

संसारस्योपभोगे च त्यागे निवरणस्य च।
मनस्कारस्य च त्यागे प्रवेशे चैव भूमिषु ॥ ४६ ॥
अनिमित्तविहारे च लब्धौ व्याकरणस्य च।
सत्त्वानां परिपाके च अभिषेके च धीमतां ॥ ४७ ॥
क्षेत्रस्य च विशुद्ध्यर्थं निष्ठागमन एव च।
भाव्यते बोधिसत्त्वानां विपक्षप्रतिपक्षतः ॥ ४८ ॥

अयं सम्यक्प्रहाणभावनाप्रभेदः। संसारस्यासंक्लिष्टपरिभोगे संपत्तिषु। पञ्चनिवारणत्यागे। श्रावकप्रत्येकबुद्धमनस्कारत्यागे। भूमिप्रवेशे। अनिमित्तविहारे सप्तम्यां भूमौ। व्याकरणलाभे अष्टम्यां। सत्त्वानां परिपाचने नवम्यां। अभिषेके च दशम्यां। क्षेत्रविशुद्ध्यर्थं त्रये ऽपि। निष्ठागमने च बुद्धभूमौ। ये

[1] *Madhyānta vibhāga çāstra*, un des ouvrages d'Asaṅga. J'aurai l'occasion d'en parler dans l'introduction qui sera jointe à la traduction du texte.

च विपक्षास्तेषां प्रतिपक्षेण सम्यक्प्रहाणभावना वेदितव्या । अयमस्याः प्रभेदः ।

छन्दं निश्रित्य योगस्य भावना सनिमित्तिका।
सर्वसम्यक्प्रहाणेषु प्रतिपक्षो निरुच्यते ॥ ४९ ॥

एतेन छन्दं जनयति । व्यायच्छते वीर्यमारभते। चित्तं प्रगृह्णाति। सम्यक् प्रदधाति। इत्येषां पदानामर्थनिर्देशः । छन्दं हि निश्रित्य शमथविपश्यनाख्यं योगं भावयतीति व्यायच्छते। सा च भावना शमथप्रग्रहोपेक्षानिमित्तैः सह भाव्यते। तस्मात्सा सनिमित्तिका। कथं च पुनर्भाव्यते। यच्छमथप्रग्रहोपक्लेशयोर्लयौद्धत्ययोः प्रतिपक्षेण वीर्यमारभते । कथमारभते । चित्तं प्रगृह्णाति प्रदधाति च । शमथे समप्राप्ते चोपेक्षायां प्रदधाति । एषा योगभावना यथोक्तप्रभेदेषु सर्वसम्यक्प्रहाणेषु प्रतिपक्ष उच्यते । ऋद्धिपादविभागे पञ्च श्लोकाः ।

ऋद्धिपादाश्च चत्वारो धीराणामग्रलक्षणाः ।
सर्वार्थसिद्धौ जायन्ते आत्मनश्च परस्य च ॥ ५० ॥

सर्वार्थसिद्धिर्लौकिकी लोकोत्तरा च वेदितव्या। शेषं गतार्थं ।

निश्रयाच्च प्रभेदाच्च उपायादभिनिर्हृतेः ।
व्यवस्था ऋद्धिपादानां धीमतां सर्वथेष्यते ॥ ५१ ॥

अस्योद्देशस्य शेषो निर्देशः।

ध्यानपारमिमाश्रित्य प्रभेदो हि चतुर्विधः ।
उपायश्चाभिनिर्हारः षड्विधश्च विधीयते॥ ५२ ॥

ध्यानपारमिता निश्रयः प्रभेदश्चतुर्विधश्छन्दवीर्यचित्तमीमांसासमाधिभेदात्। उपायश्चतुर्विध एव। अभिनिर्हारः षड्विधः। चतुर्विध उपायः कतमः।

व्यावसायिक[1] एकश्च द्वितीयो ऽनुग्रहात्मकः ।
नैबन्धिकस्तृतीयश्च चतुर्थः प्रातिपक्षिकः ॥ ५३ ॥

[1] *Vyāvasāyika*, mot nouveau, adjectif dérivé de *vyavasāya*, «détermination».



अष्टानां प्रहाणसंस्काराणां छन्दो व्यायामः श्रद्धा व्यावसायिकः उपायः। श्रद्दधानस्यार्थिनो व्यायामात्। प्रश्रब्धिरनुग्राहकः। स्मृतिः संप्रजन्यं चौपनिबन्धकः । एकेन चित्तस्यालम्बनाविसारात् । द्वितीयेन विसारप्रज्ञानात् । चेतना चोपेक्षा च प्रातिपक्षिक उपायः । लयौद्धत्योपक्लेशयोः क्लेशानां च प्रतिपक्षत्वात्। षड्विधो ऽभिनिर्हारः कतमः।

दर्शनस्याववादस्य स्थितिविक्रीडितस्य च।
प्रणिधेर्वशितायाश्च धर्मप्राप्तेश्च निर्हृतिः ॥ ५४ ॥

तत्र दर्शनं चक्षुः पञ्चविधं मांसचक्षुः दिव्यं चक्षुः आर्यं प्रज्ञाचक्षुः धर्मचक्षुः बुद्धचक्षुश्च । अववादः षडभिज्ञा यथाक्रमं । ताभिरुपसंक्रम्य भाषां चित्तं चागतिं च गतिं च विदित्वा निःसरणायाववदनात् । स्थितिविक्रीडितं यस्मात् बोधिसत्वानां बहुविधं निर्माणादिभिः समाधिविक्रीडितं । प्रणिधिर्येन प्रणिधिज्ञानेन प्रणिधानबलिका[1] बोधिसत्वाः प्रणिधानवैशेषिकतया विक्रीडन्ति। येषां न सुकरं संख्या कर्तुं कायस्य वा प्रभाया वा स्वरस्य वेति विस्तरेण यथा दशभूमिके सूत्रे[2]। वशिता यथा तत्रैव[3] दश वशिता निर्दिष्टाः। धर्मप्राप्तिर्बलवैशारद्यावेणिकबुद्धधर्माणां प्राप्तिः । इत्येष दर्शनादीनामभिनिर्हारः षड्विधः। इन्द्रियविभागे श्लोकः।

बोधिश्चर्या श्रुतं चात्र शमथो ऽथ विपश्यना।
श्रद्धादीनां पदं ज्ञेयमर्थसिद्ध्यधिकारतः ॥ ५५ ॥

श्रद्धेन्द्रियस्य बोधिः पदमालम्बनमित्यर्थः। वीर्येन्द्रियस्य बोधिसत्वचर्या । स्मृतीन्द्रियस्य महायानसंगृहीतं श्रुतं। समाधीन्द्रियस्य शमथः। प्रज्ञेन्द्रियस्य विपश्यना पदं। तदर्थाधिकारेणैव चैतानि श्रद्धादीनि आधिपत्यार्थेनेन्द्रियाण्युच्यन्ते। बलविभागे श्लोकः।

भूमिप्रवेशसंक्लिष्टाश्चेष्टाः श्रद्धादयः पुनः।
विपक्षदुर्बलत्वेन त एव बलसंज्ञिताः ॥ ५६ ॥

[1] *Sic* ms. Et aussi v. 76, comm. Dans les deux cas, le chinois traduit par *yi yuen li*, «par la force du vœu». Le mot *balika*, mot nouveau, serait alors dérivé de *bala*, «force».

[2] Le passage du Daçabhūmika-sūtra auquel Asaṅga renvoie ici est cité dans le Çikṣā-samuccaya, 291 à 295.

[3] Voir supra, p. 26, n. 1.

गतार्थः श्लोकः। बोध्यङ्गविभागे सप्त श्लोकाः।

भूमिविष्टस्य बोध्यङ्गव्यवस्थानं विधीयते।
धर्माणां सर्वसत्त्वानां समतावगमात्पुनः ॥ ५७ ॥

एतेन यस्यामवस्थायां यस्यावबोधात् बोध्यङ्गानि व्यवस्थाप्यन्ते तदुपदिष्टं। भूमिप्रविष्टावस्थायां सर्वधर्माणां सर्वसत्त्वानां च समतावबोधाद्यथाक्रमं धर्मनैरात्म्येनात्मपरसमतया च। अतः परं चक्रादिसप्तरत्नसाधर्म्यं बोध्यङ्गानां दर्शयति।

स्मृतिश्चरति सर्वत्र ज्ञेयाजितविनिर्जये।

अजितज्ञेयविनिर्जयाय। यथा चक्रवर्तिनश्चक्ररत्नमजितदेशविनिर्जयाय।

सर्वकल्पनिमित्तानां भङ्गाय विचयो ऽस्य च ॥ ५८ ॥

यथा हस्तिरत्नं प्रत्यर्थिकभङ्गाय।

आशु चाशेषबोधाय वीर्यमस्य प्रवर्तते।

क्षिप्राभिज्ञतोत्पादनात्। यथाश्वरत्नमाशु समुद्रपर्यन्तमहापृथिवीगमनाय।

धर्मालोकविवृद्ध्या च प्रीत्या आपूर्यते ध्रुवं ॥ ५९ ॥

आरब्धवीर्यस्य बोधिसत्त्वस्य धर्मालोका विवर्धन्ते। ततः प्रीतिः सर्वं कार्यं सदा प्रीणयति। यथा मणिरत्नमालोकविशेषेण चक्रवर्तिनं प्रीणयति।

सर्वावरणनिर्मोक्षात् प्रश्रब्ध्या सुखमेति च।

सर्वदौष्ठुल्यसमुत्पादनात्। यथा स्त्रीरत्नेन चक्रवर्ती सुखमनुभवति।

चिन्तितार्थसमृद्धिश्च समाधेरुपजायते ॥ ६० ॥

यथा चक्रवर्तिनो गृहपतिरत्नात्।

उपेक्षया यथाकामं सर्वत्र विहरत्यसौ।
पष्ठलब्ध्याविकल्पेन विकल्पेन सदोत्तमः ॥ ६१ ॥



उपेक्षोच्यते निर्विकल्पं ज्ञानं तया बोधिसत्त्वः सर्वत्र यथाकामं विहरति[1]। तत्पृष्ठलब्धेन च विहारेणान्यस्योपगमात्। अन्यस्यापगमात्। निर्विकल्पेन विहारेण तत्र निर्व्यापारतया[2] वासकल्पनात्। यथा चक्रवर्तिनः परिणायकरत्नं चतुरङ्गबलकायमुपनेतव्यं[3] चोपप्रणयति[4]। अपनेतव्यं चापनयति। तत्र च गत्वा वासं कल्पयति यत्राखिन्नः चतुरङ्गो बलकायः परैति।

एवंगुणो बोधिसत्त्वश्चक्रवर्तीव वर्तते।
सप्तरत्नोपमैर्नित्यं बोध्यङ्गैः[5] परिवारितः ॥ ६२ ॥

इति सप्तरत्नोपमत्वं बोध्यङ्गानां निगमयति।

निश्रयाङ्गं स्वभावाङ्गं निर्याणाङ्गं तृतीयकं।
चतुर्थमनुशंसाङ्गमक्लेशाङ्गं त्रयात्मकं ॥ ६३ ॥

एतेन यद्बोध्यङ्गं यथाङ्गं तदभिद्योतितं। स्मृतिर्निश्रयाङ्गं सर्वेषां तन्निश्रयेण प्रवृत्तेः। धर्मप्रविचयः स्वभावाङ्गं बोधेस्तत्स्वभावत्वात्। वीर्यं निर्याणाङ्गं तेनाप्राप्यनिष्ठायामधिष्ठानात्। प्रीतिरनुशंसाङ्गं चित्तसुखत्वात्। प्रश्रब्धिसमाध्युपेक्षा असंक्लेशाङ्गं। येन यन्निश्रित्य यो ऽसंक्लेश इति त्रिविधमसंक्लेशाङ्गं वेदितव्यं। मार्गाङ्गविभागे द्वौ श्लोकौ।

यथाबोधानुवृत्तिश्च तदूर्ध्वमुपजायते।
यथाबोधव्यवस्थानं प्रवेशश्च व्यवस्थितौ ॥ ६४ ॥
कर्मत्रयविशुद्धिश्च प्रतिपक्षस्य भावना।
ज्ञेयावृत्तेश्च मार्गस्य वैशेषिकगुणस्य च ॥ ६५ ॥

बोध्यङ्गकालादूर्ध्वं यथाभूतावबोधानुवृत्तिः सम्यग्दृष्टिः। तस्यैवावबोधस्य व्यवस्थानं परिच्छेदः सम्यक्संकल्पः। तद्व्यवस्थाने च सूत्रादिके भगवता कृते स एव प्रवेशस्तेन तदर्थावबोधात्। कर्मत्रयविशुद्धिः सम्यग्वाक्कर्मान्ताजीवाः। वाक्कायोभयकर्मसंग्रहात्। प्रतिपक्षस्य भावना सम्यग्व्यायामादयो यथाक्रमं ज्ञेयावरणस्य मार्गावरणस्य च वैशेषिकगुणावरणस्य च सम्यग्व्यायामेन दीर्घं

(1) Ms. : यथाकामं---ति.
(2) Ms. : निर्व्यारतया.
(3) Ms. : चतुर---कोपमु°.
(4) Ms. : चोपगणयति. Si la correction est exacte, le verbe *upapraṇayati* est un mot nouveau.
(5) Ex conj. Lacune dans le ms.



IMPRIMERIE NATIONALE.

हि कालं अखिद्यमानो ज्ञेयावरणस्य प्रतिपक्षं भावयति । सम्यक्स्मृत्या शमथप्रग्रहोपेक्षानिमित्तेषु लयौद्धत्याभावान्मार्गसंमुखीभावायावरणस्य प्रतिपक्षं भावयति । सम्यक्समाधिना वैशेषिकगुणाभिनिर्हारायावरणस्य प्रतिपक्षं भावयत्येवमष्टौ मार्गाङ्गानि व्यवस्थाप्यन्ते । शमथविपश्यनाविभागे त्रयः श्लोकाः ।

चित्तस्य चित्ते स्थानाच्च धर्मप्रविचयादपि ।
सम्यक्स्थितिमुपाश्रित्य शमथो ऽथ विपश्यना ॥ ६६ ॥

सम्यक्समाधिं निश्रित्य चित्ते चित्तस्यावस्थानात् । धर्माणां च प्रविचयाद्यथाक्रमं शमथो विपश्यना च वेदितव्या । न तु विना सम्यक्समाधिनेत्येतच्छमथविपश्यनालक्षणं ।

सर्वत्रगा च सैकांशा नैकांशोपनिषन्मता ।

सा च शमथविपश्यना सर्वत्रगा यं यं गुणमाकाङ्क्षति तत्र तत्र तद्भावनात् । यथोक्तं सूत्रे । आकाङ्क्षेच्चेद्भिक्षुरहो वताहं विविक्तं कामैरिति विस्तरेण यावत् तेन भिक्षुणा इमावेव द्वौ धर्मौ भावयितव्यौ । यदुत शमथश्च विपश्यना चेत्येवमादि । एकांशा शमथविपश्यना यदा शमथं भावयति । विपश्यनां वा । उभयांशा यदा युगपदुभयं भावयति । उपनिषत्संमता शमथविपश्यना बोधिसत्वानामधिमुक्तिचर्याभूमौ ।

प्रतिवेधे च निर्याणे अनिमित्ते ह्यसंस्कृते ॥ ६७ ॥
परिशुद्धौ विशुद्धौ च शमथो ऽथ विपश्यना ।
सर्वभूमिगता धीरे स योगः सर्वसाधकः ॥ ६८ ॥

इत्युपनिषन्मतेत्येवमादिना शमथविपश्यनायाः प्रभेदः कर्म च निर्दिष्टं । योग उपायो वेदितव्यः । तत्र प्रतिवेधः प्रथमभूमिप्रवेशः । निर्याणं यावत षष्ठी भूमिः । ताभिः सनिमित्तप्रयोगनिर्याणात् । अनिमित्तं सप्तमी भूमिः । असंस्कृतमन्यद्भूमित्रयमनभिसंस्कारवाहित्वात् । संस्कारो हि संस्कृतं तदत्र नास्तीत्यसंस्कृतं । तदेव च भूमित्रयं निश्रित्य बुद्धक्षेत्रं च परिशोधयितव्यं । बुद्धत्वं च प्राप्तव्यं । तदेतद्यथाक्रमं परिशुद्धिर्विशुद्धिश्च । उपायकौशल्यविभागे द्वौ श्लोकौ ।

पूरये बुद्धधर्माणां सत्वानां परिपाचने ।
क्षिप्रप्राप्तौ क्रियाशुद्धौ वर्त्माच्छेदे च कौशलं ॥ ६९ ॥



उपाये बोधिसत्वानामसमं सर्वभूमिषु ।
यत्कौशल्यं समाश्रित्य सर्वार्थान्साधयन्ति ते ॥ ७० ॥

अनेनोपायकौशल्यस्य प्रभेदः कर्म च दर्शितं । तत्र बुद्धधर्मपरिपूरये निर्विकल्पं ज्ञानमुपायः । सत्वपरिपाचने चत्वारि संग्रहवस्तूनि । क्षिप्राभिसंबोधे सर्वं पापं प्रतिदेशयामि यावद् भवतु मे ज्ञानं संबोधायेति प्रतिदेशना ऽनुमोदनाध्येषणा परिणामना । क्रियाशुद्धौ समाधिधारणीमुखानि । तैः सर्वार्थक्रियासाधनात् । वर्त्मानुपच्छेदे अप्रतिष्ठितनिर्वाणे । अस्मिन् पञ्चविध उपाये सर्वभूमिषु बोधिसत्वानामसमं तदन्यैः कौशलमित्ययं प्रभेदः । सर्वस्वपरार्थसाधनं कर्म । धारणीविभागे त्रयः श्लोकाः ।

विपाकेन श्रुताभ्यासात् धारण्यपि समाधिना ।
परीत्ता महती सा च महती त्रिविधा पुनः ॥ ७१ ॥
अप्रविष्टप्रविष्टानां धीमतां मृदुमध्यमा ।
अशुद्धभूमिकानां हि महती शुद्धभूमिका ॥ ७२ ॥
धारणीतां समाश्रित्य बोधिसत्वा पुनः पुनः ।
प्रकाशयन्ति सद्धर्मं नित्यं संधारयन्ति च ॥ ७३ ॥

अत्रापि प्रभेदः कर्म च धारण्याः संदर्शितं । तत्र त्रिविधा धारणी । पूर्वकर्मविपाकेन । श्रुताभ्यासेन । दृष्टधर्मबाहुश्रुत्येन ग्रहणधारणसामर्थ्यविशेषणात् । समाधिसंनिश्रयेण च । सा पुनर्विपाकश्रुताभ्यासाभ्यां परीत्ता वेदितव्या । समाधिना महती । सापि महती पुनस्त्रिविधा । अभूमिप्रविष्टानां मृद्वी भूमिप्रविष्टानां अशुद्धभूमिकानां मध्या सप्तसु भूमिषु । परिशुद्धभूमिका त्वधिमात्रा शेषासु भूमिषु इत्ययं प्रभेदो धारण्याः । सद्धर्मस्य प्रकाशनं धारणं च कर्म । प्रणिधानविभागे त्रयः श्लोकाः ।

चेतना छन्दसहिता ज्ञानेन प्रेरिता च तत् ।
प्रणिधानं हि धीराणामसमं सर्वभूमिषु ॥ ७४ ॥
हेतुभूतं च विज्ञेयं चित्तात्सद्यःफलं च तत् ।
आयत्यामर्थसिद्ध्यर्थं चित्तमात्रात्समृद्धितः ॥ ७५ ॥
चित्रं महद्विशुद्धं च उत्तरोत्तरभूमिषु ।
आबोधेर्बोधिसत्वानां स्वपरार्थप्रसाधकं ॥ ७६ ॥

अत्र प्रणिधानं स्वभावतो निदानतो भूमितः प्रभेदतः कर्मतश्च परिदीपितं । चेतना छन्दसंप्रयुक्ता स्वभावः । ज्ञानं निदानं । सर्वभूमिष्विति भूमिः । तत्र

प्रणिधानं हेतुभूतं । चित्तादेव सद्यःफलत्वात् । आयत्यां वाभिप्रेतार्थसिद्ध्यर्थं चित्तात्पुनः सद्यःफलं चित्तमात्रात् यथाभिप्रेतार्थसमृद्धिता वेदितव्या । येन प्रणिधानेन बलिका बोधिसत्वा विक्रीडन्ति । यस्य न सुकरा संख्या कर्तुं कायस्य वेति विस्तरः । चित्रमधिमुक्तिचर्याभूमावेवं चैवं च स्यामिति । महद्भूमिप्रविष्टस्य दश महाप्रणिधानानि । विशुद्धमुत्तरोत्तरासु भूमिषु विशुद्धिविशेषादाबोधेरित्येष प्रभेदतः । स्वपरार्थप्रसाधनं कर्म । समाधित्रयविभागे त्रयः श्लोकाः ।

नैरात्म्यं द्विविधं ज्ञेयो ह्यात्मग्राहस्य चाश्रयः ।
तस्य चोपशमो नित्यं समाधित्रयगोचरः ॥ ७७ ॥

त्रयाणां समाधीनां त्रिविधो गोचरो ज्ञेयः । पुद्गलधर्मनैरात्म्यं शून्यतासमाधेः । तदुभयात्मग्राहस्याश्रयः पञ्चोपादानस्कन्धा अप्रणिहितसमाधेः । तस्याश्रयस्यात्यन्तोपशम आनिमित्तसमाधेः । स एव

समाधिस्त्रिविधो ज्ञेयो ग्राह्यग्राहकभावतः ।

त्रिविधस्य ग्राह्यस्य गोचरस्य ग्राहका ये समाधयः । ते शून्यतादिसमाधयः इति ग्राह्यग्राहकभावेन त्रयः समाधयो ज्ञातव्याः । ते पुनर्यथाक्रमं ।

निर्विकल्पो ऽपि विमुखो रतियुक्तश्च सर्वदा ॥ ७८ ॥

शून्यतासमाधिर्निर्विकल्पः । पुद्गलधर्मात्मनोरविकल्पनात् । अप्रणिहितो विमुखस्तस्मादात्मग्राहाश्रयात् । आनिमित्तो रतिसंप्रयुक्तः सर्वकालं तस्मिंस्तदाश्रयोपशमे ।

परिज्ञायै प्रहाणाय पुनः साक्षात्क्रियाय च ।
शून्यतादिसमाधीनां त्रिधार्थः परिकीर्तितः ॥ ७९ ॥

पुद्गलधर्मनैरात्म्ययोः परिज्ञार्थं शून्यता । तदात्मग्राहाश्रयस्य प्रहाणार्थमप्रणिहितः । तदुपशमस्य साक्षात्क्रियार्थमानिमित्तः समाधिः । धर्मोद्दानविभागे श्लोकौ ।

समाध्युपनिषत्त्वेन धर्मोद्दानचतुष्टयं ।
देशितं बोधिसत्वेभ्यः सत्वानां हितकाम्यया ॥ ८० ॥



तत्र सर्वसंस्कारा अनित्याः सर्वसंस्कारा दुःखाः इत्यप्रणिहितस्य समाधेरुपनिषद्भावेन देशितं । सर्वधर्मा अनात्मान इति शून्यतायाः । शान्तं निर्वाणमिति आनिमित्तस्य समाधेः । कः पुनरनित्यार्थो यावच्छान्तार्थः इत्याह ।

असदर्थो ऽविकल्पार्थः परिकल्पार्थ एव च ।
विकल्पोपशमार्थश्च धीमतां तच्चतुष्टयं ॥ ८१ ॥

बोधिसत्वानामसदर्थो ऽनित्यार्थः । यन्नित्यं नास्ति तदनित्यं तेषां यत्परिकल्पितलक्षणं । अभूतविकल्पार्थो दुःखार्थो यत्परतन्त्रलक्षणं । परिकल्पमात्रार्थो ऽनात्मार्थः । एवशब्देनावधारणं परिकल्पित आत्मा नास्ति परिकल्पमात्रं त्वस्तीति परिकल्पितलक्षणस्याभावार्थो ऽनात्मार्थ इत्युक्तं भवति । विकल्पोपशमार्थः शान्तार्थः परिनिष्पन्नलक्षणं निर्वाणं । क्षणभङ्गार्थो ऽप्यनित्यार्थो वेदितव्यः परतन्त्रलक्षणस्य । अतस्तत्प्रसाधनार्थं क्षणिकत्वविभागे दश श्लोकाः ।

अयोगाद्धेतुतोत्पत्तेर्विरोधात्स्वयमस्थितेः ।
अभावाल्लक्षणैकान्त्यादनुवृत्तेर्निरोधतः ॥ ८२ ॥
परिणामोपलब्धेश्च तद्धेतुत्वफलत्वतः ।
उपात्तत्वाधिपत्वाच्च शुद्धसत्वानुवृत्तितः ॥ ८३ ॥

तत्र क्षणिकं सर्वं संस्कृतमिति पश्चाद्वचनादियं प्रतिज्ञा वेदितव्या । तत्पुनः कथं सिध्यति । क्षणिकत्वमन्तरेण संस्काराणां प्रवृत्तेरयोगात् । प्रबन्धेन हि वृत्तिः प्रवृत्तिः । सा चान्तरेण प्रतिक्षणमुत्पादनिरोधौ न युज्यते । अथ कालान्तरं स्थित्वा पूर्वोत्तरनिरोधोत्पादतः प्रबन्धेनेष्यते वृत्तिः । तदनन्तरं प्रवृत्तिर्न स्यात् प्रबन्धाभावात् । नैव चोत्पन्नस्य विना प्रबन्धेन कालान्तरं भावो युज्यते । किं कारणं हेतुत उत्पत्तिः । हेतुतो हि सर्वं संस्कृतमुत्पद्यते भवतीत्यर्थः । तद्यदि भूत्वा पुनरुत्तरकालं भवति तस्यावश्यं हेतुना भवितव्यं । विना हेतुना आदित इवाभावात् । न च तत्तेनैव हेतुना भवितुमर्हति तस्योपयुक्तहेतुकत्वात् । न चान्यो हेतुरुपलभ्यते । तस्मात्प्रतिक्षणमवश्यं पूर्वहेतुकमन्यद्भवतीति वेदितव्यं । एवं विना प्रबन्धेनोत्पन्नस्य कालान्तरं भावो न युज्यते । अथाप्येवमिष्येत नोत्पन्नं पुनरुत्पद्यते यदर्थं हेतुना भवितव्यं स्यादुत्पन्नं तु कालान्तरेण पश्चान्निरुध्यते नोत्पन्नमात्रमेवेति । तत्पश्चात्केन निरुध्यते । यद्युत्पादहेतुनैव तदयुक्तं । किं कारणं । उत्पादनिरोधयोर्विरोधात् । न हि विरोधयोस्तुल्यो हेतुरुपलभ्यते । तद्यथा छायातपयोः शीतोष्णयोश्च । काला-

न्तरनिरोधस्यैव च विरोधात्। केन विरोधात्। आगमेन च। यदुक्तं भगवता। मायोपमास्ते भिक्षो संस्कारा आपायिकास्तावत्कालिका इत्वरप्रत्युपस्थायिन[1] इति। मनस्कारेण च योगिनां। ते हि संस्काराणामुदयव्ययौ मनसिकुर्वन्तः प्रतिक्षणं तेषां निरोधं पश्यन्ति। अन्यथा हि तेषामपि निर्विद्विरागविमुक्तयो न स्युर्यथान्येषां मरणकालादिषु निरोधं पश्यतां। यदि चोत्पन्नः संस्कारः कालान्तरं तिष्ठेत् स स्वयमेव वा तिष्ठेत्स्वयमेव स्थातुं समर्थः। स्थितिकारणेन वा केनचित्। स्वयं तावदवस्थानमयुक्तं। किं कारणं। पश्चात्स्वयमस्थितेः। केन वा सो ऽन्ते पुनः स्थातुं न समर्थः। स्थितिकारणेनापि न युक्तं तस्याभावात्। न हि तत्किंचिदुपलभ्यते। अथापि स्याद्विनापि स्थितिकारणेन विनाशकारणाभावात् अवतिष्ठते। लब्धे तु विनाशकारणे पश्चाद्विनश्यति अग्निनेव श्यामतेति। तदयुक्तं तस्याभावात्। न हि विनाशकारणं पश्चादपि किंचिदस्ति। अग्निनापि श्यामता विनश्यतीति सुप्रसिद्धं। विसदृशोत्पत्तौ तु तस्य सामर्थ्यं प्रसिद्धं। तथा हि तत्संबन्धात् श्यामतायाः संततिर्विसदृशी गृह्यते न तु सर्वथैवाप्रवृत्तिः। अपामपि क्वाथ्यमानानामग्निसम्बन्धादल्पतरतमोत्पत्तितो ऽतिमान्द्यादन्ते पुनरनुत्पत्तिर्गृह्यते। न तु सकृदेवाग्निसंबन्धात्तदभावः। नैव चोत्पन्नस्य कस्यचिदवस्थानं युज्यते। लक्षणैकान्त्यात्। ऐकान्तिकं ह्येतत्संस्कृतलक्षणमुक्तं भगवता यदुत संस्कृतस्यानित्यता। तद्यदि नोत्पन्नमात्रं विनश्येत्। कंचित्कालमस्यानित्यता न स्यादिति अनैकान्तिकमनित्यतालक्षणं प्रसह्यते। अथापि स्यात्प्रतिक्षणमपूर्वोत्पत्तौ तदेवेदमिति प्रत्यभिज्ञानं न स्यादिति। तद्भवत्येव सादृश्यस्य अनुवृत्तेर्मायाकारपलकवत्[2]। सादृश्यात्तद्बुद्धिर्न तद्भावादिति। कथं गम्यते। निरोधतः। न हि तथैवावस्थितस्यान्ते निरोधः स्यादादिक्षणनिर्विशिष्टत्वात्। तस्मान्न तत्तदेवेत्यवधार्यते अन्ते परिणामोपलब्धेश्च। परिणामो हि नामान्यथात्वं। तद्यदि नादित एवारब्धं भवेदाध्यात्मिकबाह्यानां भावानामन्ते परिणामो नोपलभ्येत। तस्मादादित एवान्यथात्वमारब्धं यत्क्रमेणाभिवर्धमानमन्ते व्यक्तिमापद्यते क्षीरस्येव दध्यवस्थायां। यावत्तु तदन्यथात्वं सूक्ष्मत्वान्न परिच्छिद्यते। तावत्सादृश्यानुवृत्तेस्तदेवेदमिमि ज्ञायत इति सिद्धं। ततश्च प्रतिक्षणमन्यथात्वात्। क्षणिकत्वं प्रसिद्धं। कुतश्च प्रसिद्धं। तद्धेतुत्वफलत्वतः। क्षणिकहेतुत्वात्। क्षणिकफल-

[1] *Āpāyika*, *tāvatkālika*, *pratyupasthāyin*, mots nouveaux (dans une citation de sūtra). Le chinois traduit *āpāyika* par *hoai mie*, «se détruire»: *tāvatkālika* par *tsan che*, «d'un instant»: *itvara-pratyupasthāyin* par *tch'a na pou tchou*, «ne pas s'arrêter un instant».

[2] *Sic* ms. Le chinois dit : «comme la flamme d'une lampe».



त्वाच्चेत्यर्थः। क्षणिकं हि चित्तं प्रसिद्धं तस्य चान्ये संस्काराश्चक्षूरूपादयो हेतुतः। तस्मात्ते ऽपि क्षणिका इति सिद्धं। न त्वक्षणिकात् क्षणिकं भवितुमर्हति यथा नित्यादनित्यमिति। चित्तस्य खल्वपि सर्वे संस्काराः फलं। कथमिदं गम्यते। उपात्तत्वादाधिपत्याच्छुद्धसत्वानुवृत्तितश्च। चित्तेन हि सर्वे संस्काराश्चक्षुरादयः साधिष्ठाना उपात्ताः सहसंमूर्छनाः तदनुग्रहानुवृत्तितः। तस्मात्ते चित्तस्य फलं चित्तस्य चाधिपत्यं संस्कारेषु। यथोक्तं भगवता। चित्तेनायं लोको नीयते चित्तेन परिक्लिष्यते चित्तस्योत्पन्नस्योत्पन्नस्य वशे वर्तते इति। तथा विज्ञानप्रत्ययं नाम रूपमित्युक्तं। तस्माच्चित्तस्य फलं। शुद्धचित्तानुवृत्तितश्च। शुद्धं हि योगिनां चित्तं संस्कारा अनुवर्तन्ते। यथोक्तं। ध्यायी भिक्षुः ऋद्धिमांश्चित्तवशे प्राप्त इमं दारुस्कन्धं सचेत् सुवर्णमधिमुच्यते तदप्यस्य तथैव स्यादिति। तस्मादपि चित्तफलं संस्काराः। सत्वानुवृत्तितश्च। तथा हि पापकारिषु सत्वेषु बाह्या भावा हीना भवन्ति। पुण्यकारिषु च प्रणीताः। अतस्तच्चित्तानुवर्तनात् चित्तफलत्वं संस्काराणां सिद्धं। ततश्च तेषां क्षणिकत्वं। न हि क्षणिकस्याक्षणिकं फलं युज्यते तदनुविधायित्वात्। एवं तावदविशेषेण संस्काराणां क्षणिकत्वं द्वाभ्यां श्लोकाभ्यां साधितं। आध्यात्मिकानां पुनः साधनार्थं पञ्च श्लोका वेदितव्याः।

आद्यस्तरतमेनापि चयेनाश्रयभावतः।
विकारपरिपाकाभ्यां तथा हीनविशिष्टतः॥ ८४॥
भास्वराभास्वरत्वेन देशान्तरगमेन च।
सबीजाबीजभावेन प्रतिबिम्बेन चोदयः॥ ८५॥
चतुर्दशविधोत्पत्तौ हेतुमानविशेषतः।
चयायार्थादयोगाच्च आश्रयत्व असंभवात्॥ ८६॥
स्थितस्यासंभवादन्ते आद्यनाशाविकारतः।
तथा हीनविशिष्टत्वे भास्वराभास्वरे ऽपि च॥ ८७॥
गत्यभावात्स्थितायोगाच्चरमत्व असंभवात्।
अनुवृत्तेश्च चित्तस्य क्षणिकं सर्वसंस्कृतं॥ ८८॥

आद्यस्तरतमेनापि यावत्क्षणिकं सर्वसंस्कृतमिति। कथमेषामेभिः क्षणिकत्वं सिध्यति। आध्यात्मिकानां हि संस्काराणां चतुर्दशविध उत्पादः। आद्य उत्पादो यावत्प्रथमत आत्मभावाभिनिर्वृत्तिः। तरतमेन यः प्रथमजन्मक्षणादूर्ध्वं। चयेन य आहारस्वप्नब्रह्मचर्यासमापत्त्युपचयेन। आश्रयभावतः यश्चक्षुर्विज्ञानादीनां चक्षुरादिभिराश्रयैः। विकारेण यो रागादिभिर्वर्णादिविपरिणामतः। परिपाकेन यो गर्भबालकुमारयुवमध्यमवृद्धावस्थासु। हीनत्वेन

विशिष्टत्वेन च यो दुर्गतौ चोत्पद्यमानानां यथाक्रमं। भास्वरत्वेन यो निर्मितकामेषु परनिर्मितकामेषु रूपारूप्येषु चोपपन्नानां चित्तमात्राधीनत्वात्। अभास्वरत्वेन यस्तदन्यत्रोपपन्नानां। देशान्तरगमनेन यो ऽन्यदेशोत्पादनिरोधे ऽन्यदेशोत्पादः। सबीजत्वेन यो ऽर्हतश्चरमान् स्कन्धान्वर्जयित्वा। अबीजत्वेन यस्तेषामेवार्हतश्चरमेषां। प्रतिबिम्बत्वेन। यो अष्टविमोक्षध्यायिनां समाधिवशेन प्रतिबिम्बानां संस्काराणामुत्पादः। एतस्यां चतुर्दशविधायामुत्पत्तावाध्यात्मिकानां संस्काराणां क्षणिकत्वं हेतुमानविशेषादिभिः कारणैर्वेदितव्यं। आद्योत्पादे तावत् हेतुत्वविशेषात्। यदि हि तस्य हेतुत्वेन विशेषो न स्यात् तदुत्तरायाः संस्कारप्रवृत्तेरुत्तरोत्तरविशेषो नोपलभ्येत हेत्वविशेषात्। विशेषे च सति तदुत्तरेभ्यस्तस्यान्यत्वात् क्षणिकत्वसिद्धिः। तरतमोत्पादे मानविशेषात्। मानं प्रमाणमित्यर्थः। न हि प्रतिक्षणं विना ऽन्यत्वेन परिमाणविशेषो भवेत्। उपचयोत्पादे चयापार्थ्यात्। उपस्तम्भो हि चयः। तस्यापार्थ्यं स्यादन्तरेण क्षणिकत्वं तथैवावस्थितत्वात्। अयोगाच्चोपचयस्यैव। न हि प्रतिक्षणं विना पुष्टतरोत्पत्त्या युज्येतोपचयः। आश्रयभावेनोत्पत्तावाश्रितत्वासंभवात्। न हि तिष्ठत्याश्रये च तदाश्रितस्यानवस्थानं युज्यते। याने तिष्ठति तदारूढानवस्थानवदन्यथा ह्याश्रयत्वं न संभवेत्। विकारोत्पत्तौ परिपाकोत्पत्तौ च स्थितस्यासंभवात्। आद्यनाशाविकारतः। न हि तथास्थितस्यैव रागादिभिर्विकारः संभवति। न चावस्थान्तरेषु परिपाक आदावविनाशे सत्यन्ते विकाराभावात्। तथा हीनविशिष्टोत्पत्तौ क्षणिकत्वं वेदितव्यं यथा विकारपरिपाकोत्पत्तौ। न हि तथास्थितेष्वेव संस्कारेषु कर्मवासना वृत्तिं लभते यतो दुर्गतौ वा स्यादुत्पत्तिः सुगतौ वा। क्रमेण हि संततिपरिणामविशेषात् वृत्तिलाभो युज्यते। भास्वराभास्वरे ऽपि चोत्पादे तथैव क्षणिकत्वं युज्यते। भास्वरे तावत् तथास्थितस्यासंभदात् चित्ताधीनवृत्तितायाः। अभास्वरे ऽपि चादौ विनाशमन्तरेणान्ते विकारायोगात्। देशान्तरगमनेनोत्पत्तौ गत्यभावात्। न हि संस्काराणां देशान्तरसंक्रान्तिलक्षणा गतिर्नाम काचित् क्रिया युज्यते। सा ह्युत्पन्ना वा संस्कारं देशान्तरं गमयेदनुत्पन्ना वा। यद्युत्पन्ना तेन गतिकाले न कंचिद्गत इति स्थितस्यैव गमनं नोपपद्यते। अथानुत्पन्ना तेनासत्यां गतौ गत इति न युज्यते। सा च क्रिया यदि तद्देशस्थ एव संस्कारे कारित्रं करोति न युज्यते। स्थितस्यान्यदेशाप्राप्तेः। अथान्यदेशस्थे न युज्यते। विना क्रिययान्यदेशाप्राप्तेः। न च क्रिया तत्र वा अन्यत्र वा देशे स्थिता संस्कारादन्योपलभ्यते। तस्मान्नास्ति संस्काराणां देशान्तरसंतत्युत्पादादन्या गतिः। तदभावाच्च सिद्धं क्षणिकत्वं। देशान्तरनिरन्तरोत्पत्तिलक्षणा गतिर्विभवद्भिः कारणैर्वेदितव्या। अस्ति चित्तवशेन यथा चङ्क्रमणाद्यवस्थासु। अस्ति पूर्वकर्मावेधेन यथान्तराभवः। अस्त्यभिघातवशेन यथा क्षिप्तस्येषोः। अस्ति संबन्धवशेन यथा यान-



नदीप्लवारूढानां। अस्ति नोदनवशेन यथा वायुप्रेरितानां तृणादीनां। अस्ति स्वभाववशेन यथा वायोस्तिर्यग्गमनमग्नेरूर्ध्वं ज्वलनमपां निम्ने स्यन्दनं। अस्त्यनुभावेन यथा मन्त्रौषधानुभावेन। केषांचिदयस्कान्तानुभावेनायसां। ऋद्ध्यनुभावेन ऋद्धिमतां। सबीजाबीजभावेनोत्पत्तौ क्षणिकत्वं वेदितव्यं स्थितायोगाच्चरमासंभवाच्च। न हि प्रतिक्षणं हेतुभावमन्तरेण तथास्थितस्यान्यस्मिन्काले पुनर्बीजभावो युज्यते। निर्बीजत्वं वा चरमे क्षणे। न च शक्यं पूर्वं सबीजत्वं चरमे क्षणे निर्बीजत्वमभ्युपगन्तुं। तदभावे चरमत्वासंभवात्। तथा हि चरमत्वमेव न संभवति। प्रतिबिम्बोत्पत्तौ क्षणिकत्वं चित्तानुवृत्तितो वेदितव्यं। प्रतिक्षणं चित्तवशेन तदुत्पादात्। एकान्तात्साधितमाध्यात्मिकं सर्वसंस्कृतं क्षणिकमिति। बाह्यस्येदानीं क्षणिकत्वं त्रिभिः श्लोकैः साधयति।

भूतानां षड्विधार्थस्य क्षणिकत्वं विधीयते।<br>
शोषवृद्धेः प्रकृत्या च चलत्वाद् वृद्धिहानितः ॥ ८९ ॥<br>
तत्संभवात्पृथिव्याश्च परिणामचतुष्टयात्।<br>
वर्णगन्धरसस्पर्शतुल्यत्वाच्च तथैव तत् ॥ ९० ॥<br>
इन्धनाधीनवृत्तित्वात्तारतम्योपलब्धितः।<br>
चित्तानुवृत्तेः पृक्षातः क्षणिकं बाह्यमप्यतः ॥ ९१ ॥

किं पुनस्तद्बाह्यं। चत्वारि महाभूतानि। षड्विधश्चार्थः। वर्णगन्धरसस्पर्शशब्दा धर्मायतनिकं च रूपं। अतो भूतानां षड्विधार्थस्य च क्षणिकत्वं विधीयते। कथं विधीयते। अपां तावच्छोषवृद्धेः। उत्ससरस्तटागादिष्वपां क्रमेण वृद्धिः शोषश्चोपलभ्यते। तच्चोभयमन्तरेण प्रतिक्षणं परिणामं न स्यात्पश्चाद्विशेषकारणाभावात्। वायोः प्रकृत्या चलत्वाद् वृद्धिहानितश्च। न ह्यवस्थितस्य चलत्वं स्यात्तत्स्वभावादिति प्रसाधितमेतत्। न च वृद्धिह्रासौ तथैवावस्थितत्वात्। पृथिव्यास्तत्संभवात् परिणामचतुष्टयाच्च। तच्छब्देनापश्च गृह्यन्ते वायुश्च। अद्भ्यो हि वायुसहिताभ्यः पृथिवी संभूता विवर्तकाले। तस्मात्तत्फलत्वात् सापि क्षणिका वेदितव्या। चतुर्विधश्च परिणामः पृथिव्या उपलभ्यते। कर्मकृतः सत्वानां कर्मविशेषात्। उपक्रमकृतः प्रहादिभिः [1]। भूतकृतो ऽग्न्यादिभिः। कालकृतः कालान्तरपरिणामतः [2]। स चान्तरेण प्रतिक्षणमन्योत्पत्तिं न युज्यते विनाशकारणाभावात्। वर्णगन्धरसस्पर्शानां पृथिव्यादिभिस्तुल्यकारणत्वात् तथैव क्षणिकत्वं वेदितव्यं। तेजसः पुनः क्षणिकत्वमिन्धनाधीनवृत्ति-

[1] *Sic* ms. Le chinois dit : «avec une bêche». — [2] Ms. : परिवासतः.

त्वात्। न हि तेजस्युत्पन्ने तेजःसहोत्पन्नमिन्धनं तथैवावतिष्ठते। न च दग्धेन्धनं तेजः स्थातुं समर्थं। मा भूदन्ते ऽप्यनिन्धनस्यावस्थानमिति। श्लोकबन्धानुरोधाद्वर्णादीनां पूर्वमभिधानं पश्चात्तेजसः। शब्दः पुनर्योऽपि कालान्तरमुपलभ्यते घण्टादीनां तस्यापि क्षणिकत्वं वेदितव्यं तारतम्योपलब्धेः। न ह्यसति क्षणिकत्वे प्रतिक्षणमन्दतरतमोपलब्धिः स्यात्। धर्मायतनिकस्यापि रूपस्य क्षणिकत्वं प्रसिद्धमेव चित्तानुवृत्तेर्यथा पूर्वमुक्तं। तस्माद्बाह्यमपि क्षणिकं प्रसिद्धं। पृच्छ्यते खल्वपि सर्वसंस्काराणां क्षणिकत्वं सिध्यति कथं कृत्वा। इदं तावदयमक्षणिकवादी प्रष्टव्यः। कस्माद्भवानिनित्यत्वमिच्छति न संस्काराणां क्षणिकत्वं नेच्छतीति। यद्येवं वदेत् प्रतिक्षणमन्यत्वस्याग्रहणादिति स इदं स्याद्वचनीयः। प्रसिद्धक्षणिकभावेष्वपि प्रदीपादिषु निश्चलावस्थायां तदग्रहणादक्षणिकत्वं कस्मान्नेष्यते। यद्येवं वदेत् पूर्ववत्पश्चादग्रहणादिति। स इदं स्याद्वचनीयः। संस्काराणामपि कस्मादेवं नेष्यते। यद्येवं वदेत् विलक्षणत्वात् प्रदीपादितदन्यसंस्काराणामिति। स इदं स्याद्वचनीयः। द्विविधं हि वैलक्षण्यं स्वभाववैलक्षण्यं वृत्तिवैलक्षण्यं च। तद्यदि तावत् स्वभाववैलक्षण्यमभिप्रेतमत एव दृष्टान्तत्वं युज्यते। न हि तत्स्वभाव एव तस्य दृष्टान्तो भवति यथा प्रदीपः प्रदीपस्य गौर्वा गोरिति। अथ वृत्तिवैलक्षण्यमत एव दृष्टान्तत्वं प्रदीपादीनां प्रसिद्धत्वात्। क्षणिकत्वानुवृत्तेः पुनः स इदं प्रष्टव्यः। कच्चिदिच्छसि याने तिष्ठति यानारूढो गच्छेदिति। यदि नो हीति वदेत्। स इदं स्याद्वचनीयः। चक्षुरादिषु तिष्ठत्सु तदाश्रितं विज्ञानं प्रबन्धेन गच्छतीति न युज्यते। यद्येवं वदेत् ननु च दृष्टं वर्तिसंनिश्रिते प्रदीपे प्रबन्धेन गच्छति वर्त्या अवस्थानमिति। स इदं स्याद्वचनीयः। न दृष्टं तत्प्रबन्धेन वर्त्याः प्रतिक्षणं विकारोत्पत्तेरिति। यद्येवं वदेत् सति क्षणिकत्वे संस्काराणां कस्मात्प्रदीपादिव क्षणिकत्वं न सिद्धमिति। स इदं स्याद्वचनीयः विपर्यासवस्तुत्वात्। सदृशसंततिप्रबन्धवृत्त्या हि क्षणिकत्वमेषां न प्रज्ञायते। यतः सत्यप्यपरापरत्वे तदेवेदमिति विपर्यासो जायते। इतरथा हि अनित्यनित्यविपर्यासो न स्यात्तदभावे संक्लेशो न स्यात् कुतः पुनर्व्यवदानमित्येवं पर्यनुयोगतो ऽपि क्षणिकत्वं सर्वसंस्काराणां प्रसिद्धं। पुद्गलनैरात्म्यप्रसाधनार्थं नैरात्म्यविभागे द्वादश श्लोकाः।

प्रज्ञप्त्यस्तितया वाच्यः पुद्गलो द्रव्यतो न तु।
नोपलम्भाद्विपर्यासात् संक्लेशात् क्लिष्टहेतुतः ॥ ९२ ॥
एकत्वान्यत्वतो वाच्यस्तस्माद्दोषद्वयादसौ।
स्कन्धात्मत्वप्रसङ्गाच्च तद्द्रव्यत्वप्रसङ्गतः ॥ ९३ ॥
द्रव्यसन् यद्यवाच्यश्च वचनीयं प्रयोजनं।
एकत्वान्यत्वतो ऽवाच्यो न युक्तो निष्प्रयोजनः ॥ ९४ ॥



लक्षणाल्लोकदृष्टाच्च शास्त्रतो ऽपि न युज्यते।
इन्धनाग्न्योरवाच्यत्वमुपलब्धेर्द्वयेन हि ॥ ९५ ॥
द्वये सति च विज्ञानसंभवात्प्रत्ययो न सः।
नैरर्थक्यादतो द्रष्टा यावन्मोक्ता न युज्यते ॥ ९६ ॥
स्वामित्वे सति चानित्यमनिष्टं न प्रवर्तयेत्।
तत्कर्मलक्षणं साध्यं संबोधो बाध्यते त्रिधा ॥ ९७ ॥
दर्शनादौ च तद्यत्नः स्वयंभूर्न त्रयादपि।
तद्यत्नप्रत्ययत्वं च निर्यत्नं दर्शनादिकं ॥ ९८ ॥
अकर्तृत्वादनित्यत्वात्सकृन्नित्यप्रवृत्तितः।
दर्शनादिषु यत्नस्य स्वयंभूत्वं न युज्यते ॥ ९९ ॥
तथा स्थितस्य नष्टस्य प्रागभावादनित्यतः।
तृतीयपक्षाभावाच्च प्रत्ययत्वं न युज्यते ॥ १०० ॥
सर्वधर्मा अनात्मानः परमार्थेन शून्यता।
आत्मोपलम्भे दोषश्च देशितो यत एव च ॥ १०१ ॥
संक्लेशव्यवदाने च अवस्थाच्छेदभिन्नके।
वृत्तिसंतानभेदो हि पुद्गलेनोपदर्शितः ॥ १०२ ॥
आत्मदृष्टिरनुत्पाद्या अभ्यासो ऽनादिकालिकः।
अयत्नमोक्षः सर्वेषां न मोक्षः पुद्गलो ऽस्ति वा ॥ १०३ ॥

पुद्गलः किमस्तीति वक्तव्यो नास्तीति वक्तव्यः। आह।

प्रज्ञप्त्यस्तितया वाच्यः पुद्गलो द्रव्यतो न तु।

यतश्च प्रज्ञप्तितो ऽस्तीति वक्तव्यो द्रव्यतो नास्तीति वक्तव्यः। एवमनेकांशवादपरिग्रहे नैवास्तित्वे दोषावकाशो न नास्तित्वे। स पुनर्द्रव्यतो नास्तीति कथं वेदितव्यः। नोपलम्भात्। न हि स द्रव्यत उपलभ्यते रूपादिवत्। उपलब्धिर्हि नाम बुद्ध्या प्रतिपत्तिः। न च पुद्गलं बुद्ध्या न प्रतिपद्यन्ते पुद्गलवादिनः। उक्तं च भगवता। दृष्ट एव धर्मे आत्मानमुपलभते प्रज्ञापयतीति कथं नोपलब्धा भवति। न स एवमुपलभ्यमानो द्रव्यत उपलब्धो भवति। किं कारणं। विपर्यासात् तथा ह्यनात्मन्यात्मेति विपर्यास उक्तो भगवता। तस्माद्य एवं पुद्गलग्राहो विपर्यासः सः। कथमिदं गम्यते। संक्लेशात्। सत्कायदृष्टिक्लेशलक्षणो ह्येष संक्लेशो यदुत अहं ममेति। न च विपर्यासः संक्लेशो भवितुमर्हति। न चैष संक्लेश इति कथं वेदितव्यं। क्लिष्टहेतुतः। तथा हि तद्धेतुकाः क्लिष्टा

रागादय उत्पद्यन्ते। यत्र पुनर्वस्तुनि रूपादिसंज्ञके प्रज्ञप्तिः पुद्गल इति तस्मात्किमेकत्वेन पुद्गलो वक्तव्य आहोस्विदन्यत्वेन। आह।

एकत्वान्यत्वतो वाच्यस्तस्मादसौ

किं कारणं। दोषद्वयात्। कतमस्माद्दोषद्वयात्।

स्कन्धात्मत्वप्रसङ्गाच्च तद्द्रव्यत्वप्रसङ्गतः।

एकत्वे हि स्कन्धानामात्मत्वं प्रसज्यते पुद्गलस्य च द्रव्यसत्त्वं। अथान्यत्वे पुद्गलस्य द्रव्यसत्त्वं। एवं हि पुद्गलस्य प्रज्ञप्तितो ऽस्तित्वादवक्तव्यत्वं युक्तं। तेनाव्याकृतवस्तुसिद्धिः। ये पुनः शास्तुः शासनमतिक्रम्य पुद्गलस्य द्रव्यतो ऽस्तित्वमिच्छन्ति त इदं स्युर्वचनीयाः।

द्रव्यसन्यद्यवाच्यस्य वचनीयं प्रयोजनं।

किं कारणं।

एकत्वान्यत्वतो ऽवाच्यो न युक्तो निष्प्रयोजनः।

अथ दृष्टान्तमात्रात् पुद्गलस्यावक्तव्यत्वमिच्छेयुः। यथाग्निरिन्धनान्नान्यो नानन्यो वक्तव्य इति। त इदं स्युर्वचनीयाः।

लक्षणाल्लोकदृष्टाच्च शास्त्रतो ऽपि न युज्यते।
इन्धनाग्न्योरवाच्यत्वमुपलब्धेर्द्वयेन हि।

एकत्वेनान्यत्वेन च अग्निर्हि नाम तेजोधातुरिन्धनं शेषाणि भूतानि। तेषां च भिन्नं लक्षणमित्यन्य एवाग्निरिन्धनात्। लोके च विनाप्यग्निना दृष्टमिन्धनं काष्टादि विनापि चेन्धनेनाग्निरिति सिद्धमन्यत्वं। शास्त्रे च भगवता न क्वचिदग्नीन्धनयोरवाच्यत्वमुक्तमित्ययुक्तमेतत्। विना पुनरिन्धनेनाग्निरस्तीति कथमिदं विज्ञायते। उपलब्धेस्तथा हि वायुना विक्षिप्तं दूरमपि ज्वलत्परैति। अथापि स्याद्वायुस्तत्रेन्धनमिति अत एवाग्नीन्धनयोरन्यत्वमिति सिद्धिः। कुतः। द्वयेन हि उपलब्धेरिति प्रकृतं। द्वयं हि तत्रोपलभ्यते अर्चिर्वायुश्चेन्धनत्वेन। अस्त्येव पुद्गलो य एष द्रष्टा यावद्विज्ञाता कर्ता भोक्ता ज्ञाता मोक्ता



च। न स द्रष्टा युज्यते। नापि यावन्मोक्ता। स हि दर्शनादिसंज्ञकानां विज्ञानानां प्रत्ययभावेन वा कर्ता भवेत् स्वामित्वेन वा। तत्र तावत्।

द्वयं प्रतीत्य विज्ञानसंभवात्प्रत्ययो न सः।

किं कारणं। नैरर्थक्यात्। न हि तस्य तत्र किंचित्सामर्थ्यं दृष्टं।

स्वामित्वे सति वानित्यमनिष्टं न प्रवर्तयेत्॥

स हि विज्ञानप्रवृत्तौ स्वामीभवन्ननिष्टं विज्ञानमनित्यं न प्रवर्तयेत्। अनिष्टं च। नैव तस्मादुभयथाप्यसंभवात्। असौ द्रष्टा यावन्मोक्ता न युज्यते। अपि खलु यदि द्रव्यतः पुद्गलो ऽस्ति

तत्कर्मलक्षणं साध्यं

यदि द्रव्यतो ऽस्ति तस्य कर्माप्युपलभ्यते। यथा चक्षुरादीनां दर्शनादिलक्षणं च रूपप्रसादादि। न चैवं पुद्गलस्य। तस्मान्न सो ऽस्ति द्रव्यतः। तस्मिंश्च द्रव्यत इष्यमाणे बुद्धस्य भगवतः

संबोधो बाध्यते त्रिधा।

गम्भीराभिसंबोधः। असाधारणाभिसंबोधः। लोकोत्तराभिसंबोधश्च। न हि पुद्गलाभिसंबोधे किंचिद्गम्भीरमभिसंबुद्धं भवति। न तीर्थ्यासाधारणं। न लोकानुचितं। तथा ह्येष ग्राहः सर्वलोकगम्यः। तीर्थ्याभिनिविष्टः। दीर्घसंसारोचितश्च। अपि खलु पुद्गलो द्रष्टा भवन् यावद्विज्ञाता दर्शनादिषु सप्रयत्नो वा भवेन्निष्प्रयत्नो वा। सप्रयत्नस्य वा पुनरसौ प्रयत्नः स्वयंभूर्वा भवेदाकस्मिकः। तत्प्रत्ययो

दर्शनादौ च तद्यत्नः स्वयंभूर्न त्रयादपि।

तस्मादेव च दोषत्रयाद्वक्ष्यमाणात्

तद्यत्नप्रत्ययत्वं च

नेति वर्तते। निष्प्रयत्नस्य वा पुनः सतः सिद्धं भवति।

निर्यत्नं दर्शनादिकं।

इत्यसति व्यापारे पुद्गलस्य दर्शनादौ कथमसौ द्रष्टा भवति । यावद्विज्ञाता। दोषत्रयादित्युक्तं कतमस्माद्दोषत्रयात्।

अकर्तृत्वादनित्यत्वात्सकृन्नित्यप्रवृत्तितः ।
दर्शनादिषु यत्नस्य स्वयंभूत्वं न युज्यते॥

यदि दर्शनादिषु प्रयत्न आकस्मिको यतो दर्शनादीनि। न तर्हि तेषां पुद्गलः कर्तेति कथमसौ द्रष्टा भवति यावद्विज्ञाता सति वाकस्मिकत्वे निरपेक्षत्वात् न कदाचित्प्रयत्नो न स्यादनित्यो न स्यात् । नित्ये च प्रयत्ने दर्शनादीनां युगपच्च नित्यं च प्रवृत्तिः स्यादिति दोषः । तस्मान्न युज्यते दर्शनादिषु प्रयत्नस्य स्वयंभूत्वं ।

तथा स्थितस्य नष्टस्य प्रागभावादनित्यतः ।
तृतीयपक्षाभावाच्च प्रत्ययत्वं न युज्यते ॥

अथ पुद्गलप्रत्ययः प्रयत्नः स्यात्। तस्य तथा स्थितस्य प्रत्ययत्वं न युज्यते। प्रागभावात्। सति हि तत्प्रत्ययत्वे न कदाचित्पुद्गलो नास्तीति। किमर्थं प्राक् प्रयत्नो न स्याद्यदा नोत्पन्नः । विनष्टस्यापि प्रत्ययत्वं न युज्यते पुद्गलस्यानित्यत्वप्रसङ्गात्। तृतीयश्च कश्चित्पक्षो नास्ति यन्न स्थितो न विनष्टः स्यादिति। तत्प्रत्ययो ऽपि प्रयत्नो न युज्यते। एवं तावद्युक्तिमाश्रित्य द्रव्यतः पुद्गलो नोपलभ्यते।

सर्वे धर्मा अनात्मानः परमार्थेन शून्यता।
आत्मोपलम्भे दोषश्च देशितो यत एव च ॥

धर्मोद्दानेषु हि भगवता सर्वे धर्मा अनात्मान इति देशितं परमार्थशून्यतायामस्ति कर्मास्ति विपाकः कारकस्तु नोपलभ्यते य इमांश्च स्कन्धान्निक्षिपति अन्यांश्च स्कन्धान्प्रतिसंदधाति। अन्यत्र धर्मसंकेतादिति देशितं। पञ्चकेषु[1] पञ्चादीनवा आत्मोपलम्भ इति देशिता। आत्मदृष्टिर्भवति जीवदृष्टिः निर्विशेषो भवति तीर्थिकैः। उन्मार्गप्रतिपन्नो भवति। शून्यतायामस्य चित्तं न प्रस्कन्दति न प्रसीदति न संतिष्ठते नाधिमुच्यते। आर्यधर्मा अस्य न व्यवदायन्ते। एवमागमतो ऽपि न युज्यते । पुद्गलो ऽपि हि भगवता तत्र तत्र देशितः ।

(1) *Pañcaka*. Le chinois dit : «dans le sūtra *Tseng-wou* (= *Pañcottara?*)».



परिज्ञातावी[1] भारहारः[2] श्रद्धानुसार्यादिपुद्गलव्यवस्थानत इत्यसति द्रव्यतो ऽस्तित्वे कस्माद्देशितः।

संक्लेशे व्यवदाने च अवस्थाच्छेदभिन्नके।
वृत्तिसंतानभेदो हि पुद्गलेनोपदर्शितः ॥

अवस्थाभिन्ने हि संक्लेशव्यवदाने छेदभिन्ने च । पुद्गलप्रज्ञप्तिमन्तरेण तद्वृत्तिभेदः संतानभेदश्च देशयितुं न शक्यः.। तत्र परिज्ञासूत्रे[3] परिज्ञेया धर्माः संक्लेशः परिज्ञा व्यवदानं । भारहारसूत्रे[2] । भारो भारादानं च संक्लेशः । भारनिक्षेपणं व्यवदानं। तयोर्वृत्तिभेदः संतानभेदश्चान्तरेण परिज्ञाताविभारहारपुद्गलप्रज्ञप्तिं न शक्येत देशयितुं । बोधिपक्षाश्च धर्मा बहुधावस्थाः प्रयोगदर्शनभावनानिष्ठामार्गविशेषभेदतः । तेषां वृत्तिभेदः संतानभेदश्चान्तरेण श्रद्धानुसार्यादिपुद्गलप्रज्ञप्तिं न शक्येत देशयितुं। येनासति द्रव्यतो ऽस्तित्वे पुद्गलो देशित इत्ययमत्र नयो वेदितव्यः । इतरथा हि पुद्गलदेशना निष्प्रयोजना प्राप्नोति । न हि तावदसावात्मदृष्ट्युत्पादनार्थं युज्यते यस्मात्

आत्मदृष्टिरनूत्पाद्या

पूर्वमेवोत्पन्नत्वात्। नापि तदभ्यासार्थं यस्मादात्मदृष्टेर्

अभ्यासो ऽनादिकालिकः[4] ।

यदि चात्मदर्शनेन मोक्ष इत्यसौ देश्येत। एवं सति स्यात्

अयत्नमोक्षः सर्वेषां

तथा हि सर्वेषां न दृष्टसत्यानामात्मदर्शनं विद्यते। नैव वा मोक्षो ऽस्तीति

(1) *Parijñātāvin*, mot nouveau. Le chinois traduit par *tche tchö*, «celui qui sait».

(2) *Bhārahāra*. Sur le célèbre Bhārahāra-sūtra, cf. De La Vallée Poussin, *Études bouddhiques : La négation de l'âme*, p. 34, et *Muséon*, 1902 : *Le bouddhisme d'après les sources brahmaniques*, p. 2.

(3) *Parijñā-sūtra*. Le chinois traduit par *tche king*, «le sūtra du savoir».

(4) *Ādikālika*, mot nouveau, rendu en chinois par *sien yi*, «antérieur».

प्राप्नोति। न हि पूर्वमात्मानमनात्मतो गृहीत्वा सत्याभिसमयकाले कश्चिदात्मतो गृह्णाति। यथा दुःखं दुःखतः पूर्वमगृहीत्वा पश्चाद्गृह्णातीति यथापूर्वं तथा पश्चादपि मोक्षो न स्यात्। सति चात्मन्यवश्यमहंकारममकाराभ्यामात्मतृष्णया चान्यैश्च तन्निदानैः क्लेशैर्भवितव्यमिति अतो ऽपि मोक्षो न स्यात्। न वा पुद्गलो ऽस्तीति अभ्युपगन्तव्यं। तस्मिन्हि सति नियतमेते दोषाः प्रसज्यन्ते।

एवमेभिर्गुणैर्नित्यं बोधिसत्वाः समन्विताः।
आत्मार्थं च न रिञ्चन्ति परार्थं साधयन्ति च ॥ १०४ ॥

ह्रीधृतिप्रभृतीनां गुणानां समासेन कर्म निर्दिष्टं।

महायानसूत्रालंकारे बोधिपक्षाधिकारः समाप्तः

# XIX

आश्चर्यविभागे त्रयः श्लोकाः।

स्वदेहस्य परित्यागः संपत्तेश्चैव संवृतौ।
दुर्बलेषु क्षमा काये जीविते निरपेक्षिणः ॥ १ ॥[1]
वीर्यारम्भो ह्यनास्वादो ध्यानेषु सुख एव च।
निष्कल्पना च प्रज्ञायामाश्चर्यं धीमतां गतं ॥ २ ॥
तथागतकुले जन्म लाभो व्याकरणस्य च।
अभिषेकस्य च प्राप्तिर्बोधेश्चाश्चर्यमिष्यते ॥ ३ ॥

अत्र द्वाभ्यां श्लोकाभ्यां प्रतिपत्त्याश्चर्यमुक्तं षट्पारमिता आरभ्य। दानेन हि स्वदेहपरित्याग आश्चर्यं शीलसंवरनिमित्तमुदारसंपत्तित्यागः। शेषं गतार्थं। तृतीयेन श्लोकेन फलाश्चर्यमुक्तं चत्वारि बोधिसत्वफलान्यारभ्य प्रथमायामष्टम्यां दशम्यां त्रीणि शैक्षाणि फलानि। बुद्धभूमौ चतुर्थमशैक्षमत्र फलं। अनाश्चर्यविभागे श्लोकः।

वैराग्यं करुणां चैत्य भावनां परमामपि।
तथैव समचित्तत्वं नाश्चर्यं तासु युक्तता ॥ ४ ॥

(1) Mètre anuṣṭubh jusqu'au vers 63.



तास्विति पारमितासु। वैराग्यमागम्य दाने प्रयोगो नाश्चर्यं। करुणामागम्य शीले क्षान्तौ च। परमां भावनामागम्याष्टम्यां भूमौ निरभिसंस्कारनिर्विकल्पो[1] वीर्यादिप्रयोगो नाश्चर्यं। आत्मपरसमचित्ततामागम्य सर्वास्वेव पारमितासु प्रयोगो नाश्चर्यमात्मार्थ इव परार्थे खेदाभावात्। समचित्ततायां त्रयः श्लोकाः।

न तथात्मनि दारेषु सुतमित्रेषु बन्धुषु[2]।
सत्वानां प्रगतः स्नेहो यथा सत्वेषु धीमतां ॥ ५ ॥
अर्थिष्वपक्षपातश्च शीलस्याखण्डना ध्रुवं।
क्षान्तिः सर्वत्र सत्वार्थे वीर्यारम्भो महानपि ॥ ६ ॥
ध्यानं च कुशलं नित्यं प्रज्ञा चैवाविकल्पिका।
विज्ञेया बोधिसत्वानां तास्वेव समचित्तता ॥ ७ ॥

एकः श्लोकः सत्वेषु समचित्ततायां। द्वौ पारमितासु। न हि सत्वानामात्मादिषु स्नेहः समतया अनुगतो न चात्यन्तं। तथा ह्यात्मानमपि कदाचिन्मारयन्ति। बोधिसत्वानां तु सर्वसत्वेषु समतया ऽत्यन्तं च पारमितासु पुनर्दाने समचित्तत्वमर्थिष्वपक्षपातात्। शीले ऽणुमात्रस्यापि नित्यमखण्डना। क्षान्तिः सर्वत्रेति देशकाले सत्वेष्वभेदना। वीर्ये सत्वार्थे वीर्यारम्भात्स्वपरार्थे समं प्रयोगात्सर्वकुशलार्थं च। शेषं गतार्थं। उपकारित्वविभागे षोडश श्लोकाः।

स्थापना भाजनत्वे च शीलेष्वेव च रोपणं।
मर्षणा चापकारस्य अर्थे व्यापारगामिता ॥ ८ ॥
आवर्जना शासने ऽस्मिंश्छेदना संशयस्य च।
सत्वेषु उपकारित्वं धीमतामेतदिष्यते ॥ ९ ॥

आभ्यां श्लोकाभ्यां षड्भिः पारमिताभिर्यथोपकारित्वं बोधिसत्वानां तत्परिदीपितं। दानेन हि सत्वानां भाजनत्वे स्थापयन्ति कुशलक्रियायाः।

(1) *Nirabhisaṃskāra*, mot nouveau : «dégagé d'abhisaṃskāra».

(2) Les trois dernières syllabes de l'hémistiche manquent dans le manuscrit. J'ai rétabli par conjecture le mot बन्धुषु d'après le chinois *sin*, «parent», qui traduit régulièrement le second élément du nom de Vasu-bandhu (*T'ien-sin* ou *Che-sin*).



IMPRIMERIE NATIONALE.

ध्यानेनावर्जयन्ति प्रभावविशेषयोगात्। शेषं गतार्थं। शेषैः श्लोकैः मात्रादि-साधर्म्येणोपकारित्वं दर्शितं।

समाश्रयेन सत्वानां धारयन्ति सदैव ये।
जनयन्त्यार्यभूमौ च कुशलैर्वर्धयन्ति च॥ १०॥
दुष्कृतात्परिरक्षन्ति श्रुतं व्युत्पादयन्ति च।
पञ्चभिः कर्मभिः सत्वमातृकल्पा जिनात्मजाः॥ ११॥

सत्वानां मातृभूताः सत्वमातृकल्पा। माता हि पुत्रस्य पञ्चविधमुपकारं करोति। गर्भेण धारयति। जनयति। आपाययति पोषयति संवर्धयति। अपायाद्रक्षते। अभिलापं च शिक्षयति। तत्साधर्म्येणैतानि पञ्चबोधिसत्वकर्माणि वेदितव्यानि। आर्यभूमिरार्यधर्मा वेदिवव्याः।

श्रद्धायाः सर्वसत्वेषु सर्वदा चावरोपणात्।
अधिशीलादिशिक्षायां विमुक्तौ च नियोजनात्॥ १२॥
बुद्धाध्येषणतश्चैषां आवृतेश्च विवर्जनात्।
पञ्चभिः कर्मभिः सत्वपितृकल्पा जिनात्मजाः॥ १३॥

पिता हि पुत्राणां पञ्चविधमुपकारं करोति। बीजं तेषामवरोपयति। शिल्पं शिक्षयति। प्रतिरूपैर्दारैर्नियोजयति। सन्मित्रेषूपनिक्षिपति। अनृणं करोति यथा न पैतृकमृणं दाप्यते। तत्साधर्म्येण बोधिसत्वानामेतानि पञ्च कर्माणि वेदितव्यानि। श्रद्धा हि सत्वानामार्यात्मभावप्रतिलम्भस्य बीजं। शैक्षाः शिल्पं। विमुक्तिर्भार्या विमुक्तिप्रीतिसुखसंवेदना। बुद्धाः कल्याणमित्राणि। आवरणमृणस्थानं।

अनर्हद्देशनां ये च सत्वानां गूहयन्ति हि।
शिक्षाविपत्तिं निन्दन्ति शंसन्त्येव च संपदं॥ १४॥
अववादं च यच्छन्ति मारानावेदयन्ति हि।
पञ्चभिः कर्मभिः सत्वबन्धुकल्पा जिनात्मजाः॥ १५॥

बन्धवो हि बन्धूनां पञ्चविधमुपकारं कुर्वन्ति। गुह्यं गूहयन्ति। कुचेष्टितं विगर्हन्ति। सुचेष्टितं प्रशंसन्ति। करणीयेषु साहाय्यं गच्छन्ति। व्यसनस्थानेभ्यश्च निवारयन्ति। तत्साधर्म्येणैतानि बोधिसत्वानां पञ्च कर्माणि वेदितव्यानि।



अनर्हेभ्यो गम्भीरधर्मदेशनाविनिगूहनात् शिक्षाविपत्तिसंपत्त्योर्यथाक्रमं निन्दनात्प्रशंसनाच्च। अधिगमायाववादात् मारकर्मवेदनाच्च।

संक्लेशे व्यवदाने च स्वयमश्रान्तबुद्धयः।
यच्छन्ति लौकिकीं कृत्स्नां संपदं चातिलौकिकीं॥ १६॥
सुखे हिते चाभिन्ना[1] ये सदा सुखहितैषिणः।
पञ्चभिः कर्मभिः सत्वमित्रकल्पा जिनात्मजाः॥ १७॥

तद्धि मित्रं यन्मित्रस्य हिते च सुखे चाविपर्यस्तं। सुखं चोपसंहरति हितं चाभेद्यं च भवति। हितसुखैषि च नित्यं। तथा बोधिसत्वाः सत्वानां पञ्चभिः कर्मभिर्मित्रकल्पा वेदितव्याः। लौकिकी हि संपत् सुखं। तया सुखानुभवात्। लोकोत्तरा हितं। क्लेशव्याधिप्रतिपक्षत्वात्।

सर्वदोद्यमवन्तो ये सत्वानां परिपाचने।
सम्यङ्निर्याणवक्तारः क्षमा विप्रतिपत्तिषु॥ १८॥
द्वयसंपत्तिदातारस्तदुपाये च कोविदाः।
पञ्चभिः कर्मभिः सत्वदासकल्पा जिनात्मजाः॥ १९॥

दासो हि पञ्चभिः कर्मभिः सम्यग् वर्तते। उत्थानसंपन्नो भवति कृत्येषु। अविसंवादको भवति। क्षमो भवति परिभाषणताडनादीनां। निपुणो भवति सर्वकार्यकरणात्। विचक्षणश्च भवति उपायज्ञः। तत्साधर्म्येणैतानि पञ्च कर्माणि बोधिसत्वानां वेदितव्यानि। द्वयसंपत्तिर्लौकिकी लोकोत्तरा च वेदितव्या।

अनुत्पत्तिकधर्मेषु क्षान्तिं प्राप्ताश्च ये मताः।
सर्वयानापदेष्टारः सिद्धयोगनियोजकाः॥ २०॥
सुमुखाः प्रतिकारे च विपाके चानपेक्षिणः।
पञ्चभिः कर्मभिः सत्वाचार्यकल्पा जिनात्मजाः॥ २१॥

पञ्चविधेन कर्मणा शिष्याणामुपकारी भवति। स्वयं सुशिक्षितो भवति। सर्वं शिक्षयति। क्षिप्रं शिक्षयति। सुमुखो भवति सुरतजातीयः। निरामिषचित्तश्च भवति। तत्साधर्म्येणैतानि बोधिसत्वानां पञ्च कर्माणि वेदितव्यानि।

सत्वकृत्यार्थमुद्युक्ताः संभारान्पूरयन्ति ये।
संभृतान्मोचयन्त्याशु विपक्षं हापयन्ति च॥ २२॥

[1] Ms. : अखेदित्वाभिन्ना.

लोकसंपत्तिभिश्चित्रैरलोकैर्योजयन्ति च।
पञ्चभिः कर्मभिः सत्वोपाध्यायकल्पा जिनात्मजाः[1] ॥ २३ ॥

उपाध्यायः पञ्चविधेन कर्मणा सार्धविहारिणामुपकारी[2] भवति। प्रव्राजयति उपसंपादयति। अनुशास्ति दोषपरिवर्जने। आमिषेण संगृह्णाति धर्मेण च। तत्साधर्म्येणैतानि बोधिसत्वानां पञ्च कर्माणि वेदितव्यानि। प्रतिकारविभागे द्वौ श्लोकौ।

असक्तया चैव भोगेषु शीलस्य च न खण्डनैः।
कृतज्ञतानुयोगाच्च प्रतिपत्तौ च योगतः ॥ २४ ॥
षट्सु पारमितास्वेव वर्तमाना हि देहिनः।
भवन्ति बोधिसत्वानां तथा प्रत्युपकारिणः ॥ २५ ॥

तथेति यथा तेषां बोधिसत्वा उपकारिणः। तत्र भोगेष्वनासक्तया दाने वर्तन्ते। शीलस्याखण्डनेन शीले। कृतज्ञतानुयोगात् क्षान्तौ। उपकारिबोधिसत्वस्य कृतज्ञतया ते हि क्षान्तिप्रिया इति। प्रतिपत्तियोगतो वीर्यध्यानप्रज्ञासु येन च प्रतिपद्यन्ते यत्र चेति कृत्वा। आशास्तिविभागे श्लोकः।

वृद्धिं हानिं च काङ्क्षन्ति सत्वानां च प्रपाचनं।
विशेषगमनं भूमौ बोधिं चानुत्तरां सदा ॥ २६ ॥

पञ्च स्थानानि बोधिसत्वाः सदैवाशंसन्ते। पारमितावृद्धिं। तद्विपक्षहानिं। सत्वपरिपाचनं। भूमिविशेषगमनं। अनुत्तरां च सम्यक्संबोधिं। अवन्ध्यप्रयोगविभागे श्लोकः।

त्रासहानौ समुत्पादे संशयच्छेदने ऽपि च।
प्रतिपत्त्यववादे च सदावन्ध्या जिनात्मजाः ॥ २७ ॥

चतुर्विधे सत्वार्थे बोधिसत्वानामवन्ध्यः प्रयोगो वेदितव्यः। गम्भीरोदार-

(1) Le dernier pāda est hypermètre, sans aucun soupçon d'erreur dans le texte.

(2) *Sārdhaṃvihārin*, mot nouveau. Cf. le pāli *saddhivihārī*. Childers traduit : « A fellow or brother priest », mais il ajoute : « The disciples or pupils of a thera are called his S.'s. ». En effet, le chinois traduit par *ti tse*, « disciple ».



धर्मत्रासयोगे। बोधिचित्तसमुत्पादे। उत्पादितबोधिचित्तानां संशयोपच्छेदने। पारमिताप्रतिपत्त्यववादे च। सम्यक्प्रयोगविभागे द्वौ श्लोकौ।

दानं निष्प्रतिकाङ्क्षस्य निःस्पृहस्य पुनर्भवे।
शीलं क्षान्तिश्च सर्वत्र वीर्यं सर्वशुभोदये ॥ २८ ॥
विना रूप्यं तथा ध्यानं प्रज्ञा चोपायसंहिता।
सम्यक्प्रयोगो धीराणां षट्सु पारमितासु हि ॥ २९ ॥

यथोक्तं रत्नकूटे[1]। विपाको ऽप्रतिकाङ्क्षिणो दानेनेति विस्तरः। परिहाणिविशेषभागीयधर्मविभागे द्वौ श्लोकौ।

भोगसक्तिः सच्छिद्रत्वं मानश्चैव सुखल्लिका।
आस्वादनं विकल्पश्च धीराणां हानिहेतवः ॥ ३० ॥
स्थितानां बोधिसत्वानां प्रतिपक्षेषु तेषु च।
ज्ञेया विशेषभागीया धर्मा एतद्विपर्ययात् ॥ ३१ ॥

षण्णां पारमितानां विपक्षा हानभागीयाः। तत्प्रतिपक्षा विशेषभागीया वेदितव्याः। प्रतिरूपकभूतगुणविभागे द्वौ श्लोकौ। एकः षट्पादः।

प्रवारणापि[2] कुहना सौमुख्यस्य च दर्शना।
लोभत्वेन तथा वृत्तिः शान्तवाक्कायता तथा ॥ ३२ ॥
सुवाक्करणसंपच्च प्रतिपत्तिविवर्जिता।
एते हि बोधिसत्वानामभूतत्वाय देशिताः।
विपर्ययात्प्रयुक्तानां तद्भूतत्वाय देशिताः ॥ ३३ ॥

षण्णां पारमितानां प्रतिरूपकाः षड् बोधिसत्वगुणाः प्रवारणादयो वेदितव्याः। शेषं गतार्थं। विनयविभागे श्लोकः।

ते दानाद्युपसंहारैः सत्वानां विनयन्ति हि।
षट्प्रकारं विपक्षं हि धीमन्तः सर्वभूमिषु ॥ ३४ ॥

(1) Ce titre désigne soit une collection considérable de sūtras (Nanj. 23; éd. de Tōkyō, II, 1-6) — soit un sūtra spécial, de peu d'étendue, et traduit deux fois en chinois, par Tchou Fa-hou en 307 (Nanj. 257; éd. de Tōkyō, II, 12), et par Jñānagupta, entre 585 et 592 (Nanj. 51; éd. de Tōkyo, II, 12). Je n'ai pas retrouvé le passage cité ici.

(2) *Pravāraṇā*, mot nouveau : « invitation ». Le sanskrit classique a *pravāraṇam*. Cf. pāli *pavāraṇā*.

षट्प्रकारो विपक्षः। षण्णां पारमितानां मात्सर्यदौःशील्यक्रोधकौसीद्यविक्षेपदौष्प्रज्ञ्यानि यथाक्रमं। शेषं गतार्थं। व्याकरणविभागे त्रयः श्लोकाः।

धीमद्व्याकरणं द्वेधा कालपुद्गलभेदतः।
बोधौ व्याकरणे चैव महच्चान्यदुदाहृतं ॥ ३५ ॥
नोत्पत्तिक्षान्तिलाभेन मानाभोगविहानितः।
एकीभावगमत्वाच्च सर्वबुद्धजिनात्मजैः ॥ ३६ ॥
क्षेत्रेण नाम्ना कालेन कल्पनाम्ना च तत्पुनः।
परिवारानुवृत्त्या च सद्धर्मस्य तदिष्यते ॥ ३७ ॥

तत्र पुद्गलभेदेन व्याकरणं गोत्रस्थोत्पादितचित्तसंमुखासमक्षपुद्गलव्याकरणात्। कालभेदेन परिमितापरिमितकालव्याकरणात्। पुनर्बोधौ व्याकरणं भवति। व्याकरणे वा एवंनामा तथागत एवममुष्मिन्काले व्याकरिष्यतीति। अन्यत्पुनर्महाव्याकरणं यदष्टम्यां भूमावनुत्पत्तिकधर्मक्षान्तिलाभतः। अहं बुद्धो भविष्यामीति मानप्रहाणतः। सर्वनिमित्तभोगप्रहाणतः। सर्वबुद्धबोधिसत्त्वैश्च सार्धमेकीभावोपगमनतः। तदात्मसंतानभेदादर्शनात्। पुनः क्षेत्रादिभिर्व्याकरणमीदृशे बुद्धक्षेत्रे एवंनामा इयता कालेन बुद्धो भविष्यति। एवंनामके कल्पे ईदृशश्चास्य परिवारो भविष्यति। एतावदन्तरं कालमस्य सद्धर्मानुवृत्तिर्भविष्यतीति। नियतिपातविभागे श्लोकः षट्पादः।

संपत्त्युत्पत्तिनैयम्यपातो[1] ऽखेदे च धीमतां।
भावनायाश्च सातत्ये समाधानाच्युतावपि।
कृत्यसिद्धावनाभोगे क्षान्तिलाभे च सर्वथा ॥ ३८ ॥

षट्पारमिताधिकारेण षड्विधो नियतिपात एष निर्दिष्टः। संपत्तिनियतिपातो नित्यमुदारभोगसंपत्तिलाभात्। उपपत्तिनियतिपातो नित्यं यथेष्टोपपत्तिपरिग्रहात्। अखेदनियतिपातो नित्यं संसारदुःखैरखेदात्। भावनासातत्यनियतिपातो नित्यं भावनासातत्यात्। समाधानाच्युतौ कृत्यसिद्धौ च नियतिपातो नित्यं समाध्यपरिहाणितः सत्त्वकृत्यसाधनतश्च। अनाभोगानु-

[1] *Naiyamya*, mot nouveau, glosé dans le commentaire par *niyati*, «fatalité». Le chinois traduit par *kiue-ting*, «définitivement fixé».



त्पत्तिकधर्मक्षान्तिलाभे नियतिपातश्च नित्यमनाभोगनिर्विकल्पज्ञानविहारात्। अवश्यकरणीयविभागे श्लोकः षट्पादः।

पूजा शिक्षासमादानं करुणा शुभभावना।
अप्रमादस्तथारण्ये श्रुतार्थातृप्तिरेव च।
सर्वभूमिषु धीराणामवश्यकरणीयता ॥ ३९ ॥

षट्पारमिता अधिकृत्येयं षड्विधावश्यकरणीयता। गतार्थः श्लोकः। सातत्यकरणीयविभागे द्वौ श्लोकौ।

कामेष्वादीनवज्ञानं स्खलितेषु निरीक्षणा।
दुःखाधिवासना चैव कुशलस्य च भावना ॥ ४० ॥
अनास्वादः सुखे चैव निमित्तानामकल्पना।
सातत्यकरणीयं हि धीमतां सर्वभूमिषु ॥ ४१ ॥

षट्पारमितापरिनिष्पादनार्थं षट् सातत्यकरणीयानि। गतार्थौ श्लोकौ। प्रधानवस्तुविभागे श्लोकः षट्पादः।

धर्मदानं शीलशुद्धिर्नोत्पत्तिक्षान्तिरेव च।
वीर्यारम्भो महायाने अन्त्या सकरुणा स्थितिः।
प्रज्ञा पारमितानां च प्रधानं धीमतां मतं ॥ ४२ ॥

षट्सु पारमितास्वेतत् षड्विधं प्रधानं। तत्र शीलविशुद्धिरार्यकान्तं शीलं। अन्त्या सकरुणा स्थितिश्चतुर्थं ध्यानं करुणाऽप्रमाणयुक्तं। शेषं गतार्थं। प्रज्ञप्तिव्यवस्थानविभागे चत्वारः श्लोकाः।

विद्यास्थानव्यवस्थानं सूत्राद्याकारभेदतः।
ज्ञेयं धर्मव्यवस्थानं धीमतां सर्वभूमिषु ॥ ४३ ॥
पुनः सत्यव्यवस्थानं सप्तधा तथताश्रयात्।
चतुर्धा च त्रिधा चैव युक्तियानव्यवस्थितिः ॥ ४४ ॥
योनिशश्च मनस्कारः सम्यग्दृष्टिः फलान्विता।
प्रमाणैर्विचयोऽचिन्त्यं ज्ञेयं युक्तिचतुष्टयं ॥ ४५ ॥
आशयाद्देशनाच्चैव प्रयोगात्संभृतेरपि।
समुदागमभेदाच्च त्रिविधं यानमिष्यते ॥ ४६ ॥

चतुर्विधं प्रज्ञप्तिव्यवस्थानं। धर्मसत्ययुक्तियानप्रज्ञप्तिव्यवस्थानभेदात्। तत्र

पञ्चविद्यास्थानव्यवस्थानं धर्मव्यवस्थानं वेदितव्यं सूत्रगेयादिभिराकारभेदैः । तदन्तर्भूतान्येव हि तदन्यानि विद्यास्थानानि महायाने बोधिसत्त्वेभ्यो देश्यन्ते। सत्यव्यवस्थानं तु सप्तविधां तथतामाश्रित्य प्रवृत्तितथतां लक्षणतथतां विज्ञप्तितथतां संनिवेशतथतां मिथ्याप्रतिपत्तितथतां सम्यक्प्रतिपत्तितथतां च । युक्तिप्रज्ञप्तिव्यवस्थानं चतुर्विधं। अपेक्षायुक्तिः । कार्यकारणयुक्तिः । उपपत्तिसाधनयुक्तिः । धर्मतायुक्तिश्च । यानप्रज्ञप्तिव्यवस्थानं त्रिविधं। श्रावकयानं। प्रत्येकबुद्धयानं । महायानं च । तत्रापेक्षायुक्तिस्त्रिष्वपि यानेषु योनिशोमनस्कारः । तमपेक्ष्य तेन प्रत्ययेन लोकोत्तरायाः सम्यग्दृष्टेरुत्पादात् । कार्यकारणयुक्तिः सम्यग्दृष्टिः सफला। उपपत्तिसाधनयुक्तिः । प्रत्यक्षादिभिः प्रमाणैः परीक्षा। धर्मतायुक्तिरचिन्त्यं स्थानं। सिद्धा हि धर्मता न पुनश्चिन्त्या। कस्मात् । योनिशोमनस्कारात् सम्यग्दृष्टिर्भवति । ततो वा क्लेशप्रहाणं फलमित्येवमादि । यानत्रयव्यवस्थानं पञ्चभिराकारैर्वेदितव्यं । आशयतो देशनातः प्रयोगतः संभारतः समुदागमतश्च। तत्र हीनां आशयदेशनाप्रयोगसंभारसमुदागमाः श्रावकयानं मध्याः प्रत्येकबुद्धयानं उत्तमा महायानं । यथाशयं हि यथाभिप्रायं धर्मदेशनाभिभवति । यथा देशनं तथा प्रयोगः । यथाप्रयोगं संभारः । यथासंभारं च बोधिसमुदागम इति। पर्येषणाविभागे श्लोकः ।

आगन्तुकत्वपर्येषा[1] अन्योन्यं नामवस्तुनोः ।
प्रज्ञप्तेर्द्विविधस्यात्र तन्मात्रत्वस्य वैषणा ॥ ४७ ॥

चतुर्विधा पर्येषणा धर्माणां। नामपर्येषणा वस्तुपर्येषणा[2]। स्वभावप्रज्ञप्तिपर्येषणा । विशेषप्रज्ञप्तिपर्येषणा च । तत्र नाम्नो वस्तुन्यागन्तुकत्वपर्येषणा नामपर्येषणा[2] वेदितव्या । वस्तुनो नाम्न्यागन्तुकत्वपर्येषणा वस्तुपर्येषणा वेदितव्या। तदुभयाभिसंबन्धे स्वभावविशेषप्रज्ञप्त्योः प्रज्ञप्तिमात्रत्वपर्येषणा स्वभावविशेषप्रज्ञप्तिपर्येषणा वेदितव्या । यथाभूतपरिहारविभागे दश श्लोकाः ।

सर्वस्यानुपलम्भाच्च भूतज्ञानं चतुर्विधं।
सर्वार्थसिद्ध्यै धीराणां सर्वभूमिषु जायते ॥ ४८ ॥

चतुर्विधं यथाभूतपरिज्ञानं धर्माणां नामपर्येषणागतं। वस्तुपर्येषणागतं। स्वभावप्रज्ञप्तिपर्येषणागतं । विशेषप्रज्ञप्तिपर्येषणागतं च । तच्च सर्वस्यास्य

[1] *Paryeṣā*, mot nouveau, substitué probablement pour des raisons métriques à *paryeṣaṇā*. — [2] Rétabli d'après le chinois.



नामादिकस्यानुपलम्भाद्वेदितव्यं । उत्तरार्धेन यथाभूतपरिज्ञानस्य कर्मणां माहात्म्यं दर्शयति।

प्रतिष्ठाभोगबीजं हि निमित्तं बन्धनस्य हि।
साश्रयाश्चित्तचैत्तास्तु बध्यन्ते ऽत्र सबीजकाः ॥ ४९ ॥

तत्र प्रतिष्ठानिमित्तं भाजनलोकः। भोगनिमित्तं पञ्च रूपादयो विषयाः। बीजनिमित्तं यत्तेषां बीजमालयविज्ञानं । यत्र त्रिविधे निमित्ते साश्रयाश्चित्तचैत्ता बध्यन्ते। यच्च तषां बीजमालयविज्ञानं। आश्रयाः पुनश्चक्षुरादयो वेदितव्याः ।

पुरतः स्थापितं यच्च निमित्तं यत्स्थितं स्वयं।
सर्वं विभावयन्धीमान् लभते बोधिमुत्तमां ॥ ५० ॥

तत्र पुरतः स्थापितं निमित्तं यच्छ्रुतचिन्ताभावनाप्रयोगेनालम्बनीकृतं परिकल्पितं । स्थितं स्वयमेव यत्प्रकृत्यालम्बनीभूतमयत्नपरिकल्पितं । तस्य विभावनाधिगमो नालम्बनीभावः । अकल्पना तदुपायो निमित्तप्रतिपक्षः । तच्चोभयं क्रमाद्भवति। पूर्वं हि स्थापितस्य पश्चात् स्वयंस्थितस्य। तत्र चतुर्विपर्यासानुगतं पुद्गलनिमित्तं विभावयन्योगी श्रावकबोधिं प्रत्येकबोधिं वा लभते । सर्वधर्मनिमित्तं विभावयन् महाबोधिं। एतेन यथातत्त्वं परिज्ञाय मोक्षाय संवर्तते यथाभूतं परिज्ञानं। तत्परिदीपितं।

तथतालम्बनं ज्ञानं द्वयग्राहविवर्जितं।
दौष्ठुल्यकायप्रत्यक्षं तत्क्षये धीमतां मतं ॥ ५१ ॥

एतेन यथास्वभावत्रयपरिज्ञानात् परतन्त्रस्वभावक्षयाय संवर्तते। तत्परिदीपितं। तथतालम्बनत्वेन परिनिष्पन्नं स्वभावं परिज्ञाय । द्वयग्राहविवर्जितत्वेन कल्पितं । दौष्ठुल्यकायप्रत्यक्षत्वेन परतन्त्रं । तस्यैव क्षयाय संवर्तते दौष्ठुल्यकायस्यालयविज्ञानस्य तत्क्षयार्थं तत्क्षये।

तथतालम्बनं ज्ञानमनानाकारभावितं।
सदसत्तार्थे प्रत्यक्षं विकल्पविभु चोच्यते ॥ ५२ ॥

अनानाकारभावितं निमित्ततथतयोरनानात्वदर्शनात् । एतेन श्रावकानिमित्ताद्बोधिसत्त्वानिमित्तस्य विशेषः परिदीपितः । ते हि निमित्तानिमित्तयोर्नानात्वं पश्यन्तु । सर्वनिमित्तानाममनसिकारादनिमित्तस्य च

धातोर्मनसिकारादनिमित्तं समापद्यन्ते । बोधिसत्वास्तु तथताव्यतिरेकेण निमित्तमपश्यन्तो निमित्तमेवानिमित्तं पश्यन्त्यतस्तेषां तज्ज्ञानमनानाकार-भावितं । सत्तार्थे च तथतायामसत्तार्थे च निमित्ते प्रत्यक्षं विकल्पविभु चोच्यते । विकल्पविभुत्वलाभाद्यथाविकल्पं सर्वार्थसमृद्धितः ।

तत्वं संछाद्य बालानामतत्वं ख्याति सर्वतः ।
तत्वं तु बोधिसत्वानां सर्वतः ख्यात्यपास्य तत् ॥ ५३ ॥

एतेन यथा बालानां स्वरसेनातत्वमेव ख्याति निमित्तं न तत्वं तथता । एवं बोधिसत्वानां स्वरसेन तत्वमेव ख्याति नातत्वमित्युपदर्शितं ।

अख्यानख्यानता ज्ञेया असदर्थसदर्थयोः ।
आश्रयस्य परावृत्तिर्मोक्षो ऽसौ कामचारतः ॥ ५४ ॥

असदर्थस्य निमित्तस्याख्यानता सदर्थस्य तथतायाः ख्यानता आश्रय-परावृत्तिर्वेदितव्या । तया हि तदख्यानं ख्यानं च । सैव च मोक्षो वेदितव्यः । किं कारणं । कामचारतः । तदा हि स्वतन्त्रो भवति स्वचित्तवशवर्ती प्रकृत्यैव निमित्तासमुदाचारात् ।

अन्योन्यं तुल्यजातीयः ख्यात्यर्थः सर्वतो महान् ।
अन्तरायकरस्तस्मात्परिज्ञायैनमुत्सृजेत् ॥ ५५ ॥

इदं क्षेत्रपरिशोधनोपाये यथाभूतपरिज्ञानं । भाजनलोकार्थो महानन्योन्यो वर्तमानस्तुल्यजातीयः ख्याति स एवायमिति । स चैवं ख्यानादन्तरायकरो भवति बुद्धक्षेत्रपरिशुद्धये । तस्मादन्तरायकरं परिज्ञायैनमुत्सृजेदेवं ख्यातं । अप्रमेयविभागे श्लोकः ।

परिपाच्यं विशोध्यं च प्राप्यं योग्यं च पाचने ।
सम्यक्त्वदेशनावस्तु अप्रमेयं हि धीमतां ॥ ५६ ॥

पञ्चविधं हि वस्तु बोधिसत्वानामप्रमेयं । परिपाच्यं वस्तु सत्वधातुरवि-शेषेण विशोध्यं लोकधातुर्भाजनलोकसंगृहीतः । प्राप्यं धर्मधातुः । परिपाचन-योग्यं विनेयधातुः । सम्यग्देशनावस्तु विनयोपायधातुः । देशनाफलविभागे द्वौ श्लोकौ ।

बोधिसत्वस्य चोत्पादो नोत्पादक्षान्तिरेव च ।
चक्षुश्च निर्मलं हीनमाश्रवक्षय एव च ॥ ५७ ॥



सद्धर्मस्य स्थितिर्दीर्घा व्युत्पत्तिच्छित्तिभोगता ।
देशनायाः फलं ज्ञेयं तत्प्रयुक्तस्य धीमतः ॥ ५८ ॥

देशनायां प्रयुक्तस्य बोधिसत्वस्याष्टविधं देशनायाः फलं वेदितव्यं । श्रोतृषु केचिद्बोधिचित्तमुत्पादयन्ति । केचिदनुत्पत्तिकधर्मक्षान्तिं प्रतिलभन्ते । केचिद्विरजो विगतमलं धर्मेषु धर्मचक्षुरुत्पादयन्ति हीनयानसंगृहीतं । केचि-दाश्रवक्षयं प्राप्नुवन्ति । सद्धर्मश्च चिरस्थितिको भवति परंपराधारणतया । अव्युत्पन्नानामर्थव्युत्पत्तिर्भवति । संशयितानां संशयच्छेदो भवति । विनिश्चि-तानां सद्धर्मसंभोगो भवति अनवद्यो प्रीतिरसः । महायानमहत्वविभागे द्वौ श्लोकौ ।

आलम्बनमहत्वं च प्रतिपत्तेर्द्वयोस्तथा ।
ज्ञानस्य वीर्यारम्भस्य उपाये कौशलस्य च ॥ ५९ ॥
उदागममहत्वं च महत्वं बुद्धकर्मणः ।
एतन्महत्वयोगाद्धि महायानं निरुच्यते ॥ ६० ॥

सप्तविधमहत्वयोगान्महायानमित्युच्यते । आलम्बनमहत्वेनाप्रमाणविस्तीर्ण-सूत्रादिधर्मयोगात् । प्रतिपत्तिमहत्वेन द्वयोः प्रतिपत्तेः स्वार्थे परार्थे च । ज्ञानमहत्वतो द्वयोर्ज्ञानात्पुद्गलनैरात्म्यस्य धर्मनैरात्म्यस्य च प्रतिवेधकाले । वीर्यारम्भमहत्वेन त्रीणि कल्पासंख्येयानि सातत्यसत्कृत्यप्रयोगात् । उपायकौ-शल्यमहत्वेन संसारापरित्यागासंक्लेशतः । समुदागममहत्वेन बलवैशारद्या-वेणिकबुद्धधर्मसमुदागमात् । बुद्धकर्ममहत्वेन च पुनः पुनरभिसंबोधिमहा-परिनिर्वाणसंदर्शनतः । महायानसंग्रहविभागे द्वौ श्लोकौ ।

गोत्रं धर्माधिमुक्तिश्च चित्तस्योत्पादना तथा ।
दानादिप्रतिपत्तिश्च न्यायावक्रान्तिरेव च ॥ ६१ ॥
सत्वानां परिपाकश्च क्षेत्रस्य च विशोधना ।
अप्रतिष्ठितनिर्वाणं बोधिः श्रेष्ठा च दर्शनात् ॥ ६२ ॥

एतेन दशविधेन वस्तुना कृत्स्नं महायानं संगृहीतं । तत्र सत्वानां परिपाचनं भूमिप्रतिष्ठस्य यावत्सप्तम्यां भूमौ वेदितव्यं । क्षेत्रपरिशोधनमप्रतिष्ठितनिर्वाणं चाविनिवर्तनीयायां भूमौ त्रिविधायां । श्रेष्ठा बोधिर्बुद्धभूमौ । तत्रैव चाभि-

संबोधिमहापरिनिर्वाणसंदर्शना वेदितव्या । शेषं गतार्थं । बोधिसत्वविभागे दश श्लोकाः ।

आधिमोक्षिक एकश्च शुद्धाध्याशयिको ऽपरः ।
निमित्ते चानिमित्ते च चार्यप्यनभिसंस्कृते ।
बोधिसत्वा हि विज्ञेयाः पञ्चैते सर्वभूमिषु ॥ ६३ ॥

तत्र निमित्तचारी द्वितीयां भूमिमुपादाय यावत् षष्ठ्यां । अनिमित्तचारी सप्तम्यां । अनभिसंस्कारचारी परेण । शेषं गतार्थं ।

कामेष्वसक्तस्त्रिविशुद्धकर्मा क्रोधाभिभूम्यं गुणतत्परश्च ।
धर्मे ऽचलस्तत्वगभीरदृष्टिर्बोधौ स्पृहावान् खलु बोधिसत्वः ॥ ६४ ॥[1]

एतेन षट्पारमिताप्रतिपत्तितो महाबोधिप्रणिधानतश्च बोधिसत्वलक्षणं परिदीपितं ।

अनुग्रहेक्षो ऽनुपघातदृष्टिः परोपघातेष्वधिवासकश्च ।
धीरो ऽप्रमत्तश्च बहुश्रुतश्च परार्थयुक्तः खलु बोधिसत्वः ॥ ६५ ॥

तत्र धीर आरब्धवीर्यो दुःखैरविषादात् । अप्रमत्तो ध्यानसुखेष्वसक्तः । शेषं गतार्थं ।

आदीनवज्ञः स्वपरिग्रहेषु भोगेष्वसक्तो ह्यनिगूढवैरः ।
योगी निमित्ते कुशलो ऽकुदृष्टिरध्यात्मसंस्थः खलु बोधिसत्वः ॥ ६६ ॥

तत्र भोगेष्वसक्तो यस्तान्विहाय प्रव्रजति । निमित्तकुशलः शमथादिनिमित्तत्रयकौशल्यात् । अध्यात्मसंस्थो महायानाविकम्पनात् । महायानं हि बोधिसत्वानामध्यात्मं । शेषं गतार्थं ।

दयान्वितो ह्रीगुणसंनिविष्टो दुःखाधिवासात्स्वसुखेष्वसक्तः ।
स्मृतिप्रधानः सुसमाहितात्मा यानाविकार्यः खलु बोधिसत्वः ॥ ६७ ॥

[1] Mètre indravajrā ou upajāti jusqu'au vers 72.



तत्र स्मृतिप्रधानो ध्यानवान् स्मृतिबलेन चित्तसमाधानात् । सुसमाहितात्मा निर्विकल्पज्ञानः । शेषं गतार्थं ।

दुःखापहो दुःखकरो न चैव दुःखाधिवासो न च दुःखभीतः ।
दुःखाद्विमुक्तो न च दुःखकल्पो दुःखाभ्युपेतः खलु बोधिसत्वः ॥ ६८ ॥

तत्र दुःखाद्विमुक्तो ध्यानवान् कामधातुवैराग्याद् दुःखदुःखतामोक्षतः । दुःखाभ्युपेतः संसाराभ्युपगमात् । शेषं गतार्थं ।

धर्मे रतो ऽधर्मरतः प्रकृत्या धर्मे जुगुप्सी[1] धरमाभियुक्तः[2] ।
धर्मे वशी धर्मनिरन्धकारो धर्मप्रधानः खलु बोधिसत्वः ॥ ६९ ॥

अत्र धर्मे जुगुप्सी अक्षान्तिजुगुप्सनात् । धर्मे वशी समापत्तौ । धर्मप्रधानो महाबोधिपरमः । धर्म एवात्र धरम उक्तो वृत्तानुवृत्त्या । शेषं गतार्थं ।

भोगाप्रमत्तो नियमाप्रमत्तो रक्षाप्रमत्तः कुशलाप्रमत्तः ।
सुखाप्रमत्तो धरमाप्रमत्तो यानाप्रमत्तो खलु बोधिसत्वः ॥ ७० ॥

तत्र रक्षाप्रमत्तः क्षान्तिमान् स्वपरचित्तानुरक्षणात् । धर्माप्रमत्तो यथाभूतधर्मप्रज्ञानात् । शेषं गतार्थं ।

विमानलज्जस्तनुदोषलज्ज अमर्षलज्जः परिहाणिलज्जः ।
विशाललज्जस्तनुदृष्टिलज्जः यानान्यलज्जः खलु बोधिसत्वः ॥ ७१ ॥

तत्र विमानलज्जो यो ऽर्थिनो न विमानयति । तनुदोषलज्जो ऽणुमात्रेष्ववद्येषु भयदर्शी । तनुदृष्टिलज्जो धर्मनैरात्म्यप्रतिवेधी । शेषं गतार्थं । सर्वैरेभिः श्लोकैः पर्यायान्तरेण षट्पारमिताप्रतिपत्तितो महाबोधिप्रणिधानतश्च बोधिसत्वलक्षणं परिदीपितं ।

इहापि चामुत्र उपेक्षणेन संस्कारयोगेन विभुत्वलाभैः ।
शमोपदेशेन महाफलेन अनुग्रहे वर्तति बोधिसत्वः ॥ ७२ ॥

इहैव सत्वानामनुग्रहे वर्तते दानेन । अमुत्र शीलेनोपपत्तिविशेषं प्राप्य । संस्कारयोगेनेति वीर्ययोगेन । महाफलेनेति बुद्धत्वेन । शेषं गतार्थं । एतेन

[1] *Jugupsin*, mot nouveau, adjectif tiré de *jugupsā*, «dégoût». Chinois : *ho*, «gourmander».

[2] *Dharama*, metri causa, pour *dharma*. De même encore, infra, au vers 70.

षड्भिः पारमिताभिर्महाबोधिप्रणिधानेन च यथा सत्वानुग्रहे बोधिसत्वो वर्तते तत्परिदीपितं। बोधिसत्वसामान्यनामविभागे अष्टौ श्लोकाः।

बोधिसत्वो महासत्वो धीमांश्चैवोत्तमद्युतिः।
जिनपुत्रो जिनाधारो विजेताथ जिनाङ्कुरः ॥ ७३ ॥[1]
विक्रान्तः परमाश्चर्यः सार्थवाहो महायशाः।
कृपालुश्च महापुण्य ईश्वरो धार्मिकस्तथा ॥ ७४ ॥

एतानि षोडश सर्वबोधिसत्वानामन्वर्थनामानि सामान्येन।

सुतत्वबोधैः सुमहार्थबोधैः सर्वावबोधैरपि नित्यबोधैः।
उपायबोधैश्च विशेषणेन तेनोच्यते हेतुन[2] बोधिसत्वः ॥ ७५ ॥[3]

पञ्चविधेन बोधविशेषेण बोधिसत्व इत्युच्यते। पुद्गलधर्मनैरात्म्यबोधेन। सर्वाकारसर्वार्थबोधेन अक्षयावबोधेन परिनिर्वाणसंदर्शने ऽपि। यथाविनेयं च विनयोपायबोधेन।

आत्मानुबोधात्तनुदृष्टिबोधाद्विचित्रविज्ञप्तिविबोधतश्च।
सर्वस्य चाभूतविकल्पबोधात्तेनोच्यते हेतुन बोधिसत्वः ॥ ७६ ॥

अत्र पुनश्चतुर्विधबोधविशेषं दर्शयति चित्तमनोविज्ञानबोधतः। तेषां चाभूतपरिकल्पत्वावबोधतः। तत्र चित्तमालयविज्ञानं। मनस्तदालम्बनमात्मदृष्ट्यादिसंप्रयुक्तं। विज्ञानं षड्विज्ञानकायाः।

अबोधबोधादनुबोधबोधादभावबोधात्प्रभवानुबोधात्।
अबोधबोधप्रतिबोधतश्च तेनोच्यते हेतुन बोधिसत्वः ॥ ७७ ॥

अत्र पुनः पञ्चविधं बोधविशेषं दर्शयति। अविद्याबोधात्। विद्याबोधात्। परिकल्पितादिस्वभावत्रयबोधाच्च। तत्राबोधत्वेन बोधप्रतिबोधात् परिनिष्पन्नस्वभावबोधो वेदितव्यः।

अनर्थबोधात्परमार्थबोधात्सर्वावबोधात्सकलार्थबोधात्।
बोद्धव्यबोधाश्रयबोधबोधात्तेनोच्यते हेतुन बोधिसत्वः ॥ ७८ ॥

(1) Mètre anuṣṭubh jusqu'au vers 74.

(2) *Hetuna*, metri causa, pour *hetunā*. De même dans les vers suivants.

(3) Mètre upajāti jusqu'au vers 80.



अत्र पञ्चविधं बोधविशेषं दर्शयति। परतन्त्रलक्षणबोधात्। परिनिष्पन्नलक्षणबोधात्। सर्वज्ञेयसर्वाकारबोधात्। बोध्यबोधकबोधित्रिमण्डलपरिशुद्धिबोधाच्च।

निष्पन्नबोधात्पदबोधतश्च गर्भानुबोधात् क्रमदर्शनस्य।
बोधाद्भृशं संशयहानिबोधात् तेनोच्यते हेतुन बोधिसत्वः ॥ ७९ ॥

तत्र निष्पन्नबोधो बुद्धत्वं। पदबोधो येन तुषितभवने वसति। गर्भानुबोधो येन मातुः कुक्षिमवक्रामति। क्रमदर्शने बोधो येन गर्भान्निष्क्रमणं कामपरिभोगं प्रव्रज्यां दुष्करचर्यामभिसंबोधिं च दर्शयति। भृशं संशयहानिबोधो येन सर्वसंशयच्छेदाय सत्वानां धर्मचक्रं प्रवर्तयति।

लाभी ह्यलाभी धीसंस्थितश्च[1] बोद्धानुबोद्धा प्रतिदेशकश्च।
निर्जल्पबुद्धिर्हतमानमानी ह्यपक्वसंपक्वमतिश्च धीमान् ॥ ८० ॥

अत्रैकादशविधेनातीतादिना बोधेन बोधिसत्वः परिदीपितः। तत्र लाभी अलाभी धीसंस्थितश्चातीतानागतप्रत्युत्पन्नैर्बोधैर्यथाक्रमं। बोद्धा स्वयंबोधात्। अनुबोद्धा परतो बोधादेतेनाध्यात्मिकबाह्यं बोधं दर्शयति। प्रतिदेशको निर्जल्पबुद्धिरित्यौदारिकसूक्ष्मं। मानी हतमानीति हीनप्रणीतं। अपक्वसंपक्वमतिश्चेति दूरान्तिकं बोधं दर्शयति।

महायानसूत्रालंकारे गुणाधिकारः समाप्तः

## XX-XXI

लिङ्गविभागे द्वौ श्लोकौ।

अनुकम्पा प्रियाख्यानं धीरता मुक्तहस्तता।
गम्भीरसंधिनिर्मोक्षो लिङ्गान्येतानि धीमतां ॥ १ ॥[2]
परिग्रहे ऽधिमुक्त्याप्तावखेदे द्वयसंग्रहे।
आशयाच्च प्रयोगाच्च विज्ञेयं लिङ्गपञ्चकं ॥ २ ॥

तत्र प्रथमेन श्लोकेन पञ्च बोधिसत्वलिङ्गानि दर्शयति। द्वितीयेन तेषां

(1) Substitution irrégulière d'une longue (*dhī*) à deux brèves.

(2) Mètre anuṣṭubh jusqu'au vers 14.

कर्म समाससंग्रहं च । तत्रानुकम्पा बोधिचित्तेन सत्वपरिग्रहार्थं प्रियाख्यानं सत्वानां बुद्धशासनाधिमुक्तिलाभार्थं धीरता दुष्करचर्यादिभिरखेदार्थं मुक्तहस्तता गम्भीरसंधिनिर्मोक्षणं च द्वयेन संग्रहार्थमामिषेण धर्मेण च यथाक्रमं । एषां पञ्चानां लिङ्गानां अनुकम्पा आशयतो वेदितव्या । शेषाणि प्रयोगतः । गृहिप्रव्रजितपक्षविभागे त्रयः श्लोकाः ।

बोधिसत्वा हि सततं भवन्तश्चक्रवर्तिनः ।
प्रकुर्वन्ति हि सत्वार्थं गृहिणः सर्वजन्मसु ॥ ३ ॥
आदानलब्धा प्रव्रज्या धर्मतोपगता परा ।
निदर्शिका च प्रव्रज्या धीमतां सर्वभूमिषु ॥ ४ ॥
अप्रमेयैर्गुणैर्युक्तः पक्षः प्रव्रजितस्य तु ।
गृहिणो बोधिसत्वाद्धि यतिस्तस्माद्विशिष्यते ॥ ५ ॥

एकेन श्लोकेन यादृशे गृहिपक्षे स्थितो बोधिसत्वः सत्वार्थं करोति तत्परिदीपितं । द्वितीयेन यादृशे प्रव्रजितपक्षे । तत्र त्रिविधा प्रव्रज्या वेदितव्या । समादानलब्धा । धर्मतालब्धा । निदर्शिका च निर्माणैः । तृतीयेन गृहिपक्षात् प्रव्रजितपक्षस्य विशेषः परिदीपितः । अध्याशयविभागे श्लोकः षट्पादः ।

परत्रेष्टफलेच्छा च शुभवृत्ताविहैव च ।
निर्वाणेच्छा च धीराणां सत्वेष्वाशय इष्यते ।
अशुद्धश्च विशुद्धश्च सुविशुद्धः सर्वभूमिषु [1] ॥ ६ ॥

एतेन समासतः पञ्चविधो ऽध्याशयः परिदीपितः । सुखाध्याशयः । परत्रेष्टफलेच्छा हिताध्याशयः इहैव कुशलप्रवृत्तीच्छा निर्वाणेच्छा तदुभयाध्याशय एवेति मान्यो वेदितव्यः । अशुद्धादिकास्त्रयो ऽध्याशया अप्रविष्टानां । भूमिप्रविष्टानां । अविनिवर्तनीयभूमिप्राप्तानां च यथाक्रमं वेदितव्याः । परिग्रहविभागे श्लोकः ।

प्रणिधानात्समाच्चित्तादाधिपत्यात्परिग्रहः ।
गणस्य कर्षणत्वाच्च धीमतां सर्वभूमिषु ॥ ७ ॥

चतुर्विधः सत्वपरिग्रहो बोधिसत्वानां प्रणिधानपरिग्रहो वेदितव्यो बोधिचित्तेन सर्वसत्वपरिग्रहणात् । समचित्ततापरिग्रह आत्मपरसमताला-

[1] Pāda hypermètre.



भादभिसमयकाले । आधिपत्यपरिग्रहः स्वामिभूतस्य येषामसौ स्वामी । गणपरिकर्षणपरिग्रहश्च शिष्यगणोपादानात् । उपपत्तिविभागे श्लोकः ।

कर्मणश्चाधिपत्येन प्रणिधानस्य चापरा ।
समाधेश्च विभुत्वस्य चोत्पत्तिर्धीमतां मता ॥ ८ ॥

चतुर्विधा बोधिसत्वानामुपपत्तिः कर्माधिपत्येन याधिमुक्तिचर्याभूमिस्थितानां कर्मवशेनाभिप्रेतस्थानोपपत्तिः प्रणिधानवशेन या भूमिप्रविष्टानां सर्वसत्वपरिपाचनार्थं तिर्यगादिहीनस्थानोपपत्तिः । समाध्याधिपत्येन या ध्यानानि व्यावर्त्य कामधातावुपपत्तिः । विभुत्वाधिपत्येन या निर्माणैस्तुषितभवनाद्युपपत्तिसंदर्शनात् । विहारभूमिविभागे त्रिंशत् श्लोकाः ।

लक्षणात्पुद्गलाच्छिक्षास्कन्धनिष्पत्तिलिङ्गतः ।
निरुक्तेः प्राप्तितश्चैव विहारो भूमिरेव च ॥ ९ ॥

लक्षणविभागमारभ्य पञ्च श्लोकाः ।

शून्यता परमात्मस्य कर्मनाशे व्यवस्थितिः ।
विहृत्य ससुखैर्ध्यानैर्जन्म कामे ततः परं ॥ १० ॥
ततश्च बोधिपक्षाणां संसारे परिणामना ।
विना च चित्तसंक्लेशं सत्वानां परिपाचना ॥ ११ ॥
उपपत्तौ च संचित्य संक्लेशस्यानुरक्षणा ।
एकायनपथश्लिष्टा ऽनिमित्तैकान्तिकः पथः ॥ १२ ॥
अनिमित्ते ऽप्यनाभोगः क्षेत्रस्य च विशोधना ।
सत्वपाकस्य निष्पत्तिर्जायते च ततः परं ॥ १३ ॥
समाधिधारणीनां च बोधेश्चैव विशुद्धता ।
एतस्माच्च व्यवस्थानाद्विज्ञेयं भूमिलक्षणं ॥ १४ ॥

एकादश विहारा एकादश भूमयः । तेषां लक्षणं । प्रथमायां भूमौ परमशून्यताभिसमयो लक्षणं पुद्गलधर्मनैरात्म्याभिसमयात् । द्वितीयायां कर्मणामविप्रणाशव्यवस्थानं कुशलाकुशलकर्मपथतत्फलवैचित्र्यज्ञानात् । तृतीयायां सातिशयसुखैर्बोधिसत्वध्यानैर्विहृत्यापरिहीनस्यैव तेभ्यः कामधातावुपपत्तिः । चतुर्थ्यां बोधिपक्षबहुलविहारिणो ऽपि बोधिपक्षाणां संसारे परिणामना । पञ्चम्यां चतुरार्यसत्यबहुलविहारितया विनात्मनश्चित्तसंक्लेशेन सत्वानां परिपाचनायां नानाशास्त्रशिल्पप्रणयनात् । षष्ठ्यां प्रतीत्यसमुत्पादबहुलविहा-



IMPRIMERIE NATIONALE.

रितया संचित्यभवोपपत्तौ तत्र संक्लेशस्यानुरक्षणा । सप्तम्यां मिश्रोपमिश्रत्वेनैकायनपथस्याष्टमस्य विहारस्य श्लिष्ट आनिमित्तिकैकान्तिको मार्गः । अष्टम्यामनिमित्ते ऽप्यनाभोगो निरभिसंस्कारानिमित्तविहारित्वाद् बुद्धक्षेत्रपरिशोधना च । नवम्यां प्रतिसंविद्वशितया सत्वपरिपाकनिष्पत्तिः सर्वाकारपरिपाचनसामर्थ्यात्। दशम्यां समाधिमुखानां धारणीमुखानां च विशुद्धता। एकादश्यां बुद्धभूमौ बोधिविशुद्धता लक्षणां सर्वज्ञेयावरणप्रहाणात्। भूमिष्ठे च पुद्गलविभागमारभ्य द्वौ श्लोकौ।

विशुद्धदृष्टिः सुविशुद्धशीलः समाहितो धर्मविभूतमानः।
संतानसंक्लेशविशुद्धिभेदे निर्माण एकक्षणलब्धबुद्धिः ॥ १५ ॥[1]
उपेक्षकः क्षेत्रविशोधकश्च स्यात्सत्वपाके कुशलो महर्द्धिः।
संपूर्णकायश्च निदर्शने च शक्तो ऽभिषिक्तः खलु बोधिसत्वः ॥ १६ ॥

दशसु भूमिषु दश बोधिसत्वा व्यवस्थाप्यन्ते। प्रथमायां विशुद्धदृष्टिः पुद्गलधर्मदृष्टिप्रतिपक्षज्ञानलाभात्। द्वितीयायां सुविशुद्धशीलः सूक्ष्मापत्तिस्खलितसमुदाचारस्याप्यभावात् । तृतीयायां समाहितो भवत्यच्युतध्यानसमाधिलाभात् । चतुर्थ्यां धर्मविभूतमानः सूत्रादिधर्मनानात्वमानस्य विभूतत्वात् । पञ्चम्यां संतानभेदे निर्माणे दशभिश्चित्ताशयविशुद्धिसमताभिः सर्वसंतानसमताप्रवेशात्। षष्ठ्यां संक्लेशव्यवदानभेदे निर्माणः प्रतीत्यसमुत्पादतथताबहुलविहारितया कृष्णशुक्लपक्षाभ्यां तथतायाः संक्लेशव्यवदानादर्शनात् । प्रकृतिविशुद्धितामुपादाय । सप्तम्यामेकचित्तक्षणलब्धबुद्धिर्निर्निमित्तविहारसामर्थ्यात् प्रतिक्षणं सप्तत्रिंशद्बोधिपक्षभावनातः । अष्टम्यामुपेक्षकः क्षेत्रविशोधकश्चानाभोगनिर्निमित्तविहारित्वाद् मिश्रोपमिश्रप्रयोगतश्चाविनिवर्तनीयभूमिप्रविष्टैर्बोधिसत्वैः । नवम्यां सत्वपरिपाककुशलः पूर्ववत्। दशम्यां बोधिसत्वभूमौ बोधिसत्वो महर्द्धिकश्च व्यवस्थाप्यते महाभिज्ञालाभात् । संपूर्णधर्मकायश्चाप्रमाणसमाधिधारणीमुखस्फुरणादाश्रयस्य निदर्शने च शक्तो व्यवस्थाप्यते तुषितभवनवासादिनिर्माणनिदर्शनात् । अभिषिक्तश्च बुद्धत्वे सर्वबुद्धेभ्यस्तत्राभिषेकलाभात्। शिक्षाव्यवस्थानमारभ्य पञ्च श्लोकाः।

धर्मतां प्रतिविध्येह अधिशीले ऽनुशिक्षणे।
अधिचित्ते ऽप्यधिप्रज्ञे प्रज्ञा तु द्वयगोचरा ॥ १७ ॥[2]
धर्मतत्वं तदज्ञानज्ञानाद्या वृत्तिरेव च।
प्रज्ञाया गोचरस्तस्माद् द्विभूमौ तद्व्यवस्थितिः ॥ १८ ॥

(1) Mètre upajāti jusqu'au vers 16. — (2) Mètre anuṣṭubh jusqu'au vers 24.



शिक्षाणां भावनायाश्च फलमन्यच्चतुर्विधं।
अनिमित्तससंस्कारो विहारः प्रथमं फलं ॥ १९ ॥
स एवानभिसंस्कारो द्वितीयं फलमिष्यते।
क्षेत्रशुद्धिश्च सत्वानां पाकनिष्पत्तिरेव च ॥ २० ॥
समाधिधारणीनां च निष्पत्तिः परमं फलं।
चतुर्विधं फलं ह्येतत् चतुर्भूमिसमाश्रितं ॥ २१ ॥

प्रथमायां भूमौ धर्मतां प्रतिविध्य द्वितीयायामधिशीलं शिक्षते । तृतीयायामधिचित्तं । चतुर्थीपञ्चमीषष्ठीष्वधिप्रज्ञं । बोधिपक्षसंगृहीता हि प्रज्ञा चतुर्थ्यां भूमौ। सा पुनर्द्वयगोचरा भूमिद्वये। द्वयं पुनर्धर्मतत्वं च दुःखादिसत्यं। तदज्ञानज्ञानादिका च वृत्तिरनुलोमः प्रतीत्यसमुत्पादः । तदज्ञानादिका हि वृत्तिरविद्यादिका। तज्ज्ञानादिका च वृत्तिर्विद्यादिका । तस्माद्भूमिद्वये ऽप्यधिप्रज्ञव्यवस्थानं । अतः परं चतुर्विधं शिक्षाफलं चतुर्भूमिसमाश्रितं वेदितव्यं यथाक्रमं। तत्र द्वितीयं फलं स एवानिमित्तो विहारो ऽनभिसंस्कारः क्षेत्रपरिशुद्धिश्च वेदितव्यं। शेषं गतार्थं। स्कन्धव्यवस्थानमारभ्य द्वौ श्लोकौ।

धर्मतां प्रतिविध्येह शीलस्कन्धस्य शोधना।
समाधिप्रज्ञास्कन्धस्य तत ऊर्ध्वं विशोधना ॥ २२ ॥
विमुक्तिमुक्तिज्ञानस्य तदन्यासु विशोधना।
चतुर्विधादावरणात् प्रतिघातावृतेरपि ॥ २३ ॥

तदन्यास्विति सप्तम्यां यावद् बुद्धभूमावुभयोर्विमुक्तिविमुक्तिज्ञानयोर्विशोधना। सा पुनर्विमुक्तिश्चतुर्विधफलावरणाच्च वेदितव्या । प्रतिघातावरणाच्च बुद्धभूमौ। येनान्येषां ज्ञेये ज्ञानं प्रतिहन्यते। बुद्धानां तु तद्विमोक्षात् सर्वत्राप्रतिहतं ज्ञानं। शेषं गतार्थं। निष्पत्तिव्यवस्थानमारभ्य त्रयः श्लोकाः।

अनिष्पन्नाश्च निष्पन्ना विज्ञेयाः सर्वभूमयः।
निष्पन्ना अप्यनिष्पन्ना निष्पन्नाश्च पुनर्मताः ॥ २४ ॥
निष्पत्तिर्विज्ञेया यथाव्यवस्थानमनसिकारेण।
तत्कल्पनताज्ञानादविकल्पनया च तस्यैव ॥ २५ ॥[1]
भावना अपि निष्पत्तिरचिन्त्यं सर्वभूमिषु।
प्रत्यात्मवेदनीयत्वात् बुद्धानां विषयादपि ॥ २६ ॥[2]

(1) Mètre āryā. — (2) Mètre anuṣṭubh jusqu'au vers 28.

तत्राधिमुक्तिचर्याभूमिरनिष्पन्ना । शेषा निष्पन्ना इत्येताः सर्वभूमयः । निष्पन्ना अपि पुनः सप्तानिष्पन्नाः । शेषा निष्पन्ना निरभिसंस्कारवाहित्वात् । यत्पुनः प्रमुदितादिभूमिर्निष्पन्ना पूर्वमुक्ता तत्र निष्पत्तिर्यथाव्यवस्थापितभूमिमनसिकारेण । तस्य भूमिव्यवस्थानस्य कल्पनामात्रज्ञानात् तदविकल्पना च वेदितव्या । यदा तद्भूमिव्यवस्थानं कल्पनामात्रं जानीते । तदपि च कल्पनामात्रं न विकल्पयत्येवं ग्राह्यग्राहकाविकल्पज्ञानलाभाद्भूमिपरिनिष्पत्तिरुक्ता भवति । अपि खलु भूमीनां भावना च निष्पत्तिश्चोभयमचिन्त्यं सर्वभूमिषु । तथा हि तद्बोधिसत्वानां प्रत्यात्मवेदनीयं बुद्धानां च विषयो नान्येषां । भूमिप्रतिष्ठस्य लिङ्गविभागमारभ्य द्वौ श्लोकौ ।

अधिमुक्तिर्हि सर्वत्र सालोका लिङ्गमिष्यते ।
अलीनत्वमदीनत्वमपरप्रत्ययात्मता ॥ २७ ॥
प्रतिवेधश्च सर्वत्र सर्वत्र समचित्तता ।
अनेयानुनयोपायज्ञानं मण्डलजन्म च ॥ २८ ॥

एतद्भूमिप्रविष्टस्य बोधिसत्वस्य दशविधं लिङ्गं सर्वासु भूमिषु वेदितव्यं । यां भूमिं प्रविष्टस्तत्र सालोको यां न प्रविष्टस्तत्राधिमुक्तिरित्येतदेकं लिङ्गं । अलीनत्वं परमोदारगम्भीरेषु धर्मेषु । अदीनत्वं दुष्करचर्यासु । अपरप्रत्ययत्वं स्वस्यां भूमौ । सर्वभूमिप्रतिवेधश्च तदभिनिर्हारकौशल्यतः सर्वसत्वेष्वात्मसमचित्तता । अनेया वर्णावर्णशब्दाभ्यां । अननुनयश्चक्रवर्तीत्यादिसंपत्तिषु । उपायकौशल्यमनुपलम्भस्तस्य बुद्धत्वोपायज्ञानात् । बुद्धपर्षन्मण्डलेषु चोत्पत्तिः सर्वकालमित्येतानि अपराणि लिङ्गानि बोधिसत्वस्य । भूमिषु पारमितालाभलिङ्गविभागे द्वौ श्लोकौ ।

नाछन्दो न च लुब्धह्रस्वहृदयो न क्रोधनो नालसो
नामैत्रीकरुणाशयो न कुमतिः कल्पैर्विकल्पैर्हतः ।
नो विक्षिप्तमतिः सुखैर्न च हतो दुःखैर्न वा वर्तते
सत्यं मित्रमुपाश्रितः श्रुतपरः पूजापरः शास्तरि ॥ २९ ॥[1]
सर्वं पुण्यसमुच्चयं सुविपुलं कृत्वान्यसाधारणं
संबोधौ परिणामयत्यहरहर्यो ह्युत्तमोपायवित् ।

[1] Mètre çārdūlavikrīḍita jusqu'au vers 30. Remarquer au premier pāda la finale de *lubdha* qui reste brève devant le groupe *hr* de *hrasva*. Cf. pour des cas analogues mon *Népal*, vol. II, p. 190, note.



जातः स्वायतने सदा शुभकरः क्रीडत्यभिज्ञागुणैः
सर्वेषामुपरिस्थितो गुणनिधिर्ज्ञेयः स बुद्धात्मजः ॥ ३० ॥

दशपारमितालाभिनो बोधिसत्वस्य षोडशविधं लिङ्गं दर्शयति । षोडशविधं लिङ्गं । सदा पारमिताप्रतिपत्तिछन्देनाविरहितत्वं । षट्पारमिताविपक्षैश्च रहितत्वं प्रत्येकं । अन्ययानमनसिकारेणाविक्षिप्तता । संपत्तिसुखेष्वसक्तता । विपत्तिदुष्करचर्यादुःखैः प्रयोगानिर्वर्तिता । कल्याणमित्राश्रयः । श्रुतपरत्वं । शास्तृपूजापरत्वं । सम्यक्परिणामना उपायकौशल्यपारमितया । स्वायतनोपपत्तिः प्रणिधानपारमितया बुद्धबोधिसत्वाविरहितस्थानोपपत्तेः । सदाशुभकरत्वे बलपारमितया तद्विपक्षधर्माव्यवकिरणात्[1] । अभिज्ञागुणविक्रीडनं च ज्ञानपारमितया । तत्र मैत्री व्यापादप्रतिपक्षः सुखोपसंहाराशयः । करुणा विहिंसाप्रतिपक्षो दुःखापगमाशयः । स्वभावकल्पनं कल्पः । विशेषकल्पनं विकल्पो वेदितव्यः । तत्रैवानुशंसविभागे श्लोकः ।

शमथे विपश्यनायां च द्वयपक्षात्मको मतः ।
धीमतामनुशंसो हि सर्वथा सर्वभूमिषु ॥ ३१ ॥[2]

तत्रैव पारमितालाभे सर्वभूमिषु बोधिसत्वानां सर्वप्रकारोऽनुशंसः पञ्चविधो वेदितव्यः । प्रतिक्षणं सर्वदौष्ठुल्याश्रयं द्रावयति । नानात्वसंज्ञाविगतिं च धर्मारामरतिः प्रतिलभते । अपरिच्छिन्नाकारं च सर्वतोऽप्रमाणं धर्मावभासं संजानीते । अविकल्पितानि चास्य विशुद्धिभागीयानि निमित्तानि समुदाचरन्ति । धर्मकायपरिपूरिपरिनिष्पत्तये च उत्तरादुत्तरतरं हेतुसंपरिग्रहं करोति । तत्र प्रथमद्वितीयौ शमथपक्षे वेदितव्यौ । तृतीयचतुर्थौ विपश्यनापक्षे । शेषमुभयपक्षे । भूमिनिरुक्तिविभागे नव श्लोकाः ।

पश्यता बोधिमासन्नां सत्वार्थस्य च साधनं ।
तीव्र उत्पद्यते मोदो मुदिता तेन कथ्यते ॥ ३२ ॥

अत्र न किंचिद्व्याख्येयं ।

दौःशील्याभोगवैमल्याद्विमला भूमिरुच्यते ।

[1] *Vyavakiraṇa*, mot nouveau. Le P. W. donne, sur le témoignage seul de la Vyutpatti, le mot *vyavakiraṇā*, et le rend par : « mélange ». Le chinois traduit ici : « Parce qu'il pratique sans intervalle les bonnes racines du bien ».

[2] Mètre anuṣṭubh jusqu'au vers 61. Le premier pāda est hypermètre.

दौःशील्यमलस्यान्ययानमनसिकारमलस्य चातिक्रमाद्विमलेत्युच्यते। तस्मात्तर्ह्यस्याभिसुख्याभिनिर्हारे सर्वाकारपरिशोधनाभिनिर्हार एव योगः करणीय इति वचनात्।

महाधर्मावभासस्य करणाच्च प्रभाकरी ॥ ३३ ॥

तथा हि तस्यां समाधिबलेनाप्रमाणधर्मपर्येषणधारणात् महान्तं धर्मावभासं परेषां करोति।

अर्चिर्भूता यतो धर्मा बोधिपक्षाः प्रदाहकाः।
अर्चिष्मतीति तद्योगात्सा भूमिर्द्वयदाहतः ॥ ३४ ॥

सा हि बोधिपक्षात्मिका प्रज्ञा द्वयदहनप्रत्युपस्थाना तस्यां बाहुल्येन। द्वयं पुनः क्लेशावरणं ज्ञेयावरणं चात्र वेदितव्यं।

सत्वानां परिपाकश्च स्वचित्तस्य च रक्षणा।
धीमद्भिर्जीयते दुःखं दुर्जया तेन कथ्यते ॥ ३५ ॥

तत्र सत्वपरिपाकाभियुक्तो ऽपि न संक्लिश्यते। सत्वविप्रतिपत्त्या तच्चोभयं दुष्करत्वाद् दुर्जयं।

आभिमुख्याद् द्वयस्येह संसारस्यापि निर्वृतेः।
उक्ता ह्यभिमुखी भूमिः प्रज्ञापारमिताश्रयात् ॥ ३६ ॥

सा हि प्रज्ञापारमिताश्रयेण निर्वाणसंसारयोरप्रतिष्ठानात् संसारनिर्वाणयोरभिमुखी।

एकायनपथश्लेषाद्भूमिर्दूरंगमा मता।

एकायनपथः पूर्वं निर्दिष्टस्तदुपश्लिष्टत्वात् दूरं गता भवति प्रयोगपर्यन्तगमनात्।

द्वयसंज्ञाविचलनादचला च निरुच्यते ॥ ३७ ॥

द्वाभ्यां संज्ञाभ्यां अविचलनात्। निमित्तसंज्ञया अनिमित्ताभोगसंज्ञया च।

प्रतिसंविन्मतिसाधुत्वाद्भूमिः [1] साधुमती मता।

[1] Pāda hypermètre.



प्रतिसंविन्मतेः साधुत्वादिति प्रधानत्वात्।

धर्ममेघा द्वयव्याप्तेर्धर्माकाशस्य मेघवत् ॥ ३८ ॥

द्वयव्याप्तेरिति समाधिमुखधारणीमुखव्यापनान्मेघेनेवाकाशस्यालीयस्याश्रयसंनिविष्टस्य श्रुतधर्मस्य धर्ममेघेत्युच्यते।

विविधे शुभनिर्हारे रत्या विहरणात्सदा।
सर्वत्र बोधिसत्वानां विहारभूमयो मताः ॥ ३९ ॥

विविधकुशलाभिनिर्हारनिमित्तं सदा सर्वत्र रत्या विहरणाद्बोधिसत्वानां भूमयो विहारा इत्युच्यन्ते।

भूयो भूयो ऽमितास्वासु ऊर्ध्वगमनयोगतः।
भूतामिताभयार्थाय त एवेष्टा हि भूमयः ॥ ४० ॥

भूयो भूयो ऽमितास्वासूर्ध्वगमनयोगाद्भूतामिताभयार्थाय त एव विहाराः पुनर्भूमय उच्यन्ते। अमितास्विति दशसु भूमिषु एकैकस्याप्रमाणत्वात्। ऊर्ध्वगमनयोगादिति उपरिभूमिगमनयोगात्। भूतामिताभयार्थमित्यमितानां भूतानां भयप्रहाणार्थं। प्राप्तिविहारे श्लोकः।

भूमिलाभे ऽधिमुक्तेश्च चरितेषु च वर्तनात्।
प्रतिवेधाच्च भूमीनां निष्पत्तेश्च चतुर्विधः ॥ ४१ ॥

चतुर्विधो भूमीनां लाभः। अधिमुक्तिलाभो यथोक्ताधिमुक्तितो ऽधिमुक्तिचर्याभूमौ। चरितलाभो दशसु धर्मचरितेषु वर्तनात्तस्यामेव। परमार्थलाभः परमार्थप्रतिवेधतो भूमिप्रवेशे। निष्पत्तिलाभस्त्वाविनिवर्तनीयभूमिप्रवेशे। चर्याविभागे श्लोकः षट्पादः।

महायाने ऽधिमुक्तानां हीनयाने च देहिनां।
द्वयोरावर्जनार्थाय विनयाय च देशिताः।
चर्यास्चतस्रो धीराणां यथासूत्रानुसारतः ॥ ४२ ॥

तत्र पारमिताचर्या महायानाधिमुक्तानामर्थे देशिता। बोधिपक्षचर्या श्रावकप्रत्येकबुद्धयानाधिमुक्तानां। अभिज्ञाचर्या द्वयोरपि महायानहीनयानाधिमुक्तयोः प्रभाविणावर्जनार्थं। सत्वपरिपाकचर्या द्वयोरेव परिपाच-

नार्थं। परिपाचनं ह्यत्र विनयनं । बुद्धगुणविभागे बहवः श्लोकाः । अप्रमाणविभागे तद्‌ बुद्धस्तोत्रमारभ्यैकः ।

अनुकम्पक सत्त्वेषु संयोगविगमाशय ।
अवियोगाशय सौख्यहिताशय नमो ऽस्तु ते ॥ ४३ ॥

अनुकम्पकत्वं सत्त्वेषु हितसुखाशयत्वेन संदर्शितं । सुखाशयत्वं पुनः सुखसंयोगाशयत्वेन मैत्र्या । दुःखवियोगाशयत्वेन च करुणया । सुखावियोगाशयत्वेन च मुदितया । हिताशयत्वमुपेक्षया । सा पुनर्निःसंक्लेशताशयलक्षणा वेदितव्या । विमोक्षाभिभ्वायतनकृत्स्नायतनविभागे श्लोकः ।

सर्वावरणनिर्मुक्त सर्वलोकाभिभू मुने ।
ज्ञानेन ज्ञेयं व्याप्तं ते मुक्तचित्त नमो ऽस्तु ते ॥ ४४ ॥

अत्र विमोक्षविशेषं भगवतः सर्वक्लेशज्ञेयावरणनिर्मुक्ततया दर्शयति । अभिभ्वायतनविशेषं सर्वलोकाभिभुत्वेन । स्वचित्तवशवर्तनाद्यथेष्टालम्बननिर्माणपरिणामनताधिष्ठानतः । कृत्स्नायतनविशेषं सर्वज्ञेयज्ञानाव्याघाततः । अत एव विमोक्षादिगुणविपक्षमुक्तत्वात्‌ मुक्तचित्तः । अरणाविभागे[1] श्लोकः ।

अशेषं सर्वसत्त्वानां सर्वक्लेशविनाशक ।
क्लेशप्रहारक क्लिष्टसानुक्रोश नमो ऽस्तु ते ॥ ४५ ॥

अत्रारणाविशेषं भगवतः सर्वसत्त्वक्लेशविनयनादुत्पादितक्लेशेष्वपि च तत्क्लेशप्रतिपक्षविधानात्‌ क्लिष्टजनानुकम्पया संदर्शयति । अन्ये ह्यरणाविहारिणः सत्त्वानां कस्यचिदेव तदालम्बनस्य क्लेशस्योत्पत्तिप्रत्ययमात्रं प्रतिहरन्ति । न तु क्लेशसंतानादपनयन्ति । प्रणिधिज्ञानविशेषे श्लोकः ।

अनाभोग निरासङ्ग अव्याघात समाहित ।
सदैव सर्वप्रश्नानां विसर्जक नमो ऽस्तु ते ॥ ४६ ॥

अत्र पञ्चभिराकारैः प्रणिधिज्ञानविशेषं भगवतः संदर्शयति । अनाभोगसंमुखीभावतः । असक्तिसंमुखीभावतः । सर्वज्ञेयाव्याघाततः । सदा समाहित-

[1] *Araṇā*. Le P. W², s. v. *araṇā-vihārin* (suppl. 3 et 4), corrige *araṇā* en *ārya*. Mais le terme *araṇā* appartient à la langue du bouddhisme. Le chinois traduit par *wou tcheng*, «sans reproche».



त्वतः । सर्वसंशयच्छेदनतश्च सत्त्वानां । अन्ये हि प्रणिधिज्ञानलाभिनो नानाभोगान्‌ प्रणिधाय प्रणिधिज्ञानं संमुखीकुर्वन्ति । न चासक्तं समापत्तिप्रवेशापेक्षत्वात्‌ । न चाव्याहतं प्रदेशज्ञानात्‌ । न च सदा समाहिता भवन्ति । न च सर्वसंशयांश्छिन्दन्ति । प्रतिसंविद्विभागे श्लोकः ।

आश्रये ऽथाश्रिते देश्ये वाक्ये ज्ञाने च देशिके ।
अव्याहतमते नित्यं सुदेशिक नमो ऽस्तु ते ॥ ४७ ॥

अत्र समासतो यच्च देश्यते येन च देश्यते तत्र नित्यमव्याहतमतित्वेन भगवतश्चतस्रः प्रतिसंविदो देशिताः । तत्र द्वयं देश्यते आश्रयश्च धर्मः । तदाश्रितश्चार्थः । द्वयेन देश्यते वाचा ज्ञानेन च । सुदेशिकत्वेन तासां कर्म संदर्शितं । अभिज्ञाविभागे श्लोकः ।

उपेत्य वचनैस्तेषां चरिज्ञ[1] आगतौ गतौ ।
निःसारे चैव सत्त्वानां स्ववвाद नमो ऽस्तु ते ॥ ४८ ॥

अत्र षड्भिरभिज्ञाभिः सम्यगववादत्वं भगवतो दर्शितं । उपेत्य विनेयसकाशमृद्ध्यभिज्ञया । तेषां भाषया दिव्यश्रोत्राभिज्ञया चित्तचरित्रं ज्ञात्वा चेतःपर्यायाभिज्ञया यथा पूर्वान्तादिहागतिर्यथा चापरान्ते गतिर्यथा च संसारान्निःसरणं । तत्राववादं ददात्यवशिष्टाभिस्तिसृभिरभिज्ञाभिर्यथाक्रमं । लक्षणानुव्यञ्जनविभागे श्लोकः ।

सत्पौरुष्यं प्रपद्यन्ते त्वां दृष्ट्वा सर्वदेहिनः ।
दृष्टमात्रात्प्रसादस्य विधायक नमो ऽस्तु ते ॥ ४९ ॥

अत्र लक्षणानुव्यञ्जनानां भगवति महापुरुषत्वसंप्रत्ययेन दर्शनमात्रात्परेषां प्रसादजनकत्वं कर्म संदर्शितं । परिशुद्धिविभागे श्लोकः ।

आदानस्थानसंत्यागनिर्माणपरिणामने ।
समाधिज्ञानवशितामनुप्राप्त नमो ऽस्तु ते ॥ ५० ॥

अत्र भगवतश्चतुर्विधया वशितया सर्वाकारास्चतस्रः परिशुद्धयः परिदी-

[1] *Cari-jña*. Le mot *cari* (= *caryā*) se retrouve dans un passage du Mañjuçrī-buddhakṣetravyūhālaṃkāra-sūtra cité dans le Çikṣā-samuccaya, 13, 18.

पिताः । आश्रयपरिशुद्धिरात्मभावस्यादानस्थानत्यागवशितया । आलम्बनपरिशुद्धिर्निर्माणपरिणामनवशितया । चित्तपरिशुद्धिः सर्वाकारसमाधिवशितया । प्रज्ञापरिशुद्धिः सर्वाकारज्ञानवशितया । बलविभागे श्लोकः ।

उपाये शरणे शुद्धौ सत्वानां विप्रवादने ।
महायाने च निर्याणे मारभञ्ज नमो ऽस्तु ते ॥ ५१ ॥

अत्र चतुर्ष्वर्थेषु सत्वानां विप्रवादनाय मारो यस्तद्भञ्जकत्वेन भगवतो दशानां बलानां कर्म संदर्शितं । यदुत सुगतिदुर्गतिगमनाद्युपायविप्रवादने । अशरणे देवादिषु शरणविप्रवादने । साश्रवशुद्धिमात्रेण शुद्धिविप्रवादने । महायाननिर्याणविप्रवादने च । स्थानास्थानज्ञानबलेन हि भगवान्प्रथमे ऽर्थे मारभञ्जको वेदितव्यः । कर्मविपाकज्ञानबलेन द्वितीये । ध्यानविमोक्षसमाधिसमापत्तिज्ञानबलेन तृतीये । इन्द्रियपरापरत्वादिज्ञानबलेन चतुर्थे । हीनानोन्द्रियादीनि वर्जयित्वा श्रेष्ठसंनियोजनात् । वैशारद्यविभागे श्लोकः ।

ज्ञानप्रहाणनिर्याणविघ्नकारकदेशिक ।
स्वपरार्थे ऽन्यतीर्थ्यानां निराधृष्य नमो ऽस्तु ते ॥ ५२ ॥

अत्र ज्ञानप्रहाणकारकत्वेन स्वार्थे । निर्याणविघ्नदेशिकत्वेन च परार्थे । निराधृष्यत्वादन्यतीर्थ्यैर्भगवतो यथाक्रमं चतुर्विधं वैशारद्यमुद्भावितं । आरक्षस्मृत्युपस्थानविभागे श्लोकः ।

विगृह्यवक्ता पर्षत्सु द्वयसंक्लेशवर्जित ।
निरारक्ष असंमोष[1] गणकर्ष नमो ऽस्तु ते ॥ ५३ ॥

अनेन त्रीण्यरक्षाणि त्रीणि च स्मृत्युपस्थानानि भगवतः परिदीपितानि । तेषां च कर्म गणपरिकर्षकत्वं । तैर्हि यथाक्रमं विगृह्यवक्ता च भवति पर्षत्सु निरारक्षत्वात् । द्वयसंक्लेशवर्जितश्चानुनयप्रतिघाभावादसंमोषतया सदाभूयस्थितस्मृतित्वात् । वासनासमुद्घातविभागे श्लोकः ।

चारे विहारे सर्वत्र नास्त्यसर्वज्ञचेष्टितं ।
सर्वदा तव सर्वज्ञ भूतार्थिक नमो ऽस्तु ते ॥ ५४ ॥

अनेन चारे विहारे वा सर्वत्र सर्वदा वासर्वज्ञचेष्टितस्याभावात् भगवतः

[1] *Sammoṣa*, mot nouveau. Cf. le pāli *sammoso*, «confusion». Le chinois traduit : *pou wang nien*, «qui se rappelle sans oubli». De même inf., v. 55.



सर्वक्लेशवासनासमुद्घातः परिदीपितः । असर्वज्ञो हि क्षीणक्लेशो ऽप्यसमुद्घाततित्वाद् वासनाया एकदा भ्रान्तेन हस्तिना सार्धं समागच्छति भ्रान्तेन रथेनेत्येवमादिकमसर्वज्ञचेष्टितं करोति । यथोक्तं माण्डव्यसूत्रे[1] । तच्च भगवतो भूतार्थसर्वज्ञत्वं नास्ति । असंमोषताविभागे श्लोकः ।

सर्वसत्वार्थकृत्येषु कालं त्वं नातिवर्तसे ।
अबन्ध्यकृत्य सततमसंमोष नमो ऽस्तु ते ॥ ५५ ॥

अनेन यस्य सत्वस्य यो ऽर्थः करणीयो यस्मिन्काले तत्कालानतिवर्तनात् अबन्ध्यं कृत्यं सदा भगवत इत्यसंमोषधर्मत्वं स्वभावतः कर्मतश्च संदर्शितं । महाकरुणाविभागे श्लोकः ।

सर्वलोकमहोरात्रं षट्कृत्वः प्रत्यवेक्षसे ।
महाकरुणया युक्त हिताशय नमो ऽस्तु ते ॥ ५६ ॥

अत्र महाकरुणा भगवतः कर्मतः स्वभावतश्च परिदीपिता । महाकरुणया हि भगवान् षट्कृत्वो रात्रिन्दिवेन लोकं प्रत्यवेक्षते को हीयते को वर्धते इत्येवमादि । तद्योगाच्च भगवान् सर्वसत्वेषु नित्यं हिताशयः । आवेणिकगुणविभागे श्लोकः ।

चारेणाधिगमेनापि ज्ञानेनापि च कर्मणा ।
सर्वश्रावकप्रत्येकबुद्धोत्तम नमो ऽस्तु ते ॥ ५७ ॥

अत्र चारसंगृहीतैः षड्भिरावेणिकैर्बुद्धधर्मैः । अधिगमसंगृहीतैः षड्भिः । ज्ञानसंगृहीतैस्त्रिभिः । कर्मसंगृहीतैश्च त्रिभिः । तदन्यसत्वोत्तमानामपि श्रावकप्रत्येकबुद्धानामन्तिकादुत्तमत्वेन सर्वसत्वोत्तमत्वं भगवतः परिदीपितं । तत्र नास्ति तथागतस्य स्खलितं । नास्ति रवितं । नास्ति मुषिता स्मृतिः । नास्त्यसमाहितं चित्तं । नास्ति नानात्वसंज्ञा । नास्त्यप्रतिसंख्यायोपेक्षेति चारसंगृहीताः षडावेणिका बुद्धधर्मा ये बुद्धस्यैव संविद्यन्ते नान्येषां । नास्ति छन्दपरिहाणिर्नास्ति वीर्यस्मृतिसमाधिप्रज्ञाविमुक्तिपरिहाणिरित्यधिगमसंगृहीताः षट् । अतीते ऽध्वनि तथागतस्यासङ्गमप्रतिहतं ज्ञानं । अनागते प्रत्युत्पन्ने ऽध्वनि तथागतस्यासङ्गमप्रतिहतं ज्ञानमिति ज्ञानसंगृहीतास्त्रयः । सर्वं तथा-

[1] Le *Māṇḍavya-sūtra* m'est inconnu. Le chinois supprime la référence et la citation qui suit.

गतस्य कायकर्म ज्ञानपूर्वंगमं ज्ञानानुपरिवर्ति । सर्वं वाक्कर्म सर्वं मनस्कर्मेति कर्मसंगहीतास्त्रयः । सर्वाकारज्ञताविभागे श्लोकः ।

त्रिभिः कायैर्महाबोधिं सर्वाकारामुपागत ।
सर्वत्र सर्वसत्वानां काङ्क्षाच्छिद् नमो ऽस्तु ते ॥ ५८ ॥

अनेन त्रिभिश्च कायैः सर्वाकारबोध्युपगमत्वात् सर्वज्ञेयसर्वाकारज्ञानाच्च सर्वाकारज्ञता भगवतः परिदीपिता । त्रयः कायाः स्वाभाविकः सांभोगिको नैर्माणिकश्च । सर्वज्ञेयसर्वाकारज्ञानं पुनरत्र सर्वसत्वानां देवमनुष्यादीनां सर्वसंशयच्छेदेन कर्मणा निर्दिष्टं । पारमितापरिपूरिविभागे श्लोकः ।

निरवग्रह निर्दोष निष्कालुष्यानवस्थित ।
आनिङ्क्ष्य[1] सर्वधर्मेषु निष्प्रपञ्च नमो ऽस्तु ते ॥ ५९ ॥

अनेन सकलषट्पारमिताविपक्षनिर्मुक्ततया षट्पारमितापरिपूरिर्भगवत उद्भाविता । तत्रानवग्रहत्वं भोगनिराग्रहत्वाद्वेदितव्यं । निर्दोषत्वं निर्मलकायादिकर्मत्वात् । निष्कालुष्यत्वं लोकधर्मदुःखाभ्यां चित्ताकलुषीकरणात् । अनवस्थितत्वमल्पावरणमात्राधिगमानवस्थानात् । आनिङ्क्ष्यत्वमविक्षेपात् । निष्प्रपञ्चत्वं सर्वविकल्पप्रपञ्चासमुदाचारात् । बुद्धलक्षणविभागे द्वौ श्लोकौ ।

निष्पन्नपरमार्थो ऽसि सर्वभूमिविनिःसृतः ।
सर्वसत्वाग्रतां प्राप्तः सर्वसत्वविमोचकः ॥ ६० ॥
अक्षयैरसमैर्युक्तो गुणैर्लोकेषु दृश्यसे ।
मण्डलेष्वप्यदृश्यश्च सर्वथा देवमानुषैः ॥ ६१ ॥

अत्र षड्भिः स्वभावहेतुफलकर्मयोगवृत्त्यर्थैर्बुद्धलक्षणं परिदीपितं । तत्र विशुद्धा तथता निष्पन्नः परमार्थः । स च बुद्धानां स्वभावः । सर्वबोधिसत्वभूमिनिर्यातत्वं हेतुः । सर्वसत्वाग्रतां प्राप्तत्वं फलं । सर्वसत्वविमोचकत्वं कर्म । अक्षयासमगुणयुक्तत्वं योगः । नानालोकधातुषु दृश्यमानता निर्माणकायेन

[1] *Āniṅkṣya.* Le mot étant écrit ainsi deux fois, je ne me suis pas permis de le corriger. Le chinois traduit : *pou tong*, «immobile, immuable». Il s'agit donc évidemment d'un mot apparenté à *āniñjya*, pāli *ānejja*.



पर्षन्मण्डलेष्वपि दृश्यमानता सांभोगिकेन कायेन । सर्वथा चादृश्यमानता धर्मकायेनेति त्रिविधा प्रभेदवृत्तिरिति ।

महायानसूत्रालंकारेषु[1] व्यवदातसमयमहाबोधिसत्वभाषिते
चर्याप्रतिष्ठाधिकारो नामैकविंशतितमो ऽधिकारः

समाप्तश्च महायानसूत्रालंकार इति ॥

[1] *Sic* ms.

# APPENDICE.

(अ)भ्युपगमनमित्युच्यते। सा चाश्रयपरिवृत्तिपरिनिष्पत्तिः। तत्समत्वात्। दर्शनमार्गाद्यवस्थायामपि परिवृत्तिसद्भावादिह परिनिर्देशो निःशेषमलप्रहाणात्। सा चाश्रयपरिनिवृत्तिः कथं प्रवेष्टव्या कथं वा तत्प्रवेशो निरुत्तरो भवतीत्याह। दशभिराकारैराश्रयपरिवृत्तिप्रवेशो निरुत्तरः। दशभिरिति वक्ष्यमाणैः स्वभाववस्तुपुद्गलविशेषप्रयोजनाश्रयमनसिकाराप्रयोगादीनवानुशंसप्रवेशैः। तत्रादौ स्वभावप्रवेशस्तथतावैमल्यमागन्तुकमलतथता अप्रख्यानप्रख्यानाय। यत्तथतावैमल्यत्वमागन्तुकमलाप्रख्यानाय तथतामात्रप्रख्यानाय च स स्वभाव आश्रयपरिवृत्तेरेवं यत्परिज्ञानमयमुच्यते स्वभावप्रवेशो निरुत्तर इति। तत्र वस्तुप्रवेशः साधारणभाजनविज्ञप्तितथतापरिवृत्तिः सूत्रान्तधर्मधातुतथतापरिवृत्तिरसाधारणसत्त्वधातुविज्ञप्तितथतापरिवृत्तिश्च। आश्रयपरिवृत्तेस्त्रिविधतथतापरिवृत्तिर्वस्तु तदत्ययभेदात्। फलभेदाच्च संप्रख्यानदेशनादर्शनविशेषफलभेदतः। तत्र पुद्गलप्रवेशो द्वे आद्ये तथतापरिवृत्ती बुद्धबोधिसत्त्वानां नान्येषामसाधारणत्वात्। पश्चिमा श्रावकप्रत्येकबुद्धानामपि अपि बुद्धबोधिसत्त्वानां साधारणत्वात्। तत्र विशेषप्रवेशो बुद्धबोधिसत्त्वानां बुद्धक्षेत्रपरिशुद्धिविशेषः। बुद्धक्षेत्रपरिशुद्धिविशेषो बुद्धबोधिसत्त्वानामेव न श्रावकादीनां तदुकेलकुनिलप्रख्याबात(?) धर्मकायसांभोगिकनैर्माणिककायप्रतिलम्भस्य दर्शनदेशनाचित्तत्वप्रतिलम्भविशेषात्। तत्र दर्शनप्रतिलम्भविशेषः सर्वाकारज्ञेयप्रत्यक्षीभावतोऽवगन्तव्यो देशनाप्रतिलम्भविशेषो गाम्भीर्योदार्यविचित्रानेकमुखाप्रमेयदेशनतः। चित्तत्वप्रतिलम्भविशेषः सत्त्वकृत्यानुष्ठानाश्रयाप्रमेयाव्याहताभिज्ञादिगुणप्रतिलम्भतः। ते एते यथाक्रमं धर्मकायसांभोगिकनैर्माणिककायप्रतिलम्भो भवन्तीति वेदितव्यं। तत्र प्रयोजनप्रवेशः पूर्वप्रणिधानविशेषात्। महायानदेशनालम्बनविशेषात्। दशभूमिषु प्रयोगविशेषाच्च। तत्र त्रिविधेन प्रयोजनविशेषेण श्रावकप्रत्येकबुद्धेभ्यो बुद्धबोधिसत्त्वानामाश्रयपरिवृत्तिर्विशिष्यते। त्रिविधो विशेषः। प्रणिधानविशेषः पूर्वप्रणिधानविशेषान्महाबोधिप्रणिधानतः। आलम्बनविशेषो महायानदेशनालम्बनविशेषात्। सर्वधर्मसम्भिन्नालम्बनतस्तत्तथतालम्बनतश्च। प्रयोगविशेषश्च दशसु भूमिषु प्रयोगविशेषात्। सर्वावरणप्रहाणाय तत्प्रतिपक्षभावनाप्रयोगविशेषतः। तत्राश्रयपरिवृत्तेराश्रयो निर्विकल्पज्ञानं तेनाश्रयेण तत्प्रतिलम्भात्। तस्य प्रवेशः कथं भवतीत्याह। षडाकारनिर्विकल्पज्ञानप्रवेशात्। षडाकारप्रवेशः पुनरालम्बनतो निमित्तपरिवर्जनतः सम्यक्प्रयोजनतो



लक्षणतोऽनुशंसतः परिज्ञानतश्च। तत्र चतुर्भिराकारैरालम्बनप्रवेशः। चतुर्भिरित्यनन्तरं वक्ष्यमाणैः। तद्यथा महायानदेशनातदधिमुक्तिनिश्चयसंभारपरिपूरिभिः। तस्य ज्ञानस्योत्पत्त्यालम्बनं महायानदेशना तत्राधिमुक्तिः। तन्निश्चयः संभारपरिपूरिश्च। अन्यतमाभावे तदनुत्पादादिति समस्त आलम्बनप्रवेशः परिदीपितो भवेत्। तत्र चतुर्भिराकारैर्निमित्तपरिवर्जनप्रवेशो विपक्षप्रतिपक्षतथताधिगमधर्मनिमित्तपरिवर्जनतोऽनुगन्तव्यः। तत्र विपक्षनिमित्तपरिवर्जनं रागादिनिमित्तपरिवर्जनात्। प्रतिपक्षनिमित्तपरिवर्जनमशुभादिनिमित्तपरिवर्जनात्। तथतानिमित्तपरिवर्जनं तथतेयमित्यप्याभोगनिमित्तपरिवर्जनात्। अधिगमधर्मनिमित्तपरिवर्जनं प्रतिलब्धभावनाधिगमनिमित्तपरिवर्जनाद् भूमिषु। एवं चौदारिकमध्यसूक्ष्मदूरानुगतनिमित्तपरिवर्जनं यथासंख्यमनेनोद्भावितं भवति। तत्र विपक्षनिमित्तं दौष्ठुल्यहेतुत्वात् सुलक्ष्यत्वात् चौदारिकं। तत्प्रतिपक्षत्वात् प्रतिपक्षनिमित्तं मध्यं। तदन्यसर्वप्रतिपक्षत्वात् तथतानिमित्तं सूक्ष्ममनिमित्तभावनाफलत्वादधिगमनिमित्तं दूरानुगतं वेदितव्यं। तत्र सम्यक्प्रयोगप्रवेशश्चतुर्भिराकारैस्तद्यथोपलम्भप्रयोगतो विज्ञप्तिमात्रोपलम्भात् अनुपलम्भप्रयोगतोऽर्थानुपलम्भात्। उपलम्भानुपलम्भप्रयोगतोऽर्थाभावे विज्ञप्तिमात्रानुपलम्भात् विज्ञप्त्यर्थाभावे विज्ञप्त्ययोगात्। नोपलम्भोपलम्भप्रयोगतश्च द्वयानुपलम्भना द्वयोपलम्भात्। तत्र लक्षणप्रवेशस्त्रिभिराकारैः। तद्यथा धर्मताप्रतिष्ठानतोऽद्वयनिरभिलाप्यधर्मताप्रतिष्ठानात्तदालम्बनतः। संप्रख्यानतो द्वययथाभिलापेन्द्रियमविषयमविज्ञप्तिभाजनलोकासंप्रख्यानात्। द्वययथाभिलापेन्द्रियविषयविज्ञप्तिभाजनलोकनिमित्तानां यत्रासंप्रख्यानं भवति तत् निर्विकल्पज्ञानं। एवं सति किं देशितं भवतीत्याह। तदनेनारूप्यनिदर्शनमप्रतिष्ठमनाभासमविज्ञप्तिकमनिकेतमिति निर्विकल्पस्य ज्ञानस्य यथासूत्रं लक्षणमभिद्योतितं भवति। तत्र द्वयेन ग्राह्यग्राहकभावेन निरूपयितुमशक्यत्वात्।

# TABLE DES CHAPITRES.

| | | Pages. |
|---|---|---|
| I. | महायानसिद्ध्यधिकारः | 1 |
| II. | शरणगमनाधिकारः | 8 |
| III. | गोत्राधिकारः | 10 |
| IV. | चित्तोत्पादाधिकारः | 13 |
| V. | प्रतिपत्त्यधिकारः | 19 |
| VI. | तत्वाधिकारः | 22 |
| VII. | प्रभावाधिकारः | 25 |
| VIII. | परिपाकाधिकारः | 27 |
| IX. | बोध्यधिकारः | 33 |
| X. | अधिमुक्त्यधिकारः | 50 |
| XI. | धर्मपर्यैष्ट्यधिकारः | 53 |
| XII. | देशनाधिकारः | 77 |
| XIII. | प्रतिपत्त्यधिकारः | 84 |
| XIV. | अववादानुशासन्यधिकारः | 90 |
| XV. | उपायसहितकर्माधिकारः | 97 |
| XVI. | पारमिताधिकारः | 98 |
| XVII. | पूजासेवाप्रमाणाधिकारः | 118 |
| XVIII. | बोधिपक्षाधिकारः | 132 |
| XIX. | गुणाधिकारः | 160 |
| XX-XXI. | चर्याप्रतिष्ठाधिकारः | 175 |
| Appendice | | 190 |



IMPRIMERIE NATIONALE.

creative commons

# Attribution-NonCommercial-ShareAlike 3.0 Unported

## You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

## Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

## With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer